2-2

वे. 30

पत्रे ११ सौभाग्यकल्पद्रुमप्रारंभः॥ प्रथमस्कंध [illegible]

।सौ॰क॰॥

५

॥श्रीगणेशायनमः॥ अथसौभाग्यकल्पद्रुमपूजास्कंधप्रारंभः॥ यत्रेदमखिलंभातिकार्यबीजांकु(
रोपमं॥ विमृशामिपराहंतास्वात्ममूर्तिमनुत्तरां॥१॥ नत्वाश्रीयादवानंदपादपद्मंहृदिस्थितं॥ उद्भावयामि
सौभाग्यकल्पद्रुममभीष्टदं॥२॥ प्रातःस्मृतिःस्नानसंध्याजपन्यासादिभिःसदा॥ उपास्यायासाधकेंद्रस्तामं
बांहृदिभावयेत्॥३॥ अथश्रीसाधकेंद्रःउषसिप्युत्थितःस्वात्मदेवतांसंचिंतयन्स्थिरपद्मासनेएकाग्रचि
त्तःस्वमूर्द्ध्न्यधोमुखविशदसहस्रदलकमलमध्यगतोर्ध्वमुखद्वादशदलकमलकर्णिकास्थितपूर्णचंद्रमध्यगतप्रा
गग्रवर्णत्रिकोणांतश्चंद्रबिंबनिभंश्रीनाथंध्यात्वामूलाधारेऊर्ध्वमुखरक्तसहस्रदलकमलकर्णिकामध्यस्थितकु
लकुंडांतःसप्तसपार्भ्यांसार्द्धत्रिवलयाकारांबिसतंतुसूक्ष्मांतडित्कोटिप्रभांकुंडलिनींध्यात्वाकुंभकश्वासप्रबुद्धां
तांसुषुम्णामार्गेणब्रह्मरंध्रस्थितचंद्रमंडलप्रविष्टांतेनप्रासैकरसांभावयन्तत्रस्थचंद्रमंडलगलदमृतधाराभिराप्लु
तमात्मानंध्यायन्संघट्टमुद्रांन्यासपूर्वकंमहापादुकांचिंत्य॥ लंपृथिव्यात्मनेश्रीगुरवेगंधंसमर्पयामि॥ हंऔं

श्री॰

५

काशात्मने श्री॰ पुष्पं॰ यं वायव्यात्मने श्री॰ धूपं॰ रं तेजसात्मने श्री॰ दीपं॰ वं अमृतात्मने श्री॰ नैवेद्यं॰ सं सर्वात्म
ने श्री॰ सर्वोपचारा॰ इति मानसैः पंचोपचारैः कनिष्ठाद्यनामांतं वक्ष्यमाणकरन्याससमुद्रया संपूज्य पंचमुद्राः
प्रदर्शनपूर्वकं ब्रह्मरंध्रे स्याद्दिव्या त्वानतनश्चंद्रमंडलनिर्गतामाद्यां शक्तिमनाहतकमले यथोक्तरूपां ध्यात्वा य।
था शक्तिमानसोपचारैः समभ्यर्च्य विद्यां मनसा जपनु मूलाधारे पूर्ववद्ध्यात्वा मानसैः पंचभिः संपूज्य गुरुदेव
श्चावस्तुतिभिः स्तुत्वा वश्यकं निवर्त्तयेत्॥ सर्वत्र कर्मणि चतुस्वाररहितमंत्रादौ चतुस्वारयोगः कर्त्तव्यः॥ अथ
तीर्थादौ यथोचितमवगाह्य॥४॥ ऐं आत्मतत्वाय स्वाहा॥४॥ क्लीं विद्यातत्वाय स्वाहा॥४॥ सौः शिवतत्वाय स्वाहा
॥४॥३॥ सर्वतत्वाय स्वाहा॥ ओंष्ठेप रिमृज्य हस्तौ प्रक्षाल्य यदित्याचम्य॥ अनामिकाकनिष्ठिकांगुष्ठैर्वामना
सया रिवारत्वामापूर्य मूलेन त्रिर्मनसा जप्येत्तरया विसृज्येदिति प्राणानायम्य॥ एतद्द्वयं सर्वत्र कर्मादौ ज्ञेयं॥ दे
शकालौ अष्टांगस्छिति चोल्लिख्य परदेवताप्रीत्यर्थं स्नानमहं करिष्ये इति संकल्प्य॥ भूमध्याद्यखिलकर्म

॥सो॰क॰॥ ॥२॥

स्नानं तमध्ये खेन कुर्यात्ततः॥ त्रिरवगाह्याद्यजले पुरतः स्वाभिमुखाग्रं त्रिकोणं अग्न्यादिवामतः बालाग्र
बीजं मध्ये मायामेव मनामयाकृत्वा मध्ये देवतां हृदयादावाह्य ध्यात्वा॥ पृथिव्येत्याद्यभ्यर्च्य॥ ब्रह्मां
डोदरतीर्थानि करैः पृष्टानि ते रवे॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर॥ ४॥ क्रौं इति सूर्यमंडलादं
कुशमुद्रया तीर्थमाकृष्य तत्रावाह्य वमिति धेनुमुद्रयामृतीकृत्य अंगुष्ठानामिकायोगेन सप्तधा मूर्ध्नि
प्रोक्ष्य ४ मू॰ कुंभमुद्रया मस्तकहृत्भुजेषु त्रिस्त्रिरभिषिच्य तत्र जले मग्न ४ मूलं जपेत्॥ देवतां तीर्थ
मयीं ध्यात्वा॥ उत्थाय त्रिनिमग्न आचम्य वाससी परिधायासन आसीनः आचम्य वामकरे भस्म
दक्षेणाच्छाद्य ४ सद्योजातादिपंचभिर्मंत्रैः कामेश्वरमंत्रं च पठित्वा एवमभिमंत्र्य मस्तकभालहृत्तुक
रपादयोः सर्वांगेषु ईशानादिपंचमंत्रैः प्रणवेन चोद्धूलनं कृत्वा त्रिपुंड्रं मस्तकादिषु कुर्यात्॥ ततः
आचम्य प्राणानायम्य पूर्ववत् संध्यामुपाशिष्य इति संकल्प्य क्रंध्यादिध्यानांतं कृत्वा स्वपुरतः

श्री॰ ॥२॥

नद्धे श्रीयंत्रं ध्यात्वा तत्र हृदयात् ध्यानोक्तरूपां देवतामावाह्य मानसैः संपूज्य तत्तोयं दक्षहस्तस्थितं इ
तरेणाच्छादितं। ॐ ऐं ह्रीं श्रीं इति तारचतुष्टयेन लं वं रं यं हं इत्यादिभूतबीजपंचकेन ४ मूः सप्तावृत्त्या ४ अमृत
मालिन्या सप्तावृत्त्या चाभिमंत्रितं इतरकरगृहीतं तदंगुलिसंधिनिःसृतं दक्षांगुष्ठानामायोगेन मूर्ध्न्यास्य हृद
सु ४ मूः सप्तधाभ्युक्ष्य शेषं तोयं तेजोरूपं विमृश्य कुलामृतेन संयोज्य दक्षनासयांतःप्रविष्टं मंतः सकलकलुष
क्षालनपूर्वकं इतरनासया हस्ते निर्गतं विभाव्य दक्षकरे गृहीत्वा स्ववामे कल्पित वज्रशिलायां ४ ॐ ह्रीं परशु हुं
फडिति पाशुपास्त्रेणास्फाल्याचम्य ४ ऐं वागीश्वरि विद्महे क्लीं कामेश्वरी धीमहि। सौः तन्नः शक्तिः प्रचोदयात्।। श्री
महात्रिपुरसुंदरी एषोर्घ्यः स्वाहेति त्रिरर्घ्यं दत्वा।। ४ मू. त्रिपुरसुंदरीपादुकां तर्पयामीति त्रिः संतर्प्य ४ ॐ ह्रां ह्रीं हंसः
प्रकाशशक्तिसहितमार्तंडभैरवाय एषोर्घ्यः स्वाहेति त्रिरर्घ्यं ४ ॐ ह्रां ३ प्रकाश० भैरवपादुकां तर्पयामि इति त्रिः सं
तर्प्य। मूलाधारे ऐं बीजं तडित्कोटिसमप्रभां ध्यात्वा तत्तेज आवाहनक्रमेण बहिरानीय वह्निमंडले आवाह्य तदु

।सौ॰ क॰। तांवागीश्वरींध्यायेत्।।यथा।।पीतांपीतांबरालेपस्त्रग्विभूषानुभूषितां।।तडित्कोटिसमाभासांबालामक्षस्त्रगुज्व
।।२।। लां।।१।।पुस्तकाढ्यकरांभोजांवन्हिपीठनिषेदुषीं।।वाग्भवीवाग्भवोद्भूतांत्र्यक्षणांसुस्मितांस्मरेत्।।२।।इ
तिध्यात्वामानसैःसंपूज्य।।४ ऐं त्रिपुरादेविविद्महे वागीश्वरीधीमहि।।तंनोमुक्तिःप्रचोदयात्।।वागीश्वरीपा
दुकायेघेतित्रिरर्घ्यंदत्वा।।४ ऐंवागीश्व॰ यामिइतित्रिःसंतर्प्य।।आचम्य।।तोयाद्देवताउद्वास्य।।ऋष्यादिपूजां
कृत्वा।।मूलगायत्रीमूलवाग्भवगायत्रीवाग्भवबीजंचप्रत्येकंदशधाप्रजप्य।।गौरीर्मिमाय॰ व्योमन्नित्यृक्।।इत्युप
स्थायाचम्यानयाप्रातःसंध्ययापरदेवताःप्रीयतां।।इतिसमर्पयेत्।।आपादिन्यासांतंकृत्वामूलदेव्यर्घ्यंतर्पणंच
कृत्वामूलगायत्रींदशधाजपेदिति।।आशौचेप्येतावदेव।।किंतुमंत्रोच्चारोमानसः इतिप्रातःसंध्यामुपास्यतत्तदिन
नाथविद्यांघटिकाविद्यांचत्रिःप्रजपेत्।।यथा।।मूलस्यऋष्यादिपूजांनंकृत्वावाग्भवगायत्रींकिंचित्प्रजप्य।।४ मू॰ श्री॰
अंकं हंप्रकाशात्मकोन्मन्याकाशानंदनाथश्रीपादुकांपूजयामिनमः।।१।।४ दंअः संविमर्शात्मकसमनाकाशानंदम॰ ।।३।।

॥२॥४ मू॰ कं॰ ङं॰ क्षं आनंदात्मकव्यापकाश॰ ॥३॥४ चं॰ ञं मं ज्ञानात्मकशक्त्याकाश॰ मः॥४॥४ मू॰ टं॰ णं ळं
सत्यात्मकध्वन्याकाश॰ मः॥५॥४ मू॰ तं॰ नं वं पूर्णात्मकध्वनिमात्राकाश॰॥६॥४ मू॰ पं॰ मं रं स्वभावात्मकनाह
ताश॰॥७॥४ मू॰ यं॰ शं षं प्रतिभात्मकं द्वाकाश॰॥८॥४ मू॰ षं॰ क्षं ॐ सुभगात्मकाबिंद्वाकाश॰॥९॥४ मू॰ अथ घटि
काविद्या॰ ४ मू॰ अं॰ क्षं॰ ओं ह्रं अकारादि ङकारांता घटिकाशक्तिश्रीपादुकां नमः॥१॥४॥ मू॰ ऐं॰ क्षं अं॰ ङं॰ एका
रादि ङकारांतां नमः॥२॥४ मू॰ चं॰ क्षं अं णं चकारादि णकारांता॰॥३॥४ मू॰ तं॰ क्षं अं॰ मं तकारादि मकारांता॰
॥४॥४ मू॰ यं॰ क्षं अं॰ क्षं यकादि क्षकारांता॰॥५॥ अत्र ... टिकाविद्यासु विसर्गरहितपंचाशद्वर्णयोगो ज्ञे घ
यः॥ इति तद्दिने विद्या ज्ञात्वा त्रिधा जपः कर्त्तव्यः नवभिः पंचभिश्च दिनैरनयोः समाप्तिः॥ दशमे षष्टे
चारंभः॥ एवं तत्तनाथविद्याजपोत्तरं घटिकाविद्याजपोत्तरं चक्रमेण नववारं षष्ठिवारं मूलमावर्त्तये
त्॥ नाथघटिकापारायणकरणे इदं कर्त्तव्यं इति तत्पारायणस्कंधे निरूप्यते॥ अथ मध्यान्ह संध्या॥

।।सो॰ क॰।। आचमनादिमार्त्तंडभैरवतर्पणांतंसमानंसंकल्पेप्रातःपदस्थलेमध्यान्हपदंज्ञेयं।।तदुदनासनेक्लींवी

।।४।। जंरक्तवर्णंध्यात्वापूर्ववदाकाशेसूर्यमंडलेआवाह्यतदुभूतांकामेश्वरींध्यायेत्।।यथा।।रक्तांसुर

क्तांबरभूषणाढ्यांपाशांकुशाभीतिवरंदधानां।।सुचिस्मितांमुग्धवयौवनाढ्यांकामेश्वरींसंस्मरत

त्रिनेत्रां।।इतिध्यात्वामानसैःसंपूज्य।।४क्लींत्रिपुरेदेविविद्महेकामेश्वरिधीमहि।।तन्नःक्लिन्नेःप्रचोद

यात्।।कामेश्वरीपा॰ध्येतित्रिरर्घ्यंदत्वा।।क्लींकामेश्वरीपा॰यामिः।इतित्रिःसंतर्प्य।।आचमनाद्यवशि

ष्टंसमानं।।वाग्भवगायत्रीबीजजपस्थानेकामराजगायत्रीबीजजपोविशेषःसंध्यापूर्ववत्समर्प्येदिति

मध्यान्हसंध्या।।समुपास्यततदिनत्वविद्यांप्रजपेत्।।यथा।।मूलऋष्यादिपूजांतंकामराजगायत्रीजपंच

कृत्वा।।४मू॰ अंशिवतत्वानंदनाथरूपिणीकामेश्वरीपा॰नमः।।१।।४मू॰ कंशक्तित॰वज्रेश्वरी॰महा।।२।।४।। श्री॰

मूलंखंसदाशिवत॰भगमालिनी॰महा॰।।३।।४मू॰ गंईश्वरत॰शुद्धविद्याबा॰महा।।४।।४मू॰ घंशुद्धविद्यात॰ ।।४।।

बालाविद्यामहा ॥ ५ ॥ ४ मू॰ डं मायात॰ द्वादशार्द्धांबा॰ महा ॥ ६ ॥ ४ मू॰ चं कलात॰ राजश्यामलांबा॰ महा ॥ ७ ॥ ४ मू॰ छं विद्यात॰ शुकश्यामलांबा॰ महा ॥ ८ ॥ ४ मू॰ जं रागत॰ शारिकश्यामलांबा॰ महा ॥ ९ ॥ ४ मू॰ झं कालत॰ संगीतश्यामलांबा॰ महा ॥ १० ॥ ४ मू॰ ञं नियतित॰ साहित्यश्यामलांबा॰ महा ॥ ११ ॥ ४ मू॰ टं पुरुषत॰ हसंतीश्यामलांबा॰ महा ॥ १२ ॥ ४ मू॰ ठं प्रकृतित॰ घलुश्यामलांबा॰ महा ॥ १३ ॥ ४ मू॰ डं अहंकारत॰ सौभाग्यविद्यांबा॰ महा ॥ १४ ॥ ४ मू॰ ढं बुद्धित॰ ब्रह्मास्त्र॰ महा ॥ १५ ॥ ४ मू॰ णं मनस्त॰ वाराहिवि॰ महा ॥ १६ ॥ ४ मू॰ तं श्रोत्रत॰ बटुकभैरवी॰ महा ॥ १७ ॥ ४ मू॰ थं त्वकृत॰ तिरस्कारिणीमहा ॥ १८ ॥ ४ मू॰ दं चक्षुस्त॰ लोपामुद्रा॰ महा ॥ १९ ॥ ४ मू॰ धं जिव्हात॰ भुवनेश्वरीमहा ॥ २० ॥ ४ नं घ्राणत॰ अंनपूर्णामहा ॥ २१ ॥ ४ मू॰ पं वाक्तत्व॰ कामकला॰ महा ॥ २२ ॥ ४ मू॰ फं पाणित॰ तुरीयाम॰ ॥ २३ ॥ ४ मू॰ बं पादत॰ महाद्धी॰ म॰ ॥ २४ ॥ ४ मू॰ भं पायूत॰ अश्वारूढांबा॰ ॥ २५ ॥ ४ मू॰ मं उपस्थत॰ मिश्रांबा॰ म॰ ॥ २६ ॥ ४ मू॰ यं शब्दत॰ वाग्वादिनी॰ महा ॥ २७ ॥ ४ मू॰ रं स्पर्शत॰ प्रासादपरांबा॰ म॰ ॥ २८ ॥ ४ मू॰ लं रूपत॰

॥सौ॰क॰॥ परा प्रासादंबा॰म॰॥२९॥४मू॰ वंरसत॰परांबा॥३०॥४मू॰शंगंधल॰पराशांभवी॥३१॥४मू॰षंआकाशात॰ऊर्ध्वा
॥५॥ म्नायसमयविद्या॥३२॥४मू॰ संवायुत॰उत्तराम्नायकालिका॥३३॥४मू॰हंतेजत॰पश्चिमाम्नाय॰कुब्जिका॥३४
॥४मू॰ळंजलत॰दक्षिणाम्नाय॰भोगिनी॥३५॥४मू॰क्षंपृथिवील॰पूर्वाम्नाय॰मोदिनी॰महानमः॥३६॥एवंतत
दिनतत्वविद्यात्रिधाजप्तामूलंषट्त्रिंशद्वारमावर्तयेत्॥अत्रकामेश्वर्यादिनामादौतंतन्मंत्रपारायणोमुख्यःअत्राप्ये
तस्यकर्तव्यत्वंतत्वपारायणकरणेइतिज्ञेयंइतिमध्यान्हसंध्या॥अथसायंसंध्या॥तत्रापिसंकल्पेसायंपदोहःभैरव
तर्पणांतंविधाय॥आज्ञाचक्रेसौः बीजंशुक्लवर्णंविभाव्यपूर्ववदाकाशेचंद्रमंडलेआवाह्यनदुन्मूलाममृतेश्वरींध्याये
त्॥यथा॥शुक्लांशुक्लांबरालेपस्त्रग्विभूषानुभूषितां॥जटाजूटधरांनेत्रत्रयोन्मासिमुखांबुजां॥इषत्स्फुटितदंष्ट्रांच
भैरवीरूपमास्थितां॥जरापलितसंकीर्णांलंबपीनपयोधरां॥पाशांकुशौपुस्तकंचस्फटिकाक्षस्रजंकरैः॥दधानांश श्री॰
क्तिबीजोत्थांपूर्णेंदोमंडलस्थितां॥ध्यायेदाद्यांपरांशक्तिंशक्तिमद्भिर्निषेवितां॥भोगमोक्षप्रदांशांतामनंताममृते ॥५॥

स्वरी॥ध्यात्वा पंचपूजां॥४॥सौः त्रिपुरादेवि विद्महे शक्तीश्वरी धीमहि॥तन्नो मृत्ता प्रचोदयात्॥ अमृतेश्वरीपादुकां सा
हेति त्रिरर्घ्यं दत्वा॥५॥सौः अमृतेश्वरी त्यामि इति त्रिः संतर्प्य॥वाग्भवगायत्री बीजस्थाने शक्तिगायत्रीं शक्तिबीजं च
जपन् अवशिष्टं पूर्ववत्समर्पयेत्॥एवं संध्यां समर्प्य तत्तद्दिननित्यां प्रजपेत्॥मूलकृष्यादि पूजां तं शक्तिगायत्री च
हुत्वा॥५॥मू॰ ॐ ऐं २ ॐ नमः कामेश्वरी इच्छाकामफलप्रदे सर्वसत्ववशंकरी सर्वजगत्क्षोभणकरी हुं ३ द्रां द्रीं क्लीं ब्लूं
सः सौः क्लीं ऐं कामेश्वरी नित्या श्रीपादुकां पूजयामि नमः॥१॥४मू॰ ॐ ऐं भगभुगि भगिनि भगोदरि भगांगे भगमाले
भगावहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशंकरि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वभगानि मे ह्यान
य वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय सर्वसत्वान् भगेश्वरी अमोघे भगविच्चे क्षुभ क्षोभय सर्व
सत्वान् भगेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं में ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हर ब्लें ह्रीं॥४५॥भग
मालिनि नि॰ मः॥२॥४मू॰ ई ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा॥ नित्यक्लिन्नां नि मः॥२॥४मू॰ ई ॐ क्रौं भ्रौं क्रौं भ्रौं छ्रौं

ज्रौं झ्रौं स्वाहा॥ भेरुंडानि॰मः॥५॥४मू॰ ॐ ह्रीं वन्हिवासिन्यै नमः॥ वन्हिवा॰मः॥५॥४मू॰ ॐ ह्रीं फ्रें सः नित्यक्लि
ने मदद्रवे स्वाहा॥ महाविद्येश्वरीनि॰मः॥६॥४मू॰ ऋं ह्रीं शिवादूत्यै नमः॥ शिवादूतीनि॰मः॥७॥४मू॰ ऋं ह्रीं हुं
खे च छे क्षः स्त्रीं हूं छें ह्रीं फट्॥ त्वरितानि॰मः॥८॥४मू॰ ऌं बाला॥ कुलसुंदरीनि॰मः॥९॥४मू॰ ऌं हसकलरडैं
हसकलडीं हस्क्लौं॥ द्रां ४ सोः क्लीं ऐं॥ नित्यानि॰मः॥१०॥४मू॰ ऐं ॐ ह्रीं फ्रें स्रूं अं ह्रीं क्रों नित्यमदद्रवे हुं क्रों॥ नीलपताका
नि॰॥११॥४मू॰ ऐं भ्रौं॥ विजयानि॰मः॥१२॥४मू॰ ॐ स्वौं॥ सर्वमंगलानि॰मः॥१३॥४मू॰ ओं ॐ नमो भगव
ति ज्वालामालिनि देवी सर्वभूतसंहारकारिके जातवेदसे ज्वलंती ज्वल २ प्रज्वल २ हुं २ रं २ हुं फट् स्वाहा॰ ज्वा॰नि॰
॥१४॥४मू॰ अं क्रौं चित्रानित्या॰नमः॥१५॥४मू॰ अमू॰ महात्रिपुरसुंदरीनि॰मः॥१६॥४मू॰ अः ह ९२ समदर्शी
महानि॰मः॥१७॥ अत्रांसोपांसयोस्तत्तद्दिन नित्याजपोत्तरं प्रत्यहं जपस्त्रिंशंनित्यासंप्रदायेषोडशनित्यासं
प्रदायेनुचरमस्यैवेति ध्येयं॥ एवं तत्तद्दिन नित्याजपोत्तरं त्रिंशद्वारं षोडशवारं वा मूलमावर्त्तयेत्॥ एतच्च नि

१

स्यापारायणकरणेज्ञेयं॥ अत्रेदमवधेयं सायंसंध्यायांमूलदेव्यर्घ्यतर्पणजपानामंगीत्वं अवशिष्ट
स्यांगत्वात् विस्मरणेनांगलोपेपुनःकरणंनास्ति॥ अपितुतत्प्रायश्चित्तंदशधामूलजपः॥ अंगिलोपे
तुद्वितीयसंध्याकालादर्वाक्स्मरणेपुनःसंध्याकरणं॥ अनंतरंस्मरणेअष्टशतमूलजपःसंपूर्णसंध्या
लोपेप्येवं॥ तत्रचमुख्यकालात्ययेमध्यकालात्ययेगौणकालात्ययेचक्रमान्मूलगायत्रीदशकंतकाल
गायत्रीशतकंमूलशतकंवाजपेत् सनक्षत्रःसमसूर्यःअर्द्धसूर्यश्चमुख्यःकालःप्रातर्मध्यान्हसंध्याकालो
मध्यःद्वितीयकालांतोगौणःप्रातःसंध्यायांप्राङ्मुखःइतरयोरुदङ्मुखःअर्घ्यप्रदानजपयोःसूर्याभिमुख
इति॥ एवंकृतसंध्यादिक्रियःजपस्थानादौपुरश्चरणस्कंधेवक्ष्यमाणासनान्यतमेनासनेप्राङ्मुखउदङ्मुखो
वासीनःभूतशुध्यादिकंकुर्यात्॥ यथा॥ अपसर्पंतितिभूतान्युत्सार्य॥ पृथ्वीत्वयाधृतालोका॰ इतिभूमिंप्रा
र्थ्य॥ भूंभूम्यैनमःइतिनत्वा॥ ४॥ ह्रींआधारशक्तिकमलासना॰ इतिभूमिमासनंचक्रमेणाक्षतादिभिःसं

पूज्यं॥ नत्वा लदुपर्युपविश्य॥४॥ गुं गुरुभ्यो॰ गं गणपतये॰ पं परदेवता॰ इति दक्षवामस्कंधयोः हृदि च क्रमेण
नत्वा फडिति आसनाधः वामपादपार्ष्णिघातत्रयेण ॐ नमः सुदर्शनास्त्राय हुं फडिति अरन्रेण दिग्बंधनं
च त्रिविधविघ्नान्दूरीकृत्य स्वपुरतो वह्निप्राकारं विभावयेत्॥ इति भूतशुद्धिः॥ अथ भूतशुद्धिः॥ यथा॥४
हंस इति मंत्रेण कुंभकं कुर्वन्मूलाधारस्थां कुंडलिनीं देहस्थाखिलदेवतां जीवात्मासहितां ब्रह्मरंध्रोपरि
स्थितशिवेन संयोज्य जडात्मकं स्थूलदेहं तद्वामकुक्षिगतं पापपुरुषं कज्जलवर्णं रक्तश्मश्रुं क्रूरमधोमुखं
खड्गचर्मधरं पातकोपपातकमयांगं विभाव्य॥४॥ यं ४ रं ४ वं ४ इति जपन्पूरककुंभकरेचकं कुर्वन्वायुवह्नि
सलिलैः शोषणदाहनप्लावनानि विधाय तदनु पुनः ४ लं ४ हं ४ सोहं इति जपन्पूरकादि कुर्वन्नाप्लावितभस्म
नाशरीरात्मतया घनीभावं तत्र चैतन्यं हृदि जीवात्मनः आनयनं च विमृश्य आत्मनः पंचभूतदेवताव्युप
लिं विभाव्य स्वस्वस्थानस्थितकुंडल्यादिदेवतासहितं शरीरं भावयेत्॥ इति भूतशुद्धिं कृत्वा॥ हृदयं करत

वे॰ ३८

॥सौभाग्यकल्पद्रुमद्वितीयस्कंधप्रारंभः [illegible]।

॥श्रीगणेशायनमः॥श्रीमहालक्ष्म्यैनमः॥अथद्वितीयसपर्यास्कंधः॥श्रीं॥२॥नित्यपूजाविधानेनपूजि
तायाप्रयच्छति॥ वांछितार्थान्पूजकेभ्यस्तामंबांप्रणमाम्यहं॥१॥अथैवकृतसंध्यादिक्रियःसपर्यामा
रभेत्॥साचत्रिधा॥नित्यनैमित्तिककाम्यभेदात्॥तत्रनित्यांनिर्वर्त्यनैमित्तिकादिसपर्यांकुर्यात्॥आदौनि
नित्यसपर्याविधिरालिख्यते॥शुचिःप्रक्षालितपाणिपादोवस्त्राभरणाद्यलंकृतनिजकलेवरः॥पंचाति
वासितमुखःसपर्यामंदिरपूर्वद्वारादिचतुर्द्वारेषुअथवापरिकल्पितद्वारेसपर्यास्थानात्पश्चिमदिशिविभा
वितद्वारेवाद्वारकपूजांकुर्यात्॥यथा॥आचम्यदेहलिपुरतःगंधोदकेनकृतचतुरस्रमंडलंमत्स्यमुद्रयाविधा
य॥४॥अखंडमंडलाकारंविश्वंव्याप्यंव्यवस्थितं॥त्रैलोक्यंमंडितंयेनमंडलंतत्सदाशिवं॥१॥इतिमंडलेश
मावाह्य ४ मंमंडलेशाय॰इतिगंधपुष्पाक्षतैर्मंडलंसंपूज्य॥फडितिप्रक्षालितसाधारंताम्रपात्रंतदुपरिसंस्था
प्यतत्पात्रेह्रांहृदयायनमः इतितोयमापूर्य॥ॐस्वांडोदरे त्विवक्ष्यमाणमंवक्ष्यमाणविधिनातोयेतीर्थमावाह्य

तीर्थं गंधादिना संपूज्य ॥ ३ ॥ वाळेन इति त्रिरर्घ्यं मंत्र्य ४ वं धेनुं प्रदर्श्य अमृतीकृत्य नाराचेन निर्विषीकृत्यास्त्रे
ण संरक्ष्य कवचेनावगुंठ्य ॥ अनामांगुष्ठयोर्योगरूप्य तर्पणमुद्रया धृतकुसुमो धृततोयेन द्वारं फट् इति द्वादश
धा प्रोक्ष्य ॥ अथ तर्जन्यंगुष्ठयोर्योगात्मक पूजनमुद्रासादितक्षत पुष्पक्षेपणं दक्षहस्तेन इतरेण पूर्ववत्तर्पणं युगप
त्कुर्यादिति ॥ यथा द्वारोर्ध्वे ४ अं अविघ्नाय ॥ १ ॥ ४ ॥ मं महालक्ष्म्यैः २ ॥ ४ ॥ सं सरस्वत्यै ३ ॥ दक्षभागे ४ गं गणप
तये ४ वामे ॥ ४ ॥ क्षं क्षेत्रपालाय ५ ॥ दक्षे ४ गं गंगायै ॥ वामे ४ यं यमुनायै ७ दक्षे ॥ ४ ॥ धां धात्र्यै ८ वामे ४
विं विधात्र्यै नमः ९ दक्षे ४ शं शंखनिधये १० वामे ४ पं पद्मनिधये ११ देहल्यां ४ हुः अस्त्राय फट् अस्त्रदेव्यै १२
४ आं ब्राह्म्यै १ ॥ ४ इं माहेश्वर्यै २ ॥ ४ उं कौमार्यै ३ ॥ ४ ऋं वैष्णव्यै ४ ॥ ४ ऌं वाराह्यै ५ ॥ ४ ऐं माहेन्द्र्यै ६ ॥ ४ औं
चामुंडायै ७ ॥ ४ अः महालक्ष्म्यै ८ ॥ ४ ॥ इति अत्र द्वारचतुष्टयपूजापक्षे अस्त्रदेव तांतं प्रतिद्वारे पूजनीयं
ब्राह्म्यादिषु द्वयद्वयं प्राक् द्वारादि ॥ इति द्वारपूजां विधाय ॥ अपसर्पन्त्विति पठन् अंतः श्वासानुसारेण

श्री·क·१ वामांगरम्भकोऽन्ततः प्रविश्यासनेऽउपविशेत्॥ अथ तत्र भूतशुद्ध्यादिहेतुसंकल्पमेवं कुर्यात्॥ कृते भूतशुद्ध्यादिहे
॥२॥ तुसंकल्पमेवं कुर्यात्॥ प्रदेशांतरे कृतभूतशुद्धिमात्रं कुर्यात्॥ ततः अष्टांगादिस्थितिं चोच्चिरव्यकामेश्व
रीप्रीत्यर्थं यथासंभवेर्द्रव्यैर्यथाशक्तया तन्त्रोक्तविधानेन पूजनमहं करिष्ये॥ ततो नैमित्तिकपूजासंकल्पे
वक्ष्यमाणश्रीयंत्राद्यन्यतमं पूजापीठं स्वपुरतः हस्तमितां भूमिं मध्ये विहाय यथासंभवे पीठादौ स्वल
कृते स्थापयेत्॥ अत्र दिक्व्यवस्थाया पूज्यपृष्ठभागस्य पूर्वत्वेन ज्ञेया तेन पूज्यपुरोभागस्य पश्चि
मत्वमिति॥ पीठदक्षभागे दीपं स्वदक्षिणपृष्ठकोणेनातिदूरतः प्रक्षालनपात्रं स्वदक्षसमीपतः पुष्पा
द्युपकरणं च स्थापयेत्॥ ततः महागणपतिं न्यासं पूर्वकं किंचिज्जपित्वा समर्प्य॥ विघ्नेश्वर नमस्तेऽस्तु
॥ भक्ताभीष्टफलप्रद॥ मया संप्रार्थितो विघ्नान् पूजायां विनिवारय॥ इति प्रार्थ्येति रस्कृतिं गणेशाव
ज्जपित्वा द्वारदेशोर्ध्वया वा पुष्पाक्षतैरभ्यर्च्य यथाशक्तिमूलविद्यां च प्रजप्य॥ ताम्रपात्रे गंधाक्ष

स्कं· श्री· ॥२॥

तपुष्पतोयंगृहीत्वा४ ह्रां ह्रीं हंसः मार्तंडभैरवायएषोर्घ्यस्वाहेतिदत्वा॥ ततः दक्षभागेपीठाग्रेसमी
पतः॥ सामान्यकलशं॥ तस्योत्तरोत्तरक्रमः॥ बलिपात्रं॥ गुरुपात्रं॥ श्रीपात्रं॥ शंखं॥ हेतुपात्रं॥ द्विती
य॥ तृतीय॥ मुद्रापात्राणि च॥ स्वपुरतः॥ आत्मपात्रं चेति दक्षपार्श्वाणि स्थापयित्वा ततः सामान्य
कलशाधः गंधोदकेन हृत्तचतुरस्रमंडलं मत्स्यमुद्रयाहृत्वा शंखमुद्रया दक्षांगुष्ठेन मंडलं सृष्ट्वा
॥ वृत्ते ४ सामान्यकलशमंडलाय इति संपूज्य चतुरस्राग्नीशासुरवायुकोणेषु मध्ये चतुर्दिक्षु
चषडंग गंपुष्पाक्षतैः पूजयेत्॥ ४॥ ऐं हृदयाय॥ १॥ ४॥ क्लीं शिरसे स्वाहा २। ४ सौः शिखायैवषट्॥ ३॥ ४
ऐं कवचाय हुं॥ ४॥ ४ क्लीं नेत्रत्रयाय वौषट्॥ ५॥ ४ सौः अस्त्राय फट् ६ इति तत्र सुगंधितोयपूरितं पात्रं
साधारं संस्थाप्य ४ ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर॥ ४॥
क्रों इत्यंकुशमुद्रया सूर्यमंडलान्तीर्थान्याकृष्य॥ गंगे च यमु· कुरु इति कलशे आवाह्य ४ ॐन

मोभगवतिअशेषतीर्थालवालेशिवजटाधिरूढे गंगंगेगांबिके स्वाहा इत्यभिमंत्र्य धेनुमुद्रयाव
मिस्मृतीकृत्य तार्क्ष्यमुद्रया निर्विषीकृत्य ४ ॐ नमः सुदर्शनायास्त्राय फट् इत्यस्त्रमुद्रया संरक्ष्य
हुमिति कवचेनावगुंठनमुद्रयावगुंठ्य ॥ गंधपुष्पाक्षतैः संपूज्य ४ मूलाष्टकेनाभिमंत्रयेदिति कल
शपूजाविधिः ॥ अथ हेतुपात्राधः पूर्ववन्मंडलाद्यंगपूजांतं कृत्वा तदुपरि स्थापितमाधारं ४ ऐं अ
ग्निमंडलाय धर्मप्रदशकलात्मने हेतुपात्राधाराय· इत्याधारं संस्थापितं संपूज्य ॥ तस्मिन् प्रागादि
दृते क्रमेणाग्निकलाः पूजयेत् ॥ यथा ॥ ४ यं धूम्रार्चिकलायै १ ४ रं ऊष्माकलायै· २ ४ लं ज्वलि
निकलायै· ३ ४ वं ज्वालिनीकलायै ४ ४ शं विस्फुलिंगिनीक· ५ ४ षं सुश्रिक· ६ ४ सं सुरूपाकला·
७ ४ हं कपिलाक· ८ ४ ळं हव्यवाहक· ९ ४ क्षं कव्यवाहक· १० ४ इति संपूज्य अग्निकलात्मकमा
धारं विभाव्य· आधारोपरि सुवासितं सुधूपितं हेतुकलशं ४ ह्रीं सूर्यमंडलायार्थप्रदद्वादशक

त्मने हेतुपात्राय० ॥ इति संस्थापितं संपूज्य तस्मिन् प्रागादिपूर्वक्रमेण सूर्यकलाः पूजयेत् ॥ यथा ४ कं
भं तपिनीक० १ । ४ खं बं तापिनीक० २ । ४ गं फं धूम्रक० ३ । ४ घं पं मरीचीक० ४ । ४ ङं नं ज्वालिनीक० ५ । ४ चं धं रु
चिक० ६ । ४ छं दं सुषुम्णाक० ७ । ४ जं थं भोगदाक० ८ । ४ झं तं विश्वाक० ९ । ४ ञं णं बोधिनीक० १० । ४ टं ढं
धारिणीक ११ । ४ ठं डं क्षमाक० १२ । ४ श्री हेतुपात्रं सूर्यकलात्मकं ध्यात्वा पात्राय० इति गंधपुष्पाक्षतैरभ्य
र्च्य पूर्ववद्द्विभाव्य प्रणमेत् ॥ अथ सुवासिततीर्थकलशहस्तां योगिनीपरदेवतां बुध्या ४ रक्तांबरां रक्तांबरां
रत्नभूषाभिः समलंकृतां ॥ सुधापात्रधरां देवीं मदघूर्णितलोचनां इति ध्यात्वा संपूज्य कलशं च गंधादि
भिरभ्यर्च्य कलशं ४ ॐ नमो भगवते वासुदेवाय हुं फट् नमः ॥ इति सप्तधाभिमंत्र्य ॥ ततः स्वपुरतः आ
धारोपरि निधाय ॥ कुसुमाक्षततीर्थलेशैः पथिकदेवतां द्वारदेशाभिमुखं तर्पयेत् ॥ यथा ४ पथिक
देवताभ्यो हुं फट् स्वाहा १ । ४ वं ग्रामचंडालिनीं हुं फट् स्वाहा ४ वं तपिनी चंडालिनी हुं २ । ४ वं निंदा चंडालि

॥सो॰क॰॥ ॥४॥

नीहुं ३।४।४ वंसर्वपरशुजनहृच्छिहोषायहुंफट्स्वाहा॥५॥ इतिकलशंगंधादिभिःसंपूज्य॥तंस्पृशन्
जपेत्॥स्वादिष्टयामदिष्टयापवस्वसोमधारया॥इंद्रायपातवेसुतः॥१॥रक्षोहाविश्वचर्षणिरभियोनिमयोहतं॥द्रुणासधस्थमासदत्॥२॥वरिवोधातमोभवमंहिष्ठोवृत्रहंतमः॥पर्षिराधोमघोनां॥३॥अभ्यर्षमहानांदेवानांवीतिमंधसा॥अभिवाजमुतश्रवः॥४॥त्वामच्छाचरामसितदिदर्थंदिवेदिवे॥इंद्रोत्वेनआशसः॥विष्णुर्योनिंकल्पयतुत्वष्टारूपाणिपिंशतु॥आसिंचतुप्रजापतिर्धातागर्भंदधातुते॥१॥गर्भंधेहिसिनीवालिगर्भंधेहिसरस्वति॥गर्भंतेअश्विनौदेवावाधत्तांपुष्करस्रजा॥२॥हिरण्ययीअरणीयंनिर्मथतोअश्विनौ॥तंतेगर्भंहवामहेदशमेमासिसूतवे॥३॥त्रिभिष्ट्वंदेवसवितर्वर्षिष्ठैःसोमधामभिः॥अग्नेदक्षैःपुनीहिनः॥१॥पुनंतुमांदेवजनाःपुनंतुवसवोधिया॥विश्वेदेवाःपुनीतमाजातवेदःपुनीहिमां॥२॥प्रप्यायस्वप्रस्यंदस्वसोमविश्वेभिरंशुभिः॥

स्वं॰२ श्री॰ ॥५॥

देवेभ्य उत्तमं हविः॥ इमंमेगंगे० मया॥ सितासिते सरिते यत्र संगथे तत्रा प्लुतासो दिवमुत्पतंति॥ ए वै
तन्वं १ विसृजंति धीरास्ते जनासो अमृतत्वं भजंते॥ तामंरसानामनुषोदुरोणआ धत्तं रयिं सहवीरं
वचस्यवे॥ एतं तीर्थं सुप्रमाणं शुभस्यतीरथाणं पथेष्ठा मयदुर्मतिं हतं॥ श्रोणामेकमुदकं गामवा
जतिमांसमेकः पिंशति सुनयाभृतं॥ आ निम्रुचः शकृदेको अपाभरत्किं स्वित्पुत्रेभ्यः पितराउपा
वतुः॥ हिरण्यपात्रंमधोः पूर्णं ददाति॥ मधव्योसानीति॥ एकधा ब्रह्मणउपहरति॥ एकधेव यज
मान आयुस्तेजो दधाति॥ २॥ घृणिः सूर्य आदित्यो न प्रभावात्यक्षरं॥ मधुक्षरंति तद्रसं॥ सत्यं वै
तद्रसमापो ज्योति रसोमृतं ब्रह्म भूर्भुवस्वरोंमू॥ ४॥ एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवं॥ क
चोमृद्वां ब्रह्महत्यां तेन नेनाशयाम्यहं॥ सूर्यमंडल संभूते वरुणालय संभवे॥ उमाबीजमये दवि
शुक्रशापाद्विमुच्यतां॥ वेदानां प्रणवो बीजं ब्रह्मानंदमयी यदि॥ तेन सत्येन ते देवि ब्रह्महत्यां व्यपो

सौ॰ क॰॥ ॥५१॥

हतु॥४॥ ॐ नमो भगवति वारुणी जडमूर्तये ग्रामेश्वरी क्रमेण पथिक देवने रह्व २ सर्वदोषान्मोचय २ श्रीं ह्रीं क्लीं ऐं शां शीं शूं शैं शौं शः शुक्रशापविमोचकायै स्वाहा॥ इति॥ ततस्तत्तीर्थं उद्धृत्य तत्करा वाघ्राय तत्तीर्थादिकं नासिकामार्गेणांतः प्रविष्टं ब्रह्मरंध्रस्थ चंद्रमंडलामृतसामरस्येनामृतमयं ब्रह्मरं ध्री नेत्रमार्गेण निर्गत्य कलशस्थितं ततः अशेषतीर्थादिकं चिदमृतमयं विमृश्य ऐं ह्रीं श्रीं ॐ नमो भगवति तिरस्करिणि के नैलोक्यमोहिनि महामाये पशुजनमनश्चक्षुश्श्रोत्र तिरस्करणं कुरु २ स्वाहा॥ सौः १ ॥ इति पुनरभिमंत्र्य॥ सामान्य कलश दक्षभागे स्थापयेत्॥ ततः॥ द्वितीयपात्राधो मंडलाद्यंग पूजां तं कृत्वा॥ तत्राधारपात्रयोः अग्निः सकलाः पूर्ववत् पूजयेत्॥ इयान्विशेषः॥ हेतुपात्रपदस्थाने द्वियपात्रे स्यहः॥ एवमेवाग्रे ततस्थाने तत्तत्पात्र प्रद प्रयोगं ज्ञेयः॥ ततः सोममंडलाय कामप्रद षोडशकलात्मने॰ खंडाय॰ इति॥ तस्मिन्पुष्पखंडान् निक्षिप्य तान्संपूज्य तीर्थेनाभ्युक्ष्य २१४ पशुपाशाय विघ्नहरिरक्षैसाय धीम

स्कं॰ २

श्री॰

॥५१॥

हि॥तन्नःछागःप्रचोदयात्॥८॥शिवोकृतमिदंपिंडमतस्त्वंशिवतांव्रज॥उद्बुध्यस्वपशोत्वंहिनपशु
स्त्वंशिवोह्यसि॥इतित्रिरभिमंत्र्य॥सद्योजातंप्र·सदाशिवों॥इतिचाभिमंत्र्य॥४॥सोःसोममंडलाय
कामप्रदषोडशकलात्मनेद्वितीयाय·इतिसंपूज्य॥पुष्पखंडेषुप्रागादिसोमकलाःपूजयेत्॥यथा४अं
अमृतकलायै·१।४आंमानदाकलायै·२।४इंपूषाक·३।४ईंतुष्टिक·४।४उंपुष्टिक·५।४ऊंरतिक·६।४
ऋंधृतिक·७।४ॠंशशिनिक·८।४ऌंचंद्रिकाक·९।४ॡंकांतिक·१०।४एंज्योत्स्नाक·११।४ऐंश्रीक·१२
४ओंप्रीतिक·१३।४औंअंगदाक·१४।४अंपूर्णाक·१५।४अःपूर्णामृताक·१६एवमेवतृतीयपात्रविधिः
अयंविशेषःपशुपाशाय।यादिमंत्रस्थानेत्र्यंबकमितिमंत्रः॥४॥त्र्यंबकंयजामहे·मात॥मुद्रापात्रस्था
नेमंडलायगंगपूजांतंकृत्वातत्रमुद्रापात्रेनिधायतीर्थेनाभ्युक्ष्य॥४तद्विष्णोःपर·पदं॥इतिप्रपूज्य॥
ततः४क्लींमितिद्वितीयादिलेशंहेतुपात्रेनिक्षिप्य४ब्रह्मांडखंडसंभृतमशेषरससंभृत॥आपूरितंम

हा पात्रं पीयूषरससमानहेति हेतुपात्रे तीर्थमापूर्य ॥४॥ सौः सोममंडलं स्मने हेतुपात्रामृताय इति ती
र्थं संपूज्य ॥ तस्मिन् सोममंडलं संपूज्य ॥ हेतुपात्र तीर्थे प्रागादिनिर्ऋतिपर्यंतं अकारादिविसर्गांतान्
॥ तदादि वायुपर्यंतं कादितांतान् ॥ तदादि प्रागंतं थादिसांतान् कोणेषु हळक्षान् ॥ दक्षवामपार्श्वयो
र्हसौ तत्रिकोणमध्ये हंसः इति ॥ वर्णत्रिकोणं तद्बहिः क्रमेण चतुरस्रवृत्तत्रिकोण षट्कोणवृत्ता
ष्टदलानि च विभाव्य ॥ वर्णत्रिकोणमध्ये पूजयेत् ॥४ ग्लूं गगनरत्नाय॰ १॥४ स्लूं स्वर्गरत्नाय॰ २॥४
म्लूं मर्त्यरत्नाय॰ ३॥४ प्लूं पातालरत्नाय॰ ४॥४ न्लूं नागरत्नाय ५॥ अथ हेतुतीर्थे दिव्यमादाय दक्ष
हस्त पूजामुद्रागृहीतपुष्पाक्षतैः इतरहस्ततर्पणमुद्राधृतपुष्पखंडोध्धृतद्वींतीर्थबिंदुभिर्युगप
त्वतुरस्रदक्षवामयोः क्रमेण तर्पयेत् ॥५॥ ऐं॰ ह्स्रौं॰ ब्लूं आनंदभैरवाय वषट् ॥ आनंदभैरवश्री
पा॰ १॥४ सहक्षमलवयरूं सुधादेव्यै वौषट् आनंदभैरवश्रीपा॰ ॥२॥ दर्वींगतशेषतीर्थं पात्रांतरे

संस्थाप्य आवरणशेषेणसहैवसुवासिनीपूजांतस्वीकुर्यात्॥पात्रस्थानोत्तरं हेतुपात्रेनिक्षिपेत्॥अथ
त्रिकोणे अग्न्यादिवामावर्तेनकोणत्रयेमध्येचपूजयेत्॥४॥ऐंक ४ आग्नेचक्रेकामगिरिपीठेमित्रीशना
थात्मनेजाग्रद्दशाधिष्ठायकेइच्छाशक्त्यात्मकरुद्रात्मकशक्तिश्रीमहाकामेश्वरीश्रीपा॰ १४ क्लींह ५ सूर्य
चक्रेजालंधरपीठेषष्ठीशनाथात्मकेस्वप्नदशाधिष्ठायकेज्ञानशक्त्यात्मकविष्ण्वात्मकशक्तिश्रीमहाव
ज्रेश्वरीश्रीपा॰ २१८ सौः स ३ सोमचक्रेपूर्णगिरिपीठेउड्डीशनाथात्मकेसुषुप्तिदशाधिष्ठायकेक्रिया
शक्त्यात्मकब्रह्मात्मशक्तिश्रीमहाभगमालिनीश्रीपा॰ ३१४ मू॰ परब्रह्मचक्रेमहोड्याणपीठेचर्यानो
थात्मकेतुरीयदशाधिष्ठायकेशांत्याशक्त्यात्मकपरब्रह्मात्मशक्तिश्रीमहात्रिपुरसुंदरीश्रीपा॰ ४॥अ
थषट्कोणेप्रागादि॥४॥ऐंहृदयाय॰हृदयदेवीश्रीपा॰इत्यादि अत्रदेविश्रीइत्यंतंषडंगपूजां कृत्वा अ
ष्टदलेप्रागादि॥४॥अं आं ब्राह्मिस॰सितांगभैरवश्री॰ १४ इं ईं माहेश्वरीस॰रुरुभैरव २ उं ऊं कौमा

॥सौ॰क॰॥ रीसः चंडभैरव॥३॥४ अं ईं वैष्णवीसः क्रोधभैरव॰४।४ ऌं ॡं वाराहीसः उन्मत्तभै॰५।४ एं ऐं माहेंद्रीसः कपा स्कं॰२
॥७॥ लभैरव॰६।४ ॐ औं चामुंडासः भीषणभैरव॰७।४ अं अः महालक्ष्मीसः संहारभैरव ८ अथ तस्यात्रमा
च्छाद्य स्पृशान्॥४॥ ऐं अग्निकलायेन॥४॥ क्लीं सूर्यकलायै॥४॥ सौः सोमकः॥ इत्याद्याः पूर्वोक्ताग्निसू
र्यसोमकलाः प्रजप्य॥ पंचब्रह्मकलामंत्रांश्च प्रजपेत्॥ यथा॥४॥ अं ब्रह्मकलायै॥४॥ कं सृष्टिक॰१।४
खं ऋद्धि॰२।४ गं स्मृतिक॰३।४ घं मेधाक॰४।४ ङं कांतिक॰५।४ चं लक्ष्मीक॰६।४ छं द्युतिक॰७।४
जं स्थिराक॰८।४ झं स्थितिक॰९।४ ञं सिद्धिक॰१० ह २ स स्रुचिष॰ ह्हल॥१॥४॥ डं विष्णुक॥४ टं ज
राक॰१।४ ठं पालिनीक॰२।४ डं शांतिक॰३।४ ढं ईश्वरीक॰४।४ णं रतिक॰५।४ तं कामनीक॰६।४ थं
वरदाक॰७।४ दं अह्लादिक॰८।४ धं प्रीतिक॰९।४ नं दीर्घक॰१०।४ प्रतद्विष्णुस्तवतेवी॰भुवनानि ॥श्री॥
विश्वा॥२।४॥ मं रुद्रक॰४ पं तीक्ष्याक॰१।४ फं रोद्रिक॰२।४ बं भयाक॰३।४ भं निद्राक॰४।४ मं तंद्रिक॰ ॥७॥

यं ४ यं क्षुधाक ६।४ रं क्रोधिक ७।४ लं क्रियाक ८।४ वं उद्गारीक ९।४ शं मृत्युक १०।४ ध्येवकंय ताम्
तू ४ आं बिंदुद्विश्वरक ४ षं पिताक १।४ सं श्वेताक २।४ हं अरुक ३।४ ळं असिताक ४।४ क्षं अ
नंक ५ तद्विष्णोः परमं पदं ४ हं नादसदाशिवक ४ अं निवृत्तिक १।४ आं प्रतिष्ठाक २।४ इं विद्याक
३।४ ईं शांतिक ४।४ उं इंधिकाक ५।४ ऊं दीपिकाक ६।४ ऋं रेचिकाक ७।४ ॠं मोचिकाक ८।४ ऌं
पराक ९।४ ॡं सूक्ष्माक १०।४ एं सूक्ष्माक ११।४ ऐं ज्ञानामृताक १२।४ ओं आप्यायनीक १३।४ औं व्या
पनीक १४।४ अं व्योमरूपाक १५।४ अः अनंताक १६ विष्णुर्योनिं सजा। मधुवाता तुनः॥ हिरण्यपात्रं
दधाति। घृणिः सूर्य रोमू इति अथ तत्पात्रे ४ सुधादेव्यै बालसूर्यप्रभां देवीं स्वर्णवस्त्रां त्रिलोचनां॥ स्र
णिपाशवराभीतिकरां पद्मस्थितां स्मरेत्॥ २॥ इति हृदि ध्यात्वा सकलकलासहितां सुधादेवीमावाह्य
अस्य श्रीप्राणप्रतिष्ठामहामंत्रस्य ब्रह्मविष्णुमहेश्वराऋषयः॥ ऋग्यजुःसामानि छंदांसि प्राणशक्तिर्देव

ला आं ह्रीं क्रों बीजादि॥ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः॥ इति करांगन्यासः॥ रक्तां बोधि॰ पशानः॥ वामदक्षोर्ध्वौ
धः क्रमेणायुधानि॥ पंचपूजा॥ तत्रात्रं स्मृशानू॥ ७ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ॐ क्षं सं हं सः॥ ह्रीं ॐ
समस्तकलासहितसुधादेविप्राणा इह प्राणाः आं १७ सम॰ देविजीव इह स्थितः आं १७ सम॰ देवि सर्वेंद्रि
याणि इह स्थितानि॥ आं १७ सम॰ देवि वाङ्मनश्रोत्रं चक्षुस्त्वग्जिह्वाघ्राणपादप्राणा इहागत्य सुखं चि
रं तिष्ठंतु स्वाहा॥ क्षं सं हं सः॥ ह्रीं ॐ इति त्रिरावृत्य प्राणप्रतिष्ठा द्विधा २ हसौः अं आं॰ कं क्षं स्हौः इ
ति त्रिधा २ ऐं क ४ अं अरवं ऐं करस्तानं॰ कुण्डरूपिणि १८ क्लीं ह्सअ कुलस्थामृताकारा सुदृशानकरे परे
अमृतत्वं नि धेह्यस्मिन्वस्तूनि करे परसुधात्मनि॥ स्वच्छंदस्फुरणामंत्र नि धेस्व क्लीं नरूपिणि २८ सौः सर्वे
तद्रूपकेकरस्थवंस्फुत्वास्नेः चिस्फुरणं कुरु २ इति चतुर्धा॥४॥ ऐं प्लूं स्हौं जूं सः अमृत अमृतोद्भवे अमृ
तेश्वरि अमृतवर्षिणि अमृतं स्रावय २ स्वाहा इति पंचधा॥४॥ ऐं वद वद वाग्वादिनि॥ ऐं क्लीं क्लिन्ने क्लेदिनि

क्रूं हृदयमहाक्षोभं कुरु २ क्लींसौः मोक्षं कुरु ॥ ह्सौं ह्सैं इत्यष्टधा ॥ दीपिनी ॥ ५ ॥ नवधा ॥ क्लीं कृष्णाय गो
विंदाय गोपीजनवल्लभाय स्वाहा ४ ॐ श्रीं ह्रीं क्लीं ग्लौं गं स्वाहा ॥ ५ ॥ ओं ह्रीं बटुकाय ह्रीं ५ ॐ श्रीं ह्रीं
क्लीं ॐ नमो भगवति माहेश्वरि अन्नपूर्णे ममाभिलषितमन्नं देहि स्वाहा ॥ इति सकृत ४ वं धेनुमुद्रया
पात्रं स्पृष्ट्वा ४ ऐं माहात्म्यो न्या आच्छाद्य ॥ धेनुयोनिप्रदर्श्य ॥ सुधादेवीं षोडशभिः पंचभिरुपचारैः सं
पूज्य प्रणमेत् ॥ अथ शंखबंधः पूर्ववन्मंडलं तत्राधारे अग्निकलासामान्यार्घ्यं सूर्यकला सामान्यक
लशतोयेनापूर्य हेतुबिंदुं निक्षिप्य तत्र सोमकलाः पूजनं ॥ अमृतिकरणादि चतुष्टयं च कृत्वा ॥ ५ ॥
मू० अष्टभिरभिमंत्र्य ॥ दर्व्यांततोयेन समस्त उपकरणाभ्युक्षणं ॥ इति ततः श्रीगुरुवर्गी आत्म
पात्राणां मंडलं आधारे ग्निकला पात्रे सूर्यकला हेतु तीर्थेनापूरणं तत्र सोमकला पूजनं ॥ मूलाष्टकं
बालाभ्यां पादुकया बटुकेन मातृकाक्षर मनुनाभिमंत्रणं शिवरूपविभावनं इति ॥ अथ पीठपूजा

॥सो॰ क॰॥ ॥ स्वपुरतः स्थापिते पीठे पुष्पाक्षतैः पूजयेत् ॥ ४ ॥ मंमंडूकाय १ इति उत्तरबीजाभाव स्थले सर्वत्राद्यक्षरं स्क॰ २
॥ ९ ॥ सबिंदुकमादौ योजनीयं ॥ तदुपरि ४ ॥ कालाग्निरुद्राय २ तदु ४ मूलप्रकृत्यै ३ तदु ४ आधारशक्तैय ४ तदु कू
र्माय ५ तदु ॥ ४ अनंताय ६ तदु ४ वराह ७ तदंष्ट्राग्रे ॥ ४ ॥ पृथिव्यै ८ तच्चतुर्दिक्षु पश्चिमादि ॥ ४ ॥ इक्षुस
मुद्राय १ ॥ ४ मदिरास २ ॥ ४ घृतस ३ ॥ ४ दुग्धस ४ ॥ ४ मध्य ॥ ४ अक्षरं ॥ नवखंड विराजितरत्नद्वीपाय नम
तत्पूर्वादिदिक्षु तन्मध्ये च वामावर्त्तेन ॥ ४ ॐ ॐ पुष्परागरत्न १ ॥ ४ ईं अः नीलर २ ॥ ४ कं ४ वैडूर्य
रत्न ३ ॥ ४ चं ४ विद्रुमर ४ ॥ ४ टं ४ मौक्तिकर ५ ॥ ४ तं ४ गोमेदर ६ ॥ ४ पं ४ पद्मरागर ७ ॥ ४ यं ४ वज्रर
८ ॥ ४ षं ४ मरकतर ९ तदुपरि ॥ २ ॥ ४ सुवर्णपर्वताय १ तत्र ॥ नंदनोद्यानाय २ तन्मध्ये ॥ ४ कल्पवृ
क्षवाटिकायै २ तदंतः ॥ ४ वसंतादिषडृतुभ्यो ४ तत्पश्चिमे ४ इंद्रायाश्वाय ५ तत्पूर्वे ४ इंद्रायार्धगजे श्री॰
भ्यो ६ तत्र ४ विचित्ररत्नभूमिकायै ७ तत्र पूर्वादिमध्यांतं वामेन २ ॥ ४ कालचक्रेश्वर्यै १ ॥ ४ मुद्राच २ ॥ ॥ ९ ॥

मातृच॰ ३॥ देशाच ४॥ रत्नच॰ ५॥ गुरुच॰ ६॥ तत्वच॰ ७॥ ग्रहच॰ ८॥ मूर्तिर्चत्तदंतः॥ करुणातो
यपरिधाय॰ १॥ तदंतः स्वर्णप्राकारा॰ २ तन्मध्ये मणिमंडपाय॰ ॥ तन्नैरुत्यादिकोणचतुष्टयमध्येच
४॥ कालरूपिणीशक्तये॰ देशरूपिणी॰ २॥ अकाररूप॰ ३॥ शब्दरूप॰ ४॥ संगीतयोगिन्ये॰ ५ म
ध्ये ६ मणिमयवेदिकाये॰ १ तत्पृष्ठतः श्वेतछत्राय॰ २ तदुपरि रत्नसिंहासनाय॰ ३ वायव्यादिपा
दचतुष्टये॰ ४८॥ ब्रह्मणे॰ १॥ विष्णवे॰ २॥ रुद्राय॰ ३॥ ईश्वर तदुपरिसदाशिवमहाप्रेतफलकाय॰
५॥ ५ तत्रवायव्यादिकोणचतुष्टये धर्माय॰ १॥ ज्ञानाय॰ २॥ वैराग्याय॰ ३॥ ऐश्वर्याय॰ ४ पश्चिमा
दिचतुर्दिक्षु अधर्माय॰ ५॥ अज्ञानाय॰ ६॥ अवैराग्याय॰ ७॥ अनैश्वर्याय॰ ८॥ २ मध्यऊर्ध्वपरि
मायाये॰ १॥ विद्याये॰ २॥ पंचदशफणाविराजितानांजाय॰ ३ मध्यफणअष्टदलपद्मं विभाव्यतत्र पद्मा
य॰ ४॥ आनंदकंदाय॰ ५॥ संविन्नालाय॰ ६॥ प्रकृतिमयपत्रेभ्यो॰ ७॥ विकारमयकेसरेभ्यो॰ ८॥ पंचा

॥सौ०क०॥ शतवर्णाढ्यनत्वकर्णिकायै० ९ तस्यां० अंअर्कमंडलाय० ११ अंसोममंडलाय० ११ मंवह्निमंडलाय० स्कं०
॥२०॥ १२ संप्रबोधात्मने० १३ रंघ्रुत्मने रजसे० १४ तंमोहात्मने नमसे १५ आत्मने १६ अंतरात्म
ने १७ परमात्मने १८ ह्रींज्ञानात्म० १९ तत्त्वचतुर्दिक्षु मध्ये च ज्ञानतत्वा० १ मायातत्वा २ कला
तत्व० ३ विद्यातत्वा० परतत्वा ५ अष्टदलकेसरेषु मध्ये च ६ मोहिन्येन० ११ क्षोभिण्ये २ व
शिन्ये ३ स्तंभिन्ये० आकर्षिण्ये० ५ द्राविण्ये० ६ अल्हादिन्ये० ७ क्लिन्नायैः ८ क्लेदिन्यै०
९ क्लींसर्वतत्वकमलासनाय० १० इतिसंपूज्य पीठमलंकुर्यात्तु चिन्मयं ध्यायेत्॥ आत्मपूजांकला
यथा॥ आत्मानं गंधाधैरलंकृत्यशिरसि। कराभ्यां चिन्मुद्रा समधुनं कपालं च दधतींद्रुतस्वर्णप्रख्या
मरुणकुसुमालेपवसनां॥ कृपापूर्णायोगीमरुणनयनांबर्वरकचामुपेतांतिनस्थितायंत्रिकोणं विभा ॥श्री॥
व्यः तत्र अग्रादिवामावर्तनाकोणत्रयमध्ये च पूजयेत्॥ ऐंक० अग्निचक्रे कामगिरिपीठे मित्रीशनाथात्म ॥१०॥

के जाग्रद्दशाधिष्ठायके इच्छाशक्त्यात्मक रुद्रात्मक शक्ति श्रीमहाकामेश्वरीश्री· म· ११४ ह्रीं ह ५ सूर्यचक्रे जा
लंधरपीठे षष्ठीशनाशात्मके स्वप्नदशाधिष्ठायके ज्ञानशक्त्यात्मक विष्ण्वात्मशक्ति श्रीमहावज्रेश्वरी २
सौः स· ३ सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मके सुषुप्तिदशाधिष्ठायके क्रियाशक्त्यात्मक ब्रह्मा
त्मशक्ति श्रीमहाभगमालिनीश्री· ३।४।३ मू· परब्रह्मचक्रे महोड्याणपीठे चर्यानाथात्मके तुरीयदशा
धिष्ठायके शांत्याशक्त्यात्मक परब्रह्मात्मशक्ति श्रीमहात्रिपुरसुंदरीश्री· ४ तन्मध्ये· ४ ऐं क १४ महामाहेश्वरी
श्री· ११४ ऐं २ क· १४ महामहाराज्ञीश्री २।४ ऐं २ मु· महामहाशक्तिश्री· ३।४ ऐं २ मु· मं गुप्तिश्री· ४।४ ऐं २ मू· म·
ज्ञप्तिश्री· ५।४ ऐं २ मू· मं· नंदाश्री· ६।४ ऐं २ मू· मं· स्पंदाश्री· ७।४ ऐं २ मू· म· शयाश्री· ८।४ ऐं २ मू· मं· श्रीचक्रे
नगरसाम्राज्ञीश्री· ९ मूलाधारे आत्मपादुकां संतर्प्य॥ नसात्रस्छतीर्थमितरपात्रे किंचिद्दाय वामकर
गृहीतं इतरेणाङ्गुष्ठाद्यमूलाधारादिब्रह्मरंध्रांतं तडित्कोटिसमाभासां मातृकामूलत्रिमूर्तिमयीं कुंडलिनीं

स्वात्मशक्तिरूपां ध्यात्वा॥४॥ ॐ अः प्रकृत्यहंकारबुद्धिमनश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपाद

पायूपस्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्निसलिलभूम्यात्मतात्मतत्वेनाणवमलं स्थूलदेहं संयो

ज्य ४ ऐं क ४ अखंडैकरसानंदः निधेत्यकुलरूपिणि॥ ऐंकारात्मकायधर्मप्रदद्वादशकलात्मनेग्निमंडल

रूपायसत्वात्मकब्रह्मग्रंथिविदलनप्रवीणायविश्ववैश्वानरविराटस्थूलशरीररूपायवाग्भवस्थूलशरीरात्मने विश्वपुरुषात्मने प्रथमखंडनिवासाय कुंडलिनीमूलरूपाय अग्न्यात्मने स्वाहा॥ब्रह्मणइदंनम

म॥स्वात्ममूलत्रिकोणस्थे कोटिसूर्यसमप्रभे॥कुंडल्याकृतिचिद्वन्हौ हुनेद्व्यं समंत्रकं॥१॥ पुनस्तीर्था

दानं ४ कंसंमायाकलाविद्यारागकालनियतिपुरुषात्मतत्वविद्यातत्वेनकर्ममलं सूक्ष्मदेहं संयोज्य ४

क्लींह ५ अकुलस्थारूपिणि॥ क्लींकारात्मकायार्थप्रदद्वादशकलात्मनेसूर्यमंडलरूपायराजसात्मक

विष्णुग्रंथिविदलनप्रवीणायचतुर्दशेंद्रियसाम्यसाक्षिसूक्ष्मशरीररूपायलक्ष्मीनारायणसहितात्म

नेतैजसपुरुषात्मने द्वितीयखंडनिवासाय कुंडनीमध्यरूपाय मुँकुंदाय स्वाहा॥ मुकुंदायेदं। इदंताःपात्र

संभूतं शिवरूपनः॥२॥ तीर्थादानं ० यंक्षं शिवशक्तिसदाशिवेश्वरशुद्धविद्यात्मना शिवतत्वेन मायिकम

लं कारणदेहं संशोध्य ० सो॰ स॰ ३ तद्रूपकेकर॰ मयि चित्स्फुरणं कुरु॥ सोःकारात्मकारात्मकायकामप्रदल

षोडशकलात्मने सोममंडलरूपाय लाम। सात्मकरुद्रग्रंथिविदलन प्रवीणायाव्याजसव्याहृतकारण

शरीररूपाय विद्याशंकरसहितात्मने प्राज्ञपुरुषात्मने। तृतीयखंडनिवासाय कुंडलिनीशिखांतर्द्योत

मानभद्रमूर्तये पशुपतये स्वाहा॥ पशुपतये इदं। प्रकाशाकाशहस्ताभ्याम॰ जुहोम्यहं ३ प्रक्षालिते पात्रे ती

र्थादानं ० अंक्षं प्रकृत्यहंकारबुद्धिमनश्श्रोत्रत्वक्चक्षुर्जिव्हाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरू

परसगंधाकाशवायव्यग्निसलिलभूमिमायाकलाविद्यारागकालनियतिपुरुषशिवशक्तिशक्तिसदाशि

वेश्वरशुद्धविद्यात्मनात्मविद्याशिवतत्वेन णावकार्ममायिकमलं शरीरत्रयं संशोध्य ० ऐंक ० अखंडैकक्षणि०

ह्रीं ह ५ अकुल॰ पिणि २ सौः स ३ लङु॰ कुरु ३ कारात्मकाय धर्मार्थकामप्रदाय त्रिंशत्कलात्मने ग्नि सूर्यसोम
मंडलरूपाय सत्वराजसतामसात्मकग्रंथित्रयविदलनप्रवीणाय विश्ववैश्वानरविराट्चतुर्दशोंद्वियसाम्य
साक्ष्यव्याजसव्याकृतशरीरत्रयरूपाय वाणीवल्लभलक्ष्मीनारायणविद्याशंकरसहितात्मने विश्वतैजसप्रा
ज्ञपुरुषात्मने खंडत्रयनिवासाय कुंडलीमूलमध्यावसानरूपाय सदाशिवाय स्वाहा॥ सदाशिवायेदं॥ अंतरनि
रंतरनिध॰ शिवावसानं॥१॥ धर्माधर्म हविर्दीप्तो आत्माग्नो मनसा स्रुचा सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहो
मि स्वाहा॥२॥ प्रक्षालित पात्रि आत्मपात्रस्थित संपूर्णतीर्थादानं॥२॥ आद्र्ज्व॰ जुहोमि स्वाहा २ हिरण्य॰
तेजो दधाति॥ इति पूर्णपात्रं स्वात्मिरुस्य अलिपिशितपुरंध्रीभोगपूजापरोहं बहुविधकुलमार्गारंभस
धावितोहं॥ पशुजनविमुखोहं रवीपाम्निसभामाश्रितोहं गुरुचरतोहं भैरवोहं शिवोहं इति पूर्णमात्मानं ध्या
त्वा पात्रं प्रक्षाल्य पुष्पादियुतं संस्थाप्य नत्वा समण्यमारभेत्॥ यथाशिरासि त्रिखंडामुद्रां बध्वा महापादुका

मामृश्य ब्रह्मरंध्रस्थश्रीगुरुनाथात्मकपरशिवाभिन्नमात्मानं ध्यायन्॥ निरालंबमुद्रां क्षणं बध्वा पंचपू
जां कृत्वा गुरुमुद्राः प्रदर्श्य श्रीगुरुदक्षिणामूर्तिभक्तानुग्रहकारक अनुज्ञां॥ देहि भगवन् श्रीचक्रयजनो
द्यमे। इत्यनुज्ञां प्रार्थ्य मूलऋष्यादिध्यानांतं। मूलेन दशदिक्षु तं व्यापकं विन्यस्य। विश्वामित्रं मातृकामय
मूलविद्यारूपमात्मानं विभावयन् क्षणं विश्रम्य। स्वसंप्रदायानुरोधेनांतःपूजां विधाय अंजलौ पुष्पा
ण्यादाय॥ १॥ चतुर्भुजे चंद्रकलावतंसे॥ १॥ इति श्रीचक्रे बिंदुस्थाने पंचब्रह्ममयमंचासीनसमा
नोकार कामेश्वरांके मूर्तिं ध्यात्वा मूलाधारात् ब्रह्मरंध्रे सदाशिवाख्ये चंद्रमंडले षट्चक्रभेद
क्रमेणानुप्रविष्टां कुंडलिनीं तदेकीभूतां चिरं विभाव्य तदुभयं परप्रकाशैकरूपं ध्यात्वा १ ऐं ह्रीं
श्रीं श्रीमहात्रिपुरसुंदरी॥ ४ महापद्मवनांतस्थे कारणानंदविग्रहे। सर्वभूतहिते मातरेह्येहि परमेश्व
रि॥ एह्येहि वरदे देवि त्रिपुरे देवि पूजिते परमामृतप्रिये शीघ्रं सान्निध्यं कुरु सिद्धिदे॥ देवि शिभ

क्तसुलभेसर्वावरणसंवृते॥यावत्वांपूजयिष्यामितावत्वंसुस्थिराभव॥इतिनासाध्वनाकरस्थपुष्प
संयुक्तंतेजोऽध्यात्वातपुष्पाणिकल्पितश्रीचक्रमध्यस्तमूर्तिमूर्ध्निनिक्षिप्यअंतःपूजितांदेवींते
जोमयींबहिःकल्पितमूर्तिप्रविष्टांपूर्वोक्तकामेश्वरांकनिलयांसावयवानूध्यायन्॥४॥स॰३श्री
महात्रिपुरसुंदरिइहावाहिताभव॥१॥४सः३श्रीमहात्रिपुरसुंदरिइहतिष्ठतिष्ठ॥२॥४स॰३श्रीम
हासन्निधेहि॥३॥४सः३श्रीमहासन्निरुद्धस्व॥४॥४स॰३श्रीमहा॰हावगुंठिताभव॥५॥इतितत
न्मुद्रांप्रदर्श्यबालबीजत्रयणदेवतांगेषुषडंगन्यासकरणेनतांसंकलीकृत्य।अमृतीकृत्य४क॰
१४दीपिनीह्सौः॥अं॰क्षंइतिशंखतोयेनदेवींत्रिःप्रोक्ष्य।४श्रीं-ह्रींक्लींहंगणपकालिकेसौःस॰३क्लीं
ब्लूं-ह्रींश्रींइतिसंजीवनीविद्यायादेवताहृदिस्पृशन्जीवंनिवेश्यदेवताहृयंस्पृशन्पूर्वोक्तमनु
नाप्राणप्रतिष्ठांकुर्यात्।अयंचात्रोहः।कलशसहितसुधादेविपदरक्षानेअमृतीसहितमहात्रिपुर

सुंदरीतिद्रांसर्वसंक्षोभिणीमुद्रांप्रदर्शयामि ॥१॥ ह्रींसर्वविद्राविणीमुद्रा ॥२॥ क्लींसर्वाकर्षिणी
मु ॥३॥ ब्लूंस॰ वशंकरीमु॰ ॥४॥ सःसर्वोन्मादिनिमु॰ ॥५॥ क्रोंसःमहांकुशामु॰ ॥६॥ ह्स्ख्फ्रेंस॰ खेचरी
मु॰ ॥७॥ ह्सौःस॰ बीजमु॰ ॥८॥ ऐंसयोनिमु॰ ॥९॥ आंह्रींपाशमु॰ ॥१०॥ क्रोंक्रोंअंकुशमु॰ ॥११॥ धंधंध
नुर्मु॰ ॥१२॥ द्रांद्रींक्लींब्लूंयांद्रांलंवांसांबाणमु॰ ॥ इतित्रयोदशमुद्राःप्रदर्श्य॰ ॥ क॰ ॥ महात्रिपुरसुंदरी
पादुकांपूजयामिनमः इतित्रिःपुष्पांजलिंदत्वा ॥ मू॰ ३महात्रि॰ कांपूजयामितर्पयामिनमः इतित्रि
वारदेवतांपूर्ववत्पुष्पाक्षतैःश्रीपात्रतीर्थलेशैःसंतर्प्य ॥ मू॰ महात्रिपुरसुंदर्य्यैनवरत्नखचितसिं
हासनंकल्पयामिनमः ॥ इतिसर्वत्रउपचारेषुतत्तद्द्रव्यैरलाभेपुष्पाक्षतैर्भावयेत्पूजयेत् ॥१३॥ मू॰
स्वागतं २ गंधपुष्पाक्षतयोरत्नदूर्वायुक्ततोयेर्हस्तयोरर्घ्यंगंधतोयेपादयो॰ पाद्यंएलोशीरकर्पूर
युक्ततोयेमुखेआचमनंघृतमधुदधिफलेमुखेमधुपर्क॰ अर्घ्य॰ ३पाद्यं॰ ॥ आचमनीयं॰ ५मधुप

॥सो॰ क॰॥
॥१४॥

के पुनराचमनीयं ७ ॥ मू॰ मं॰ रापादुके परिधायांबत्रिपुरे देवनिर्मिते स्नानमंडपमायाहि स्नानार्थं श
क्रादिमंगलस्नानमंडपप्रवेशं ८ स्नानवस्त्रपरिधानं ९ ॥ रत्नासनोपवेशनं १० ॥ कर्पूरशकलैर्दंत
धावनं ११ सुगंधिजलैर्गंडूषणं १२ ॥ शुद्धजलेन मुखप्रक्षालनं १३ आचमनीयं १४ ॥ मुखप्रोंछ
नं १५ ॥ सुगंधितैलामलकादिस्नानीयद्रव्याणि १६ महोपचाराभ्यंगं १७ सुगंधिद्रव्यैः केशशो
धनं १८ अंगोद्वर्तनं १९ उष्णोदकस्नानं २० पंचामृतफलादिस्नानं २१ वैदिकतांत्रिकमंत्रितेक्षुर
सनारिकेलजलफनसाम्रादिविविधफलरसकर्पूरादिसुवासितदेवांगनाहूतनानातीर्थजल
पूर्णसुवर्णकलशैः स्नानं २२ आचमनीयं २३ स्वच्छवस्त्रेण केशांगमार्जनं २४ नवरत्नशोभितबृ
हस्पतिवेषतरक्तदुकूलं २५ उत्तरीयं २६ आचमनीयं २७ सुवर्णरचितविष्णुदेवतयज्ञोपवीतं २८
अलंकारमंडपप्रवेशनं २९ रत्नासनोपवेशनं ३० मुकुटललाटाभरणकर्णपूरहारग्रैवेयकांगुलि॰

स्क॰ २

॥श्री॰॥
॥१४॥

यकप्रत्नं विकाररत्नसत्राक्षरावलीकर्णकंकणपार्श्वभूषणनरवघोत्तांगुलिभूदकूरत्नंवार्थहारमृदु

भाररत्नउत्तंतिकांगदकेयूरवलयबाहुरेष्टकसीमंतिकगंडभूषणभ्रूभूषणनाभिभूषणरत्नमाला

मणिमेखलाश्मखल्ला दंतरत्नकर्बणिकनीवीररत्नजानुभूषणपादांगुलीयकनूपुरतूच्छकपादक

टकहंसकक्षुद्रघंटिकामुखपत्रकचूडारत्नताटंकनानाविधभूषणैरलंकरणं ३१ पादुका

युगमारुह्य पंचवाद्यपुरःसरं यागमंडपमायाहि परिवारजनेसहयागमंडपप्रवेशं ३२ कामेश्व

रांकोपवेश: ३३ कर्पूरागरुकस्तूरीकुंकुमगोरोचनाद्यष्टगंधेविष्णुदेवतंगंधं: ३४ अक्षतं ३५

पुष्पाणि ३६ क्लींसुरभितेजसेस्वाहा वनस्पतिरसोद्भूतोगंधाढ्योगंधउत्तमः॥ आघ्रेयःसर्वदे

वानांधूपोयंप्रतिगृह्यतां॥ गंधर्वदेवतंधूपं ३७ सुप्रकाशोमहादीपःसर्वत्रतिमिरापहःस

बाह्याभ्यंतरंज्योतिर्दीपोयंप्रतिगृह्यतांविष्णुदेवतंदीपं ३८ देव्यग्रेपात्रस्यासनयोर्मध्येपू

र्यिन्मं इत्थं कृत्वा तत्राधारे नैवेद्यपात्रं विविधभक्ष्यभोज्ययुतं संस्थाप्यमू॰ वीक्ष्य॰ ११ फट्
इति प्रोक्ष्य २१ फडिति पुष्पेण संताडय ३१ हुं इति प्रोक्ष्य ४१ ॐ जूं सः वौषट् इति शंखतो
येन प्रोक्ष्य। चक्रं प्रदर्श्य। ११ यं रं तं जपन्नैवेद्यगतदोषस्य शोषणदाहनेन नैवेद्यस्य चामृती
करणं विभाव्य॰ मू॰ श्रीतीर्थेन प्रोक्ष्य अमृतीकरण निर्विषीकरणे कृत्य॥ विष्णुदेवतायै नै
वेद्याय नमः॥ इति नैवेद्योपरि पुष्पान्निधाय॰ १स॰ ३ श्रीं कामदुघे अमोघवरदे विच्चे स्फुर॰
२ श्रीं श्रीं श्रीं स्वाहा ह्रीं ॐ ह॰ १ इति कामधेनुविद्ययाभिमंत्र्य कर॰ पाद्यं ३९ १३ राचमनीयं॰ ४०१॰
सांगायुधपरिवारायै सर्वात्मिकायै नैवेद्यं १॥ अमृतोपस्तरणमसी स्वाहा इति देवी दक्षहस्ते
उदकं समर्प्य वामकरेण दक्षकरांगुष्ठानामाकनिष्ठयोस्तर्जनीमध्यमयोर्मध्यमानामयोर्म
ध्यानामाकनिष्ठान्यतर्जन्यादि चतुर्णां योगः इति प्राणादिमुद्रापंचकं प्रदर्शयन्निवेदयेत्॥ १॥

ऐं ॐ प्राणायस्वाहा।१।४ क्लीं ॐ अपानाय·२।४ सौः ॐ व्यानाय·३।४ ऐं क्लीं सौः ॐ उदानायस्वा
हा ४।४।२ ॐ समानाय·५ कृतांजलिः ४।४ ऐं आत्मतत्त्वव्यापिकाश्रीमहात्रिपुरसुंदरीतृप्यतु
क्लीं विधातत्त्वव्या·४ सौः शिवतत्त्वंव्या·४।२ सर्वतत्त्वव्या·७ चित्पात्रेसद्धविःसौख्यंविविधानेकभ
क्षणं॥निवेदयामितेदेविसानुगायैजुषाणतत्।४२ इतिप्रार्थ्यदेताभुजामोक्षणं ध्यात्वा·ध्यानं
शालयाम्·दशाधाप्रजव्यसमर्ण्य·४३ मातःसुवर्णपात्रस्थंकर्पूरादिसुवासितंजलंसुशीतलंस्वच्छं
गृहाणपरमेश्वरी।मध्येपानीयं·४४ अमृतापिधानमसिस्वाहेत्युत्तरापोशनंदेवीहस्ते·हस्तप्र
क्षालनं·४५ सुगंधिद्रव्यैःकरोद्वर्तनं·४६ गंडूषणं·४७ पादप्रक्षालनं·४८ आचमनीयं·४९ फलं·५·
तांबूलकर्पूरपूगभागतरंगितं॥संशोधितंसुगंधाढ्यंतांबूलंप्रतिगृह्यतां॥तांबूलं५११४ श्रीम
हात्रि·श्रीपादुकांपू·नमइतिपुष्पांजलिंदत्वाक्लींनमस्कारः॥अथावरणपूजा॥कृतांजलिःसंवि

न्मयेमृशादेवि परामृतचरुप्रिये॥ अनुज्ञां त्रिपुरे देहि परिवारार्चनाय मे॥ इत्यनुज्ञां प्रार्थ्य॥ श्रीपात्रात् मू॰
श्रीमहात्रि॰ रि॰ पादु॰ म॰ इति बिंदुचक्रे त्रिः संतर्प्य। सर्वावरणदेवताः स्वास्वदेवतामित्राः मूलदेवस्याभिमु
खाः ध्यायन् तर्पयेत्॥ सर्वत्र मूलदेवतातर्पणं श्रीपात्रादिति ज्ञेयं। ततः प्रतिपदादि पर्वांत पंचदशति
थिषु पंचदश नित्याः शुक्लपक्षे कामेश्वर्यादि चित्रांताः कृष्णपक्षे चित्रादि कामेश्वर्यंताः॥ क्षयतिथौ नि
त्याद्वयं वृद्धौ एकां नित्यां दिनद्वये ह्युदयव्यापिनीतिथिं ज्ञात्वा ततत्तिथिनित्या अष्टांगक्रमतः प्रासां दिन
नित्यामपि। मू॰ देव्यां पूजयेत्। ततः नित्यामंडलं त्रिकोणं वामरेखाग्रमारभ्य दक्षकरेणाग्रांतं कोणानि
परित्यज्य स्थिताः एंक्रै करेखायां पंचकं पंचकं पूर्वोक्तक्रमेण पात्रांतरगृहीतश्रीपात्रतीर्थेन तर्पयेत् मूल
देवीसमानाकाराभरणायुधावसानाः ध्यात्वा ४ अं ३ ॐ नमः कामेश्वरी इच्छाकामफलप्रदे सर्वसत्व
वशंकरी सर्वजगत्क्षोभणकरि हुं हुं हुं द्रां द्रीं क्लीं ब्लूं सः सौः क्लीं ऐं ५ कामेश्वरि नित्या श्रीपा॰ म॰ ११ ॐ

ऐं भगभुगे भगिनी भगोदरी भगांगे भगमाले भगावहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशंकरि भगरू
पे नित्यक्लिन्ने भगस्वरूपे सर्वभगानि मे ह्यानय नन रद रेते सुरेते भगक्लिन्ने क्लिन्न द्रवे क्लेदय द्रावय सर्वसर्वसत्वा
नु भगेश्वरि अमोघे भगविन्ने क्षुभ क्षोभय सर्वसत्वानु भगेश्वरि ऐं ब्लूं जं ब्लूं भें ब्लूं हिं ब्लूं हें क्लिन्ने सर्वाणि भगानि
वशमानय स्त्रीं हक्लें ह्रीं ११५ भगमालिनि नि० २१ ॐ ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा ॥१३॥ नित्यक्लिन्नानित्या ३१
ई ॐ क्रों भ्रों क्रों च्रों छ्रों ज्रों झ्रों स्वाहा ६ भेरुंडानि १११ ॐ ह्रीं वह्निवासिन्यै वह्निनिनि ५१४ ॐ ॐ ह्रीं स्क्लें
सः नित्यक्लिन्ने मदद्रवे स्वाहा १६ महाविद्येश्वरीनि० ६१६ ॐ ह्रीं शिवदूत्यै नमः ७ शिवदूतिनि ७१७ ॐ
ॐ ह्रीं हुं खेचछक्षः स्त्रीं हुं क्षें ह्रीं फट् ११ त्वरितानि० ८१८ ॐ ह्रीं कुलसुंदरीनि० ९१९ ॐ ह क्लें ड
ह्ल क्लं रडोहस्क्लें दोः ध्रां ध्रीं क्ष्रीं क्ष्रूं सः स्नौः क्लीं ऐं ११ नित्यानि० १०१० ऐं ॐ ह्रीं फ्रें स्त्रूं आं ह्रीं क्रों नित्यमद
द्रवे हुं क्रों १५ नीलपताकानित्या० ११११ ऐं भमरय औं ॐ १ विजयानि० १२१२ ॐ स्वौं सर्वमंगलायै०

२ सर्वमंगलशानि १३।४ ॐ ऊँ नमोभगवति ज्वालामालिनि देवदेवि सर्वभूतसंहारिके जातवेदसि
ज्वलंती ज्वल प्रज्वल २ हुं ३ रं ३ हुं फट् स्वाहा ११३ ज्वालामालिनि नि॰ १४।४ ॐ क्लौं चित्रायै॰ चित्रानि
१५ विंदो॰ ४ अः मू॰ त्रिपुरसुंदरीमहानित्या॰ ४ अः ह १२ महासप्तदशीकलानी तानि॰। इतिनित्यामंड
लं संतर्प्य। ४ मू॰ त्रि॰ कोणाष्टकोणयोः पूर्वांतरासमस्तप्रकटगुप्तरसंप्रदाय गुप्तोत्तीर्णनिगर्भरह
स्यातिरहस्यपरापरारहस्ययोगिनी श्रीचक्रपादुकाभ्यो॰। इतियोगिनीसमष्टिविषया पुष्पांज
लिं दत्वा॥ पुनः चतुरस्त्रत्रये। ४ अं आं सौः त्रैलोक्यमोहनचक्राय॰ इतिपुष्पांज॰ ४ चतुरस्राद्यरेखा
यै नमः इति पुष्पां॰ शुक्लात्मकाद्यरेखायां अंकुशपाशपद्मद्वयकराः रक्तवर्णाः वस्त्राभरणाशाशिशे
खराः ध्यात्वा। पश्चिमादिचतुर्दिक्षु द्वारदक्षे। ४ अं अणिमासिद्धिश्रीपा॰ म॰ः १।४ लं लं घिमासि॰ २।४
मं महिमासि॰ ३।४ ईं ईशित्वासि ४ वायव्यादिकोणचतुष्टये॰ ४ वं वशित्वसि॰ ५।४ प्रां प्राकाम्यसि
६।४

भुंभुक्तिसि·७।४ इंइच्छासि·८।१पश्चिमनिर्ऋतिमध्ये ४ प्रांप्राप्तिसि·९ पूर्वेशानमध्ये·४ सं सर्वकामसि·१०।४ चतुरस्रमध्यरेखायै नमः इति पुष्पं· रक्ताकारमध्यरेखायां। पूर्ववदष्टदिक्षु रक्तोत्पलयुग्मं कपालयुग्मं चदधानानीलवर्णवस्त्राभरणाः ध्यात्वा द्वारवामे।४ आं ब्रां ब्राह्मीश्रीपा·१।४ ईं माहेश्वरीश्री·२।४ ऊं कौमारीश्री·३।४ ॠं वैष्णवीश्री·४।४ ॡं वाराहीश्री·५।४ ऐं माहेंद्रीश्री·६।४ औं चामुंडाश्री·७।४ अः महालक्ष्मीश्री ८ अंतश्चतुरस्ररेखायै इति पुष्पं पीताकार तृतीयरेखायां पूर्वविदिक्षु अंकुशपाशौ अधोहस्तविरचितस्वस्वमुद्राः रक्तवस्त्रादिकाः ध्यात्वा द्वारेषु मध्ये ४ द्रां सर्वसंक्षोभिणीमुद्राश्री·१।४ द्रीं सर्वविद्राविणीमु·२।४ क्लीं सर्वाकर्षिणीमु·३।४ ब्लूं सर्ववशंकरीमुद्रा ४।४ सः सर्वोन्मादिनिमु·५।४ क्रों सर्वमहांकुशामु·६।४ ह्स्ख्फ्रें हक्लीं ह्सौः सर्वत्रिखंडामु·७।४ ह्सौः सर्वबीजामु·८।४ ह्स्रैं सर्वखेचरीमु·९।४ ऐं सर्वयोनिमु·१० आराममासि ध्यात्वा ४ आं अं सौः त्रिपुराचक्रेश्वरीश्री। चक्रेश्वरीश्रीवामे ४ द्रां सर्वक्षोभिणीमुद्रा

श्री॰। द्रं॑ - अं अणिमा सिद्धिश्री॰। पुरतः ४ प्रकटयोगिनीश्री॰। द्रां सर्वसंक्षोभिणीमुद्रां प्रदर्शयामि नमः प्रदर्श्य। गं
धाद्यन्वितसामान्यार्घ्योदकं गृहीत्वा ४ एताः प्रकटयोगिन्यः त्रैलोक्यमोहनचक्रे समुद्राः ससिद्धयः सायु
धाः सवाहनाः सपरिवाराः संपूजिताः संतर्पिताः संतु इति चक्रेश्वरीवामहस्ते समर्प्य। ४ मू॰ महात्रिपुरसुंदरी
पादु॰ त्रिः संतर्प्य॰। पुष्पांजलीमादाय ४ मू॰ महात्रिपुरसुंदरी। अभीष्टसिद्धिं मे देहि शरणागतवत्सले। भक्त्या
समर्पये तुभ्यं प्रथमावरणार्चनं ॥ इति मूलदेविचरणयोर्दत्वा ॥४॥ प्रकटयोगिनीमयूखायै श्री महात्रिपुरसुं
दर्यैः इति योनिमुद्रया प्रणमेत्॰। इति प्रथमावरणं ॥ ॥४॥ ऐं क्लीं सौः सर्वाशापरिपूरकचक्राय॰ इति षोड
शदले पुष्पांजलिं दत्वा। पश्चिमदलमारभ्य वामावर्त्तेन चंद्रनिभे षोडशदले। अंकुशपाशामृतपूर्णस्फटिक
कलशावशंकितकरा॰ शुक्लवर्णाः ध्यात्वा॰॥४॥ अं कामाकर्षिणी नित्याकलाश्री॰ १।४ आं बुध्याक॰ २।४ इं अ
हंकाराक॰ ३।४ ईं शब्दाक॰ ४।४ उं स्पर्शाक॰ ५।४ ऊं रूपाक॰ ६।४ ऋं रसाक॰ ७।४ ॠं गंधाक॰ ८।४ लृं चित्ताक॰ ९।४

लूंधे यांक·१०।४ ऐंस्मृत्यांक·११।४ ऐंनामांक·१२।४ ॐ बीजांक·१३।४ औंआत्मांक·१४।४ अंअमृतांक·१५।४ अः
शरीरांक·१६ कामाकर्षिण्यग्रे।४ ऐंक्लींसौः त्रिपुरेश्वरिचक्रेश्वरि·वामे·४ द्रींसर्वविद्राविणीमु·।दक्षे४ लघिमासि
।पुरतः४ गुप्तयोगिनीश्री·द्रींसर्वविद्राविणीमु·प्रदर्शयामि·।गंधाद्युदकं गृहीत्वा।४ एताः गुप्तयोगिन्यः सर्वाशा
परिपूरकचक्रेसमुद्राः संतु इति चक्रेश्वरीवामहस्तेसमर्प्य।मु·महात्रि·त्रिः संतर्प्य।पुष्पांजलीमादाय।मु·म
हात्रिपुर·रि अभीष्ट·द्वितीयावरणार्चनं।४ मू·या।४ गुप्तयो·मेत इतिद्वितीयावरणं॥४ हींक्लींसौः सर्वसंक्षो
भणचक्राय·इत्यष्टदलेपुष्पांज·जपाकुसुमप्रभेष्टदले अंकुशपाशनीलरत्नकल्हारनीलोत्पलकराः रक्त
वर्णादिकादिध्यात्वा·पूर्वादिचतुर्दलेषु४ कं·डंअनंगकुसुमाश्री·१।४ चं·ञंअ·मेखलाश्री·२।४ टंणंअ·मदना
श्री·३।४ तंनंअ·मदनातुराश्री·४ आग्नेयादिदलचतुष्टये४ पं·मंअ·रेखाश्री·५।४ यं·वंअ·वेगिनीश्री·६।४
शं·हं·अक्षं अंकुशाश्री·७।४ ळं·क्षंअ·मालिनीश्री·८ अनंगकुसुमाग्रे।४ हींक्लींसौः त्रिपुरसुंदरीचक्रेश्व·वा

मे।४ क्लीं सर्वाकर्षिणीमु॰ श्री॰ दक्षमहिमासिद्धिमहापुरतः॰ गुप्ततरयोगिनी श्री॰ ॰ क्लीं सर्वाकर्षिणीमुद्रां
प्रद॰ गंधाद्युदकं गृहीत्वा ४ एताः गुप्ततरयोगिन्यः सर्वसंक्षोभणचक्रे समुद्राः संतु॰ इतिचक्रेश्वरीह
स्तेसमर्प्य॰ मू॰ महात्रि॰ त्रिः संतर्प्य। पुष्पांजलीमादाय। मु महात्रि॰ रि अभीष्ट॰ तृतीयाचरणार्चनं॥३॥
मूलदे॰ दत्वा।।४। गुप्ततरयोगि॰ मनू इति तृतीयावरणं॥ हैं क्लीं ह्सौः सर्वसौभाग्यदायकचक्राय॰ इति
मनुकोणे पुष्पांज॰ देव्य ग्रमारभ्यवामावर्तेन॰। दाडिमकुसुमप्रभेचतुर्दशारे अंकुशपाशदर्पणामृत
भरितनवरत्नपात्रकरारक्तवर्णादिका दिध्यात्वा॰।४ कं सर्वसंक्षोभिणीशक्तिः श्री॰ १॰ खं सर्वविद्रा
विणीशक्तिः २॰ गं सर्वाकर्षिणीशक्तिः ३॰ घं सर्वाल्हादिनीश॰ ४।४ ङं॰ स॰ संमोहिनीश॰ ५॰ चं स॰ स्तंभिनी
श॰ ६॰ छं॰ स॰ जृंभिणीश॰ ७॰ जं॰ स॰ वशंकरीश॰ ८॰ झं सं॰ रंजिनीश॰ ९।४ ञं सर्वोन्मादिनीश॰ १॰
टं सर्वार्थसाधिनीश॰ ११॰ ठं सर्वसंपत्तिपूरणीश॰ २॰ डं॰ स॰ मंत्रमयीश॰ ३॰ ढं॰ स॰ र्वद्वंद्वक्षयंकरीश॰

१८ सर्वसंक्षोभिण्यग्रे ४ हैं ह्क्लीं ह्सौः त्रिपुरवासिनी चक्रेश्व० वामे ४ द्रूं सर्ववशंकरी मु० श्रीदक्षे ४ ईशित्व
सिद्धिश्रीपुरतः ४ संप्रदाययोगि० द्रूं सर्ववशंकरी मु० प्रदर्श्य गंधाद्युदकं गृहीत्वा ४ एताः संप्रदाययोगि
न्यः सर्वसौभाग्यदायकचक्रे समुद्राः संतु० इति चक्रेश्वरी हस्ते समर्प्य ० मू० महात्रि० त्रिः संतर्प्य० पुष्पां
जलीमादाय ४ मू० महात्रिरी० अभीष्ट चतुर्थावरणार्चनं० इति मूलदे० ईत्वा० ४ संप्रदाययो० ४ मेत इति
चतुर्थावरणं ४ हैं ह्क्लीं ह्सौः सर्वार्थसाधकचक्राय० इति त्र्यंदशकोणेषु पुष्पां० दव्यग्रमारभ्य वामा
वर्तेन सिंदूराभ दशारे अंकुशपाशोर्ध्वहस्ताभूषापेटिविलसरधोहस्ताः शुभ्रवर्णादिकाः ध्यात्वा ४
णं सर्वसिद्धिप्रदादेविश्री० १।१८ तं स० सपत्प्रदे० २।१८ थं० स० प्रियंकरीदे० ३।१८ दं० स० मं० गलकारिणीदे० ४।१८
धं० स० कामप्रदादे० ५।१८ नं० स० दुःखविमोचनीदे० ६।१८ पं० स० मृत्युप्रशमनीदे० ७।१८ फं० स० विघ्नवि
नाशनीदे० ८।१८ बं सर्वांगसुंदरीदे० ९।१८ भं० स० सौभाग्यदायिनीदे० १०।१८ सर्वसिद्धिप्रदाश्रे ४ ह्सैं ह्क्लीं

॥सौ॰ क॰॥
॥२०॥

ह्सौः त्रिपुराश्रीचक्रेश्वरी श्री॰ वामे।४ सः सर्वोन्मादिनी मु॰ श्री दक्षे॰४ वशित्वासिद्धि श्री॰ पुरतः॰४ कुलो
त्तीर्णयोगिनी॰ सं सर्वोन्मादिनीमुद्राप्रद॰ गंधाद्युदकं गृहीत्वा ४ एताः कुलोत्तीर्णयोगिन्यः सर्वार्थसा
धक चक्रे समुद्राः सं सिद्धिः चक्रेश्वरीहस्ते समर्प्य॥ मू॰ त्रिः त्रिः सतर्प्य पुष्पांजलीमादाय मू॰ अभीष्ट॰ पंच
मावरणार्चनं॥ इति मूलदे॰ ईत्वा॥४ कुलोत्तीर्णयोगिनीमयूखाये: मन्तु। इति पंचमावरणं॥ ॥४॥ ह्रीं
क्लीं ब्लें सर्वरक्षाकरचक्राः। इत्यंतर्दशाकोणे पुष्पां॰ देव्यग्रमारभ्य वामावर्त्तेन। जपाकुसुमनिभे दशारे टंक
समीपेउपवेश्यगुरुपारंपर्यातमुपदिश्यन्यासादिपंचमुद्राप्रदर्शनांतंकारयित्वासंघ१मुद्रामुपदिश्यदृष्टिबं
१२ धंकृत्वासंघटमुद्राविन्यासपूर्वकंमहापादुकामुपदिश्यदृष्टिबंधंविसृज्यजवशिष्टंमहावाक्यांतमुपदिश्यानि
पंचपंचिकाःसमयदेवतागायत्र्यश्चक्रेश्वर्यःसंजीवनिदीपीनीमंतःपूजाक्रमंसर्वसंक्षोभणादित्रयोदशशंखा
१० - षोडशमुद्राश्चोपदिश्यदृष्टिबंधंविधायमहाषोडशीमुपलक्षयेत्॥ ततोदृष्टिबंधंविसृज्यगुरुजेष्ठान्गुरुस्व श्री
ज्येष्ठांश्चक्रमेणनत्वाकृतकृसमासानंज्ञात्वायथाशक्त्यागुरुंपूजयेत्॥ ततोगुरुरुपासकधर्माणुपदिशेत्॥दे
वतापासनाभक्त्यावर्तितव्यंप्रयत्नतः॥देवतावद्गुरौशास्त्रेश्रद्धायोषित्सुनाप्रियं॥ आचारगोपनंतृष्णाहीन १२
तानुष्ठितिर्विधेः॥देवतार्थंचसर्वस्वमेतधर्माष्टकंभवेतदिति॥ ततःब्राह्मणंचसदस्यंचदक्षिणाभिस्त
तोषयेत्॥ प्रणमेत॥ ततोगुरुःसामयिकांक्रमेणसंपूज्यशिष्यस्यतत्पात्रतीर्थेनमूर्ध्निआदिनाथादिगुरु
तर्पणांतहृदिदेवतातर्पणांतंकारयित्वाशिष्यस्यविःमर्पणांतेनैवस्पर्शयित्वातदंगमातृकाद्यक्षरंक्षक्षरं।

अक्षरं चतुरक्षरं वा पुंसामानंदनाथां स्त्रीणां अंबांतं नाम्ना त्वं अमुकोसीति नाम कुर्यात्॥ ततः तेन नाम्ना आ
त्मपादुकां तर्पयित्वा तस्माद्दीक्षितायेशक्त्येसमर्प्यवस्त्राभरणादिभिः तां संपूज्य॥ शेषं गृहीत्वा यथासंप्रदायं
गुरवे समर्प्य पूर्णपात्रांतं हुत्वा पात्रं प्रक्षाल्य सुवर्णरौप्यादि भरितं पात्रं गुरवे समर्प्य प्रणम्य सामयिकान् यथा
क्रमं वस्त्राभरणभोजनदक्षिणादिभिः संतोष्य नमस्कुर्यादिति ततः पूजासमाप्तं देवतायै कर्म समर्प्य नवा
यथासुखं विहरेदिति शिवं॥ अथ मंत्रदीक्षाप्रकारः॥ पूर्ववत्सामग्रीं संपाद्य वेदिकायां श्रीयंत्रं सिंदूररजसा नि
र्मायतत्तन्मध्ये महाकलशं पश्चिमाग्रं दिक्कलशाष्टकं पूर्ववत्संस्थाप्य तेषु वशिन्याद्यष्टकं मध्ये षोडशीं तत्पु
रतः सौभाग्यविद्यां तद्दक्षिणे बालां वामतो महागणपतिं षोडशी दक्ष वामयो मंत्रिणीं दंडिनीं पृष्ठतस्तिरस्करिणीं
षोडशी परितः वामावर्तेन त्रिकोणाकारेण नित्यामंडलं च तत्तन्मंत्रेण संपूज्य कलशनवके तत्तन्मंत्रमष्टधा
जपेत्॥ मध्यकलशे सौभाग्यविद्यां बालां महागणपतिं मंत्रिणीं दंडिनीं तिरस्कृतिं पंचदश नित्याः चक्रेश्वरीः
चतुस्समयदेवताः पंचपंचिकाः नवमुद्राः गुरुत्रयं कुलकामधेनुं तुरीयां वज्रेश्वरीं तुरीयसमयदेवतां मं
नपूर्णां अमृतेश्वरीं संजीविनीं बटुकं पूर्तिविद्यां कामराजं दीपदीपिनीं च सकृत् प्रजप्या श्वशो धनरहि

तां होमांतं समाप्य नवभिः कलशैः वशिन्यादिमंत्रैः षोडशीं च प्रजपन् अभिषिच्य उक्तमंत्रानुपदिश्य नाम करणा-
दित्तं शेषं समापयेत्॥ संकल्पे पूर्णपादाभावः॥ श्रीचक्रमंडलाय नम इति मंडलपूजा॥ पंचपल्लवेन सोमलता-
भावः॥ पादुका होमाभावः॥ द्वितीयदिने शिष्याह्वान प्रार्थना वर्णदीक्षाभावः॥ इति मंत्रदीक्षा॥ अथ मंत्रग्रहण
प्रकारः॥ तत्रादौ शिष्यः वस्त्राभरणदक्षिणाफलादिकं गृहीत्वा गुरुं प्रणम्य प्रार्थयेत्॥ ततः गुरुस्तद्यंत्रे वा क-
लशे वा मस्य मंत्रस्योपदेशः कर्तव्यः स्तद्देवतां संपूज्योपदिशेत्॥ ततः शिष्यः यथाशक्त्या संपूज्य प्रणमेत्॥
इति अत्राप्राप्त विद्यस्यादौ महागणपति बालां गुरुश्च चोपदिशेत्॥ समर्थे न तु बालादीक्षोक्तप्रकारेणैव
दीक्षैव ग्राह्या॥ एवं प्राप्त बाला विद्योपदेशं बालां हृद्भक्त्युपासनाभिः परिशुद्धचित्तं ज्ञात्वा पश्चात् पंचदशीं
मंत्रिणीं दंडनाथां विद्यां पंचदश नित्यां तिरस्कृतिं चोपदिशेत्॥ समर्थे न तु बालादीक्षां पंचदशी दीक्षां मंत्रदी-
क्षां च गृहीत्वा पूर्णदीक्षा ग्राह्या॥ बालादिदीक्षाग्रहणे बालादि सांगोपास्तिरवश्यं कर्तव्या॥ असमर्थेन
तु पंचदश्यंतं मंत्रग्रहण विधिना गृहीत्वा पूर्णदीक्षाग्रहणं कार्यं॥ इति॥ एवं यथोक्त दीक्षे वाचार दीक्षा
संक्रमण दीक्षेति चोच्यंते॥ अथ संक्रमणात्तु यथोक्त प्रकारेणैव कर्तव्या॥ अयं तु विशेषः॥ संकल्पे परदेव

ना सन्मार्गप्रवर्तनार्थमित्यत्र हेतुरेवो नास्ति॥ ततो यावज्जीवं स्वेनान्यत्र शिष्यादावनुग्रहो न कर्तव्यः॥ इति॥ १

इयमेव साधकदीक्षेत्युच्यते॥ इति वैराग्यवता॥ आर्यलक्षणरहितेन वा सा ग्राह्येति॥ एवं द्विविधाप्याचार

दीक्षा॥ संस्कारास्त्वानु यावन्मंत्रोपदेशरहिता॥ तत्र योग्यतानारतम्यं ज्ञात्वा॥ महागणपतिं १ गुरुत्रयं ४ बालां ५ राज

श्यामलां ६ वार्तालीं तिरस्कारिणीं ८ सौभाग्यविद्या ९ षोडशीं महापादुकां ११ महाषोडशीं १२ चोपदिशेत्॥ अथवा॥ गुरु

त्रयं ३ बालां ४ सौभाग्यविद्यां ५ षोडशीद्वयं ७ महापादुकां ८॥ अथवा गुरुनाम॥ महाषोडशीं २ अथवा हृल्लेखां १

षोडशीकलां चेति २॥ अतिमूढोद्रेः संस्कारदीक्षावतो मुख्ये नैवा रिक्तानुष्ठानं॥ इयं चाल्पस्योपहतेन कर्तव्या॥ अपि

तु मूढातुरादेव कर्तव्या॥ अत्र दीक्षायां यदि महाविघ्न उत्पन्नस्तर्हि कलशे देवतावाहनात् पूर्वं चेत् सर्वं उद्वास्य पुनः का

लान्तरे कर्तव्या॥ आवाहनानंतरं चेद्देवतामनुद्वास्य विघ्नपरिहारः कर्तव्यः॥ विघ्नपरिहारपर्यंतं स्वेनवान्येन वा प्र

त्यहं पूजनं कर्तव्यं॥ अतीते विघ्ने अव्यवहितदिने एवं प्रायश्चित्तानुष्ठानपूर्वकं कर्म समापनीयं॥ गुरोरेव चिरविघ्ने

उत्पन्ने गुरुज्येष्ठकनिष्ठादिभिः कर्म समापनीयं॥ प्रायश्चित्तं यावद्दिनातिक्रमस्तावत्सहस्रं मूलजपः॥ सहस्रं

होमो वा कर्तव्यः॥ यस्योपघातस्तस्य पुनः संस्थापनादिकं च कर्तव्यं॥ तत्र दीक्षणं तु गुरुणैव कर्तव्यं गुर्वन्तरं

अथाशक्तयाविरादि० कर्तव्यं दीक्षायां आचार्यवरणानंतरं उपाचार्यवरणं कार्यनिर्वाहार्थं कर्तव्यं ॥ तत्र दीक्षणं तु गुरुणैव कर्तव्यं गुर्वाज्ञानुसारंभणं पूर्वकमुपाचार्येणाध्वशोधनं कर्तव्यं ॥ क्षत्रियस्यैवमेव दीक्षा कर्तव्या ॥ वैश्यस्य तु रहस्य विद्यांतमेवोपदेशः ॥ शूद्रस्य तु पादुकां महाषोडशीं विहाय संस्कार दीक्षेव कर्तव्या ॥ तत्रापि त्र्यम्बकमंत्रे प्रणवोऽस्ति तत्स्थाने चतुर्दशस्वरांस बिंदुकं दत्वोपदिशेत् ॥ इति ॥ स्त्रीणां तु योग्यता क्रमेणाचारसंस्कारोभय विधिवि धवायास्तु भक्तियुतायाएव ॥ साप्य संक्रमारव्येव नान्या ॥ सुवासिन्यास्तु भर्त्रा सह दीक्षा प्रशस्ता ॥ तत्र पृथगभ्यंगस्नानादि संकल्पपत्निकास्नानादि संविद्ग्रहणाघृताजनं भणी तोदके प्रोक्षणं पादच्छेदः हुतशेषभोजनादि शिखावंधातं मंत्रदीक्षा नामकरणं च अन्यत् पत्नीससहितस्य भर्तुरेव ॥ एवं बहूनां शिष्याणां युगपद्दीक्षा करणे पि तत्र गणेशपूजनादिवरणांतं दूर्वादिहोमः अध्वशोधनकलान्यास सप्तविध दीक्षाश्च प्रत्येकं कर्तव्या ॥ इति दीक्षाक्रमः ॥ अथोपासकधर्मा लिख्यंते ॥ एक ग्रामे क्रोशदूरे चार्धयोजनके स्थितः ॥ गुरोस्त्रिसंध्यैकसंध्यं पंच पर्वसु दर्शनं ॥ १ ॥ एकयोजनमारभ्य योजनद्वादशावधि ॥ तत्तद्योजनसंख्याके मासे स्याद्गुरुदर्शनं ॥ २ ॥

अतिदूरेनमेंशिष्यस्तद्दिशाभिमुखोगुरुं॥रिक्तहस्तोनैवचिरात्सेवेद्गुरुंतथा॥३॥नैवगछेन्मंडलेच
फलाद्याहार्यवैव्रजेत्॥गुरोर्मनुष्यबुद्धिंचमंत्रेचाक्षरबुद्धितां॥४नकुर्याद्यंत्रमूर्त्तौशिलाबुद्ध्यादिकंतथा॥
गुरुंपश्येत्सदाभक्त्यासाक्षाच्छिवमयंबुधः॥५॥शिवेरुष्टेगुरुस्त्रातागुरौरुष्टेनकश्चन।गुरोर्नस्मात्प्रियंकुर्याद्वा
ङ्मनःकायकर्मभिः॥६॥सर्वत्रादौगुरुःपूज्यश्चान्यःपूज्यस्तदाज्ञया॥ऋणदानंतथादानंतथैवक्रयविक्रयं॥
॥७॥नकुर्याद्गुरुभिःसार्धंतदाज्ञांनैवलंघयेत्॥गुरुदैवतमंत्राणांसमयाचारतत्परः॥८॥ननिंदांशृणुयात्कापि
नतिष्ठेत्तत्रसर्वथा॥शिरसानवहेद्भारंपादुकाभावनःपरः॥९॥नाभिमानंगुरोःकार्येलज्जांकुर्यात्कदाचन॥गु
रुमित्रस्कहृद्दासीद्दासाद्यांनांसमानयेत्॥१०॥वाहनंपादुकांचैवचामरंव्यंजनंतथा॥तांबूलभक्षणंसेव्यभावं
गुर्वग्रतस्त्यजेत्॥११॥पादप्रक्षालनंदंतधावनंमलमूत्रयोः॥विसर्गंक्षौरमभ्यंगंशयनंस्त्रीनिषेवणं॥१२॥
दुर्वाक्यरोदनंहास्यंप्रपदोद्घाटनंतथा॥दूषणंकलहंवादमधोवायुंदुराग्रहं॥१३॥अंगभंगंनकुर्याद्वैपूज्यसं
सुखतःक्वचित्॥गुरोरासनवस्त्रांगछायानोलंघयेत्क्वचित्॥१४॥अंधस्थेतुगुरावूर्ध्वेनतिष्ठेन्नाग्रगोभ
वेत्॥नविशेदुच्छ्रितेतस्मिन्स्वांगछायांनपातयेत्॥१५॥गुरुनामनगृण्हीयाज्जपाच्छ्रोत्याद्दतेक्वचित्॥

गुरुपत्नी कृतजेष्ठा गुरुवत्पूजयेत्सदा ॥१६॥ गुरौ गुरौ समीपस्थे गुरोन स्यात्स्मि मानसं ॥ इति गुरुभक्तिलक्षणं ॥
॥अथचारः॥ मंत्रमुद्रा माला नाम शिष्यस्त्वन्यत्र नो वदेत् ॥ मत्तेभं सहकारं चाप्यशोकं पुष्पीतद्रुमं ॥१॥ स्मशा
नं द्रव्य सौगंध्यमेकवृक्षं च कोकिलं ॥ स्ववासिनी कुमारीणां समूहं मदिराघटं ॥२॥ आममांसं कौलशा
स्त्रं पुस्तकं दर्शनं नमेत् ॥ पशुहस्तगतं नैव कुर्याच्च कुलपुस्तकं ॥३॥ श्रद्धाभक्तिकरांभ्यां तु कौलिको भव
सागरं ॥ तरत्येके नहीनोपि गंभीरे मज्जति ध्रुवं ॥४॥ गुरुशास्त्रप्रमाणोक्तं कुर्याच्छक्त्यनुरोधतः ॥ आलस्य
नत्यजन्नेय:पतत्येव नसंशयः ॥५॥ कुलशास्त्रं सर्वदैव चिंतनीयं प्रयत्नतः ॥ पशुशास्त्राणि सर्वाणि दूरतः परि
वर्जयेत् ॥६॥ पशोस्तु रक्षणं यद्धि धर्मस्य स्यात्तथाचरेत् ॥ गुर्वर्थकर्मणां लोपेन पापं विद्यते क्वचित् ॥७॥ मा
तृदोषो यथा गोप्यस्तथा धर्मस्त्वयं सदा ॥ योषितामप्रियं नैव कुर्यात्कार्यं प्रियं सदा ॥८॥ अपराधसहस्रेपि
स्वस्त्रियं वा परस्त्रियं ॥ न क्लेशयेन्नं डलेतु सर्वेषां प्रियमाचरेत् ॥९॥ काम्यकर्म न कर्तव्यं नित्यं नैमित्ति
कं चरेत् ॥ शक्त्या शक्त्या कृतं कर्म देवतायै समर्पयेत् ॥१०॥ अन्यमंत्रार्चनं श्रद्धां न कुर्याच्च कदाचन ॥

कुलशास्त्रं तथा मंत्रः श्रोतव्यं गुरुवक्त्रतः ॥११॥ तदाज्ञया वा सपश्येद्गुरुं ध्यायन्स्मरंन्नमन् ॥ न नग्नां स्त्रियमीक्षेत कुरूपीं
प्रकटस्तनी ॥१२॥ दृष्ट्वा तु विकृतां वापि नोपहासं समाचरेत् ॥ मंडले तु स्त्रिया केनकस्ताडितोपि तु तां नमेत् ॥१३॥ न स्वपेत्कुल
वृक्षाधः तत्पत्रे नैव भोजनं ॥ तथा छेदं न कुर्याच्च नमस्कुर्याच्च दर्शने ॥१४॥ श्लेष्मातकं करंजाम्रनिंबाश्वत्थकदंबकाः ॥
बिल्वो वटोदुंबरश्च कुलवृक्षा नव स्मृताः ॥१५॥ कुलशास्त्रं सदाचारं कदापि न विकल्पयेत् ॥ गुरुः स्त्रीवारमाचारं शिष्याय
कथयेत्स्फुटं ॥१६॥ तत्र गृह्णाति शिष्यश्चेत्तदा पापं गुरोर्न हि ॥ विभीतकार्ककारंजश्लेष्मातकान्न संश्रयेत् ॥१७॥ पुंड्रेक्षु भक्ष
णं तद्वच्छेदनं न परित्यजेत् ॥ गुरुं न गोपयेन्मंत्रं सर्वथा न प्रकाशयेत् ॥१८॥ शपथं नैव कुर्वीत कार्ये कपि कदाचन ॥ परंप
रागुरुं नैव त्यजेद्योगं कथंचन ॥१९॥ तदाज्ञामंतरा तस्य चाग्रे नोपदिशेन्मनुं ॥ इति समयाचारः ॥ अथ मंडले कर्तव्यध
र्मः ॥ क्षतांगो ज्वरितश्चापि मलिनांबरमूर्धजः ॥ अशौचांगस्तथोष्णीषी कंचुकी कृतभोजनः ॥१॥ पूजितांगस्ततो च्छिष्टमु
खो मरणसूतकी ॥ अपस्मारी क्लेशयुक्तः छर्दती सारोगवत् ॥२॥ प्रायश्चित्ती तथास्नातो न विशेन्मंडले क्वचित् ॥ सकृन्मो
हात्प्रविष्टोपि देवताशापमाप्नुयात् ॥३॥ यदि तेषां तु भक्तिः स्याद्दुरतस्तद्दर्शनादिषु ॥ पूजागृहद्वारदेशात् दृष्ट्वा पूजादिकं च
चरेत् ॥४॥ नमेत्पूजागृहद्वारे दंडवन्नतु मंडले ॥ स्नातः शुचिर्धौतवस्त्रो धृतपुंड्रः शुभाशयः ॥५॥ क्षालितांघ्रिक
रो रिक्तकरो भस्मा प्रणम्य च ॥ आचार्याज्ञानुरूपेण मंडलांतं विशेत्ततः ॥६॥ भावयं देवतारूपं मंडलं प्रणमेद्बुधः ॥

पात्रस्य दानमादानं ज्येष्ठेभ्योऽथाय वै भवेत्॥ स्वीकृत्य प्रसादं वै आस्वाद्य तो नादिकं पठेत्॥१५॥

 पुष्पांजलिं ततः कुर्याद्यथोक्तं विधिना क्रमः॥७॥ मंडलाकारतो वापि चतुरस्रतयाथवा॥ आचार्यमध्यतः कृत्वा विशेज्ज्येष्ठः
क्रमेण तु॥८॥ ज्येष्ठेषु सत्सु न विशेदाचार्यस्य समीपतः॥ आचार्योपि तथा ज्येष्ठान् उत्थाय प्रणिपत्य च॥९॥ तेषामाज्ञां गृही
 त्वैवस्वासने थ समाविशेत्॥ आदौ सुवासिनीः पूज्या कुमारी बटुकांस्तथा॥१०॥ तीर्थं प्रस्थापनं पश्चाद्ब्राह्मणान् च्यै वै क्रमात्॥ तेभ्यो
पि तीर्थं दद्याद्धि ज्येष्ठेभ्यो थाय साधकः॥११॥ श्रीपात्रादीक्षितायेस्यादन्येभ्यो हेतुपात्रतः॥ बटुकाय बलैः पात्रादेवता भवितो
नमेत॥१२॥ एवं पात्राणि संगृह्य तर्पयित्वा यथा विधि॥ हुत्वा शिवाग्नौ क्रमतस्त्रिचतुः पंचपात्रकं॥१३॥ प्रक्षाल्य पात्रं पुष्पादि
युतमाच्छद्य हस्ततः॥ आचार्याय ततो दत्वा नमस्कुर्याच्च भक्तितः॥१४॥ अर्घ्यस्थापनमारभ्य यावत्पात्रविसर्जनं॥ सर्वं शिव
मयं पश्येदन्यथा पतनं भवेत्॥१६॥ सर्वे वर्णा द्विजास्तत्र न भदं चिंतयेत्क्वचित्॥ उद्वासानंतरं नैक्यं कुर्याद्विद्वान्कदाचन॥१७॥
स्वामीकारस्त्रिधा तत्रादिव्य वीर पशुक्रमात्॥ उद्वासावधि दिव्यस्यात्तत्पश्चाद्वीर उच्यते॥१८॥ असंस्कृत पशुः प्रोक्तो विप्राण
मायएव तु॥ अपशुः क्षत्रिय विशां शूद्राणां त्रितयं भवेत्॥१९॥ तत्तन्मंत्रेण पात्राणां संख्या तानां हुतिः स्मृता॥ पश्चान्मूलं
पादुकां वा स्वाहांतं च पठं हुनेत्॥२०॥ तावदेव हुनेद्धि द्वा यावदानंदसंप्लुतः॥ मनो निश्चलतां याति चित्तं चापि प्रसादतां॥२१॥
यावत्स्वपुष्प जानस्यादविकारित्वमेव च॥ तावदेव हुनेद्देवी निष्फलं त्वन्यथा भवेत्॥२२॥ आदौ शक्तेः प्रसादं वै तीर्थमा

दायसाधकः॥ ज्येष्ठादाचार्यतः पश्चात्प्रसादं पुष्पखंडकं॥ २३॥ अनंतरं तु भक्त्यो तेशक्तीनां तु यथेच्छसः॥ ज्येष्ठा नामपिवी
राणां प्रसादं पुष्पखंडकं॥ २४॥ तीर्थं चाद्यदपि वातद्रूपा प्राप्य मेव च॥ हुनेत्कुंडलिनी वन्हौ भक्तिभावेन चेतसा॥ २५॥ मा-
तुश्च गुरुपत्न्याश्च विधवाया अपि स्वयं॥ प्रार्थ्य प्रसादं तु हुनेदन्यासां नक्वचन॥ २६॥ स्वज्येष्ठविधवायां तु प्रसादं य
दि चार्पयेत॥ प्रेमभावेन तदपि हुनेन्न तु निषेधयेत॥ २७॥ आरंभ तरुणश्चैव यौवनः प्रौढ एव च॥ प्रौढांतश्चोन्मनस्त
दूनंतिकद्धति स्मृताः॥ २८॥ उल्लासः सप्तधा देवी न आरंभः स्वसंख्यया॥ इषबोधस्तु तरुणो मध्यबोधस्तु यौवनः॥ २९॥
यत्नान्मनोलयोपत्र नायत्ना तु च योल्लयः॥ प्रोढ इत्युच्यते चैषच्चलतीतु नहंतनः॥ ३०॥ उन्मनश्चलनं यत्ना दंतस्यां
निश्चतत्वतः॥ अशक्तान्तु धवा वालंमारंभः परिकीर्तितः॥ ३१॥ तरुणो नूतनानां स्यां भक्तिमात्रस्तु यौवनः॥ प्रो
ढस्यासस्रक्षो वै मध्यारूढस्यतस्मरः॥ ३२॥ पूर्णारूढस्योन्मनश्चनहृदासंपक्तिकोयवै॥ शक्तीनां तु यथेच्छं वै दन्येषां दे
शिकाज्ञया॥ ३३॥ उल्लासभेदमज्ञात्वा प्राप्य मूढत्वमं विके॥ स योगिनां तु स ततं पशुस्यादन्यथा भवेत्॥ ३४॥ जि
ह्वा लोलुसभावेन चेंद्रियप्रीणनाय च॥ यः पिवेत्तं तु तामिस्रे मातृकाः पातयंति वै॥ ३५ भावयेद्देवतारूपं तत्र शक्तिं
विशेषतः॥ अन्यथा भावयल्लसघः कुध्येतस्य तु देवता॥ ३६॥ भोगेच्छां तु स्वशक्तौ तु कुर्यादन्यत्र नैव हि॥ तच्चापिना

नाचरेद्दूरेपूजानांतु कहाचन ॥ ३७ ॥ शक्तेरिच्छानुरोधेन कुर्यात्तेन न दोषभाक् ॥ गुरोश्चाज्ञानुरोधेन देवताप्रीणना
यच ॥ ३८ ॥ यः करोति तु तत्सर्वं मोक्षायैव प्रकल्पते ॥ अन्यथा क्रियमाणं तु सर्वं दुःखाय भवेत् ॥ ३९ ॥ सन्यासि
नो वनस्थाश्च शांतिरूपा उपासकाः ॥ आदावेव तु पूजास्य मंडलं शिवरूपिणः ॥ ४० ॥ शास्त्रं गुर्वाज्ञया सर्वं सफलं
त्वायकल्पते ॥ अन्यथा विफलं सर्वं भस्मनीव यथाहुतं ॥ ४१ ॥ अयं हि परमो योगः कौलमार्गो महेश्वरी ॥ असि
धाराव्रतसमो मनोनिग्रहहेतुकः ॥ ४२ ॥ स्थिरचित्तस्तु सफलः सफलस्तूर्णसिद्धिदः ॥ अन्यस्य विफलो दुःखहेतु
स्यात्परमेश्वरी ॥ ४३ ॥ एवं उपासको धर्मान् ज्ञात्वा उपासते शिवं ॥ ४४ ॥ श्रीमाधवानंदनाथकृते सौभाग्यपूर्वके ॥
कल्पद्रुमे सप्तम भवस्कंधो दीक्षाफलानतः ॥ इति श्री सौभाग्यकल्पद्रुमे चतुर्थस्कंधः ॥ समाप्तः ॥ ८७ ॥ ८७ ॥ ४७ ॥

हा स्कंधनथ्थू भट सप्रेपा निलिहि ॥ मिति भाद्रपद कृष्ण ५ गुरु ॥ सं ८ दुर्मुखी नाम संवत्सरे

समंत १९७१ २५ अ द्र

वे. 38

॥ अथसौभाग्यकल्पद्रुमपंचमस्कंधप्रारंभः॥ पत्रे १२५॥

॥श्रीगणेशायनमः॥ प्राप्तदीक्षोपिगुरुतोयन्त्रकृत्वानसाधकः॥ पुनस्कर्यास्येन तेनयातु
ष्टातांभजेंबिकां॥१॥ अथैवंगुरुकृपाप्राप्तदीक्षणेनादौकर्तव्यत्वात्पुरश्चरणस्यतद्विधि
रारभ्यते॥ तत्रदीक्षासंबंधोक्तशुभेदिनेविशेषावसुप्तेगुर्वाज्ञयास्वेनकर्तव्यंअशक्तश्चेद्ब्राह्म
णगुरुद्वाराकर्तव्यं॥ तत्रदेशः॥ निजेगृहेसमुद्रस्यतीरेकुरुतरोरधः॥ अद्रेःशृंगेथगोष्ठेवा
ब्धिसंयुक्तसरीतटे॥ पुण्यक्षेत्रतस्तटेवापिस्वयंजातस्थुरालये॥ पश्चिमाभिमुखेनंदीशून्येयसे
वशिवालये॥ तथानार्मदलिंगस्यचालयेगुरुसन्निधौ॥ मनःकांतितथैकांतेभयदुष्टविवर्जिते॥
एवमुक्तान्यतमदेशेपुरश्चरणंकुर्यात्॥ तत्रपुरश्चरणंपंचांगंजपोहोमस्तर्पणंचमार्जनंद्वि
जभोजनं॥ जपस्तुलक्षसंख्याकःकलौस्यात्तच्चतुर्गुणः॥ चतुर्लक्षात्मकस्तेनमंत्रसिद्धिःप्रयो
जकः॥ लक्षमात्रजपेनैवत्रयवायाद्विमुच्यते॥ पूर्वपूर्वदशांशेनचांगंस्यादुत्तरोत्तरमिति॥ तत्रा

दौभूमिपरिग्रहणंकुर्यात्॥यथापूर्वमेकस्मिन्शुभेदिनेक्षौरंविधायअयुतसंख्याकाम्
गायत्रींपुरश्चरणाधिकारसिध्यर्थेप्रायश्चित्तात्वेनप्रजप्य॥ततःपुरश्चरणारंभपूर्वदिने
कृतनित्यक्रियःजपस्थानंगत्वातिथ्याद्युल्लिख्यश्रीविद्यापुरश्चरणार्थंभूपरिग्रहणंकरि
ष्ये॥इतिसंकल्प्य॥अमुकमंत्रस्यपुरश्चरणसिद्ध्येमयेयंगृह्यतेभूमिंमंत्रोमेसिध्यतामित्यु
च्चारणमेत्॥ग्रामेक्रोशमितंनगरेद्विगुणंअन्यत्रयथेच्छंक्षेत्रपरिग्रहः॥अथतत्क्षेत्रदिक्षु
तेषुकाष्ठेसाइंद्रईशानयोर्वरुणनिर्ऋत्योर्मध्येचक्रमेणनिखनेत्॥क्षीरभवान्वितस्तिमिता
दशकीलान्संपाद्यप्रत्येकंमूलमंत्रेणअभिमंत्र्यपूर्वादिशांताष्टादिक्षुगंधपुष्पाक्षतैःसंपूज्य
तत्रेंद्रादिदशदिक्पालान्पंचभिःषोडशभिःउपचारैःपूजयेत्॥एहींद्रपूर्वदिक्भागेपूजितो
वसकालिके॥मांरक्षतुनिर्विघ्नेनकार्यंसाधय२माषभक्तबलिंगृह्ण२स्वाहाइतिदशदिक्षुमा

षभक्तबलिंदद्यात्॥अत्रमंत्रेयत्रइंद्रपूर्वपदयोस्थानेवन्हियमनैर्ऋतिवरुणवायव्योत्तर
ईशानोर्ध्वाधःपदानांचोहःएतत्क्षेत्रपरिग्रहादिकंसुरालयातिरिक्तेएवकर्त्तव्यं॥एवंक्षेत्र
परिग्रहणंकृत्वातन्मध्येगणेशंक्षेत्रपालंवास्तुपुरुषंचबलिदानांतैःपूजयेत्॥ततस्तत्रकू
र्मचक्रंलिखेत्प्राक्प्रत्यग्दक्षिणोत्तरंचतस्रःचतस्रोरेखाविलिख्यनवकोष्ठानिकृत्वातेषुपू
र्वादीशानांतेषु॥अकचटतपयषवर्गान्प्रत्येकमेकैकंविलिख्यमध्यकोष्टपूर्वाद्यष्टदिक्षुस्व
राणांद्वयंद्वयंविलिख्यकर्मसंपूज्यकोष्टेषुपूर्वादिमध्यांतेष्वमृतं॥ऋषभं२शैलराजं३वासु
किं४अर्थकेतं५शार्ङ्गिं६पद्मयोनिं७महाशंखं८छायाछत्रं९इतिनवक्षेत्रपालान्प्रत्येकंस
मष्ट्यावासंपूज्ययस्मिन्कोष्टेदेशस्यग्रामस्यगृहस्यवानामाद्यक्षरमस्तितत्कूर्ममुखंमध्यं
कूर्मपृष्टं॥तस्याधःकोष्टंपुच्छंतेषांपार्श्वद्वयेहस्तकुक्षिपादद्वयासमकंक्रमात्कोष्टषट्कं॥तत्र

मुखपृष्ठयोर्जपस्य मुख्यं फलं हस्तयोर्मध्यं फलं अन्यत्रापि निषिद्धो जपः॥ एवं भूतं कूर्मचक्रं
चतुर्द्धा देशविभावनं देशकूर्मं ग्रामविभावनं ग्रामकूर्मं गृहविभावनं ग्रहकूर्मं चतुर्थं चास
नाधोल्लेखनीयं तच्च दीक्षास्कंधे निरूपितं अत्र देशकूर्मं विभाव्य तन्मुखदेशस्थितग्रामे कू
र्मं विभाव्य तन्मुखस्तगृहे पुनः कूर्मं विभाव्य तन्मुखे आधारकूर्मचक्रं विलिख्य तत्रासने स्थि
त्वा जपः कर्तव्य इति मुख्यः॥ एवं वा विचिंतयेत्॥ देशग्रामयोनामप्रसिद्धं॥ ग्रहनाम तु वास्तुशास्त्रा
द्विज्ञेयं॥ कुरुक्षेत्रे प्रयागे च महाकाले च पर्वते॥ पुण्यारण्ये समुद्रस्य तीरे काश्यां न चिंतयेत्॥
कूर्ममुखरूपदीपस्थानं चिंतनं नास्ति॥ यदा वमृतृषभादि दीपस्थानपतीनां स्वस्य च नामाद्य
क्षरं मंत्राक्षरं चेति त्रयं एकं स्यात्तर्हि ररिमंत्रा असाध्यमंत्रा जपि सिध्यति एवं स्थानसाधकना॥
म्नार रिवं चेत्स्थानं परित्यज्य यथा शिवेश्वरयो॥ शिवदूतिकयोः कुलसुंदरीवाक्रनवयोः पाणि

॥सो॰ क॰॥
॥२॥

जिह्वयोः पायुस्पर्शयोः शब्दवायोः सर्वमंगलाकाशयोः सदाशिवकालयोः रागपुरुषयोः अहंकारश्रोत्रयोः ररित्वं अत्रनित्यातत्त्वनामभिः तत्तदक्षरमवगंतव्यं अत्र कामेश्वरि मकारग्रहणे आकारोपि ग्राह्यः एवं ऋऌ ओकारेषु॥ स्वरेषु दीर्घग्राह्यः॥ एवं स्थानं संपाद्यात्रारात्क्रोस्वगृहे कूर्मचक्रादिसंशोध्यपर्वदादौ चैकांतात यसहाग्भुप्रांकुटीं निर्माय तत्र हविष्याशीतस्मिं दिने अधिवसेत्॥ अत्र गायत्रीजपप्रभृति नियमधारणं कर्तव्यं नियमास्तु॥ शुद्धं स्वच्छं तथा वासः स्थानमंगं च मूर्द्धजाः॥ सुगंधामलकैः केशशोधनं बंधनं तथा॥ पंचत्ति क्षुरखा निद्राजृंभालस्यादि वर्जनं॥ निष्ठीवनं भयं नीचस्पर्शभाषणमेव च॥ २॥ अकार्यभाषणं क्रोधं चिंतनं चाचलत्यमेव च॥ १॥ वर्जयेत्त्वपलं क्षीरं मूलं तद्वंधविष्पकं॥ ३॥ भुंजीयाद्रात्रिसमये शयनं स्थंडिले थवा॥ कुशासने जिने स्वेतकंबले धूतवाससी॥ ४॥ जपस्थानसमीपे वैब्रह्मचर्यं सदाचरेत्॥ त्रिकालं वाद्विकालं वासा

॥श्री॰॥
॥२॥

नंस्यात्स्नानरेववा॥५॥त्रिदद्दककाळंवापूजाचामध्यान्हात्जपोभवेत्॥मूलाभिमंत्ररहितंनविवेन
चभक्षयेत्॥६॥कदलीमधुपर्णेषुपालाशेमध्यवर्जितेहितंमितंचभुंजीयाद्देवतायैनिवेदितं॥७॥
एलालवंगकर्पूरजातिपत्रफलात्मकं॥पंचतिक्तैरयुतंतांबूलंनिशिभक्षयेत्॥८॥नवर्द्दप्रि
यंमिथ्यास्तुत्यंकदुमयोस्तथा॥करंजस्यविभीतस्यछायान्नैवाक्रमेक्वचित्॥९॥मौनेनभो
जयेस्नानमप्रीतिग्रहमेवच॥क्षौरमुष्णाजलंस्नानंगीतवाद्यनिवेशनं॥१०॥अहतंस्त्रीसंगमं
चकंचुकाष्णीशधारणं॥अंधकारेचशयनंवर्जयेत्साधकोत्तमः॥११॥स्त्रद्वयोषिद्रोगिणांतु
नियमस्यांतुशक्तितः॥अथजपविधिः॥उच्चोपांशुजिव्हकश्चमानसश्चचतुर्विधः॥१२॥उच्चः
स्वष्टतयोच्चारादुपांशुश्चोष्टसंस्थितः॥जिंव्हकोजिव्हयोच्चारःमानसोहृदिसंस्मृतः॥१३॥कू
रकर्मातिरिक्तेवाचिकन्नैवसिद्धिदं॥अथासनानि॥हरिणमव्याघ्रयोश्चकुशवेत्रभवंकटं॥को

॥सौ॰ क॰॥
॥४॥

पं सप्तचोर्णवस्त्रमच्छिद्रास्फुरतंभवेत्॥१॥त्रयंवाद्वयमेकंवाभिन्नजातीयकंस्मृतं॥अत्रासीनः
स्वस्तिकेनपद्माख्येनासनेनवा॥२॥योन्यासनेनसिद्धेनकपालासनकेनवा॥व्यत्यस्तपादयुग
लंजानूर्योरंतरेक्षिपेत्॥३॥ईषत्स्वष्टांगुलीकंतुस्वस्तिकासनमीरितं॥वामदक्षिणयोरूर्वोर्मू
लयोर्विन्यसेक्रमात्॥४॥दक्षवामांघ्रियुगलंतस्योपरिकरद्वयं॥सरलांगुलमुत्थानंचैवंपद्मास
नंभवेत्॥५॥वामजानुमधःकृत्वातदूर्ध्वेदक्षजानुकं॥पार्श्वद्वयेभूगतांघ्रियुगलंकरयुग्मतः॥६॥
अवष्टभ्यांबरस्थेतुयोन्यासनमुदाहृतं॥योनिस्थानेवामगुल्फंलिंगेदक्षिणगुल्फकं॥७॥पश्यन्
भ्रुवोरंतरालमितिसिद्धासनंस्मृतं॥भुविकृत्वामस्तकंतुचरणद्वयमूर्ध्वतः॥८॥अचलस्थिरदृष्टि
श्चकपालासनमीरितं॥आसनंजपमध्येतुनविमुंचेत्कदाचन॥९॥अत्रपद्मयोन्यासनयो
र्वर्णमालयाजपएवहस्तस्यासनोपयुक्तत्वात्॥सर्वत्रासनयोगेतुऋजुकायःसदाभवेत्॥अ

॥श्री॥
॥४॥

त्रासनेषुयथोत्तरंश्रेष्टं अथजपमालावर्णमालाद्विजमालाकरमालेतिसात्रिधा॥ अकारा
दिलकारांतंपंचाशद्विंदुसंयुतं॥ मेरुं कृत्वाक्षकारंवैचानुलोमविलोमतः॥ शतसंख्याभवे
देवंयावदिष्टंजपंचरेत्॥ अत्रचतुस्तारायंप्रणवाद्यंवानमोंतंशुद्धंवामंत्रोच्चारादौअंतेवाए
कमेकंवर्णमुच्चरेत्॥ अंतेक्षकारंकेवलमुच्चरेत्॥ अष्टोत्तरपक्षेतुअतंस्वरेणैकेनकादिवर्ग
सप्तकेनअष्टसंख्यापूर्त्तिःकर्त्तव्यावर्गजपेत्॥ ॐ कंखंगंघंङंनमः इत्यादिज्ञेयं॥ अथबीजमा
ला॥ अथकाम्यपरत्वमणिमाला॥ शंखाक्षमणयःश्रीदाःस्फटिकामोक्षदायकाः॥ पद्माक्षः
पुष्टिलक्ष्मीदाःरुद्राक्षाभुक्तिमुक्तिदाः॥ पुत्रजीवंभवापुत्रपशुधान्यंसमृद्धिदाः॥ विद्रुमावश्यध
नदासौभाग्यार्थेचमोक्तिदाः॥ पापक्षयाःकुशमयाःकामदाःस्वर्णरौप्यजाः॥ प्रवालमुक्तास्फ
टिकैःजपकोटिफलप्रदं॥ तुलसीमणिनायेनगणितंचक्षयोभवेत्॥ भद्राक्षमणिनाचेवक्ष

॥सो॰क॰॥ ॥५॥

नंतं फलमश्नुते॥ अथ धर्मत्रवृत्तिर्धर्मशास्त्रे कार्पासमुंजकुशजैर्वल्कलैर्थोर्णजैस्तथा॥ पट्टसूत्रैरपि भवेत्कार्पासादि चतुष्टयं॥ द्विजनिर्मितमेवस्यादन्यत्र नियमो न हि॥ स्थूलादिसूक्ष्मपर्यंतं सर्पाकारं तयामणीन्॥ आरोपयेद्दाम मध्ये तु स्थूलं गोपुच्छवद्द्वेत्॥ ग्रंथिं ग्रंथिं मणीनां तु मध्ये कृत्वा समुग्मकं॥ एकीकृत्य स्थूलमणौ मेरावारोप्य ग्रंथयेत्॥ अथैतत्संस्कारः॥ द्वादश्यामच्युतः स्यात्स्यत्रयोदश्यां शिवस्य तु॥ शाक्तो नवम्यामष्टम्यां चतुर्दश्यां निशासु वै॥ सा चतुर्थी गाणपते सप्तमी भानुषु प्रिये॥ अर्द्धरात्रौ कृतनित्यक्रियः॥ मालासंस्कारं करिष्ये इति संकल्प्य॥ मणिं सूत्रं च प्रत्येकं पंचगव्येन प्रक्षाल्य॥ पंचामृतेनाभिषिंच्य॥ पुनः सुवासितजलैः मूलाष्टाभिमंत्रितं संस्थाप्य शुद्धवस्त्रेण संमार्ज्य॥ अष्टगंधेन सूत्रं मणींश्चानुघृष्य ग्रंथिं विधाय ग्रंथितायां तु मूलं प्रजप्य पीठे संस्थाप्य षडंगन्यासं कृत्वा सामान्यकलशं संपूज्य तत्र मालायां देवतामावाहना

॥श्री॰॥ ॥५॥

दिषोडशोपचारैः संपूज्य मालां स्पृशन् सद्योजातादि पंचकं प्रजप्य मालामादाय प्रति बीजं हूं ह्लूं रवाम
ष्टधा प्रजप्य मेरुं अघोरेभ्य इति प्रजप्य नित्यहोममग्नौ कृत्वा अष्टोत्तरशतं मष्टाविंशतिसंख्यं वा मू
लेनाज्येन हुनेत्॥ ततः गुरुं दक्षिणादिभिः संपूज्य परदेवतायै समर्पयेदिति॥ अथ पर्वमाला॥ अना
मिकामध्यपर्वमारभ्य तन्मूलकनिष्ठिकामूलमध्याग्रानामामध्यमाग्रतर्जन्यग्रमध्यमूलेषु दश
सुस्थानेषु अनुलोमविलोमतः स्पृशां जपेत्॥ तत्र मध्यमामध्यमूलयोर्मेरुत्वमिति ध्येयं रुद्राक्षमा
लायां मुखे मुखं पृष्ठे पृष्ठं च योजनीयमिति विशेषः॥ एवं पूर्वदिने बलिदानादि कृत्वा तद्दिने नित्य
क्रियां विधाय प्राङ्मुखः पवित्रपाणिः गुरुं आत्मानं इष्टदेवतां च नमस्कृत्य प्राणानायम्य तिथ्या
द्युल्लिख्यामुकगोत्रममुकशर्माहं श्रीविद्यासिद्धिद्वारा श्रीमहात्रिपुरसुंदरीप्रीत्यर्थं एतावद्धिर्नैरेता
वसंख्याकं पंचांगपुरश्चरणं करिष्ये इति संकल्प्य॥ गणपतिपूजनं पुण्याहवाचनं च कृत्वा ततः गुरुं

।सौ॰क॰। ।६९।

प्रणम्य तदाज्ञया जपमारभ्यासनोपरि प्राङ्मुखोदङ्मुखो वा स्थित्वा भूशुध्यादि षडंगन्यासांतं कुर्यात्॥ कृतेभूशुध्यादिके तु मूलस्य ऋष्यादिपूजांतं विधाय मूलविद्यया प्राणायामत्रयं कृत्वा सामान्यं कलशं संपूज्य देवतायै निवेदितपंचतिक्तं मूलेनाभिमंत्रितं मुखे संस्थाप्य जपमालां पत्रांतरस्थां वामकरे गृहीत्वा कलशोदकेनाभ्युक्ष्य॥ ॐ माले त्वं महामाये सर्वशक्तिस्वरूपिणी॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव॥ ह्रीं सिध्यै नमः॥ इति गंधाक्षतपुष्पैर्मालां संपूज्य॥ अविघ्नं कुरु मे माले त्वं जपकाले सदा मम॥ त्वं बीजं सर्वमंत्राणां इष्टसिद्धिप्रदा भव॥ इति मालां दक्षकरे गृहीत्वा मूर्ध्नि संस्थाप्य ब्रह्मरंध्रे मातृकात्रिकोणं ध्यात्वा तन्मयीं मूलविद्यां मुखे ध्यात्वा तदाच्यां देवतां हृदि ध्यात्वा तदा परं रूपं श्रीगुरुनाथमाज्ञायां ध्यात्वा तेषामैक्यं देवतारूपं हृदि ध्यात्वा तत्वा दक्षकरेण मालामादाय हृदयसमीपस्थकरः देवतां मंत्रार्थं मंत्रवर्णान्वा चिंतयन् भ्रूमध्यं नासिकाग्रं वावलोकयन् अर्थनिमीलितदृष्टिः

।श्री॰। ।६९।

अंगभंगचांचल्यादिरहितोमध्यमामध्यपर्वस्थापीनमालायाएकैकबीजंस्पृशन्नुइतरबीजमस्पृश
न्मालायांशब्दमकुर्वन्नादौप्रणवमुच्चरन्नुजपमारभ्यप्रणवांतेनजपंसमापयेत्॥मंत्रोच्चारेणा
तिशीघ्रंनातिमंदंनचास्फुटंउच्चरन्मणिमालेवानादैक्यंव्यक्तवर्णकंधारायानेवविच्छेदंकुर्यान्मंत्री
कदाचन॥आरंभःप्रणवादेवसमाप्तिःप्रणवेभवेत्॥एवंप्रणवांतेनजपंसमाप्य॥६॥ह्रींसिध्ध्यै
नमइतिमूलंप्रणम्यमूर्ध्निसंस्थाप्य॥ॐमाले॰दामवेतिप्रार्थ्यप्राणानायम्यकृष्यादिपूजांतंह
त्वाकलशोदकंचुलुकेगृहीत्वा॥७॥गुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपं॥सिद्धिर्भवतुमेदे
वीत्वत्प्रसादान्महेश्वरी॥इतिदेवताहस्तेभावनयासमर्पयेत्॥ह्रींसिध्ध्यैनमइतिमालांगंधादि
भिःसंपूज्यरहसिस्थापयेत्॥वर्णमालाकरमालापक्षेतुमालापूजनदानमस्तकस्थापनादि
नास्तिजेवशिष्टसमानंअत्रजपमध्येजृंभाष्ठिंकोद्गारसंभवेतारचतुष्टयंजपेत्॥अपानवा

॥सो॰क॰॥ युनिर्गमे तु तन्मालाहस्तिं परित्यज्याचम्य षडंगन्यासं विधाय पुनर्जपेत्॥ निद्रादिसंभवेष्येवं
॥७॥ निद्रादिना हस्तात् जपमाला च्युता मष्टोत्तरशतं जपः जपमध्ये मालात्रोटने अष्टोत्तरं वा सह
स्रं जपः जपमध्ये मूत्रोत्सर्गे कर्तव्ये मालां समाप्य शंकां निवर्त्य जानुकूर्परपर्यंतं पादौ हस्तौ
प्रक्षाल्याचम्य प्राणानायम्य षडंगं कुर्यात्॥ मलोत्सर्गे तु स्नानं अपि कर्तव्यं जपसंख्या विस्मृ
तौ पुनरारंभात् जपः कर्तव्यः यावद्भिर्दिनैः पुरश्चरणं कर्तव्यं तावत् संख्यया पुरश्चरणसं
ख्यां विभज्य लब्धसंख्यात्मक जपः प्रत्यहं कर्तव्यः शेषजपस्तु आरंभदिने स्यदिने वा क
र्तव्य इति॥ यथा॥ लक्षसंख्यात्मकपुरश्चरणं यदि एकेन मासेन कर्तव्यं १००००० त्रिंशद्भिः
३० भागे क्रियमाणे त्रयस्त्रिंशदुत्तरात्रिशताधिकत्रिसहस्रं संख्या लब्धसंख्या ३३३३ शेषसं सं॥श्री
ख्या दश १० तेन प्रत्यहं त्रयस्त्रिंशदुत्तरत्रिशताधिकत्रिसहस्रजपः कर्तव्यः शेषात्मक ॥७॥

दशसंख्याजपस्तु आरंभदिनेंत्यदिनेवाकर्त्तव्याइत्येवंजपंकृत्वाहोमादिकंकुर्यात प्रत्य
हंवालक्षसमाप्तौवासर्वजपसमाप्तौवाकर्त्तव्यः॥ होमस्तुदीक्षोक्तरीत्याग्निंससाध्यदेवता
वाहनादिनित्यहोमदेवताहुत्वाततारचतुष्टयाज्यस्वाहांतमूलेनहोमंकुर्यात् होमद्रव्याणितु॥ पायसं
बिल्वपत्रंवाद्राक्षांपुण्यफलानिवा॥ करवीरंकिंशुकंवाकमलंचकुसुंभकं॥ मधूकंचजपाचैवअ
न्यद्वाशुभगंधयुक्॥ एतेषांकुसुमंदत्वाद्रव्यंक्षीरंघृतंतुवा॥ इत्यादिहोमद्रव्यप्रमाण॥ पुष्पाणितु
समग्राणिकौसुंभदशसंख्यकं॥ अम्लानंसुप्रफुल्लंचहोमकर्मणियोजयेत्॥ कर्षद्वयन्यूनफलंस
मग्रंहोमयेत्तथा॥ ततोधिकफलस्येहाखंडंस्यात्कर्षतोधिकं॥ घृतक्षीरखंडरूपाणांमाषत्रयमिदंभ
वेत्॥ षाष्ठितंडुलजंतद्वत्पायसंसंप्रकीर्तितं॥ क्षीरंकर्षमितंज्ञेयंइत्यादिप्रथमदिनेग्निंसंधा
यतस्मिन्नेवप्रत्यहंहोमंकुर्यात्॥ चरमदिनेहोमानंतरंव्याहृतिहोमादिहोमसमर्पणांतंहो

।।सौ॰क॰।। ।।८।।

मंकुर्यात्।। अग्निरक्षणासमर्थश्चेत्प्रत्यहं अग्निमुखं कुर्यात्।। अग्निमुखकरणेप्यशक्तश्चेन्नित्यहो
मवदग्निंसंस्थाप्यहोमंकुर्यात्।। उद्देशत्यागकबधनंतुप्रत्याहुत्संलेवा समस्तहोमांते वा प्रत्यहंभवे
त् स्त्रीणांशूद्राणांच होमंनास्ति उत्कटेच्छायदिशूद्रस्यहोमकरणेतर्हिनमोतेनहोमंकुर्यात्।। अथ
वास्त्रीशूद्राभ्यांब्राह्मणद्वाराहोमः कुर्त्तव्यः होमाकरणेतुहोमसंख्याद्विगुणेजपः तत्रायंविशेषः अश
क्तादिनायस्यांगस्यलोपः ततत्संख्याद्वित्रिचतुःपंचगुणोजपः क्रमाद्ब्राह्मणादीनां अत्याशक्तस्या
तु जपब्राह्मणाभोजनरूपांगद्वयेनैवपुरश्चरणसिद्धिः।। एवंगोक्षीरेणसुवासितोदकेनवामूलांते
तर्पयामीतितर्पयेत् एतत्सजलदेवतामावाह्यषोडशभिःपंचभिर्वोपचारैः संपूज्यतर्पणंकृत्वांतेचो
द्वासयेत्।। अथतीर्थादौस्नानविधिनातीर्थावाहनादिकृत्वापात्रस्थापितसुगंधजलेवाआवाह्य
स्वमूर्ध्निदेवतांध्यात्वामूलांतेमार्जयामीतिमार्जयेत्।। ततःब्राह्मणानभ्यंगाद्यनेकोपचारैः संपूज्य

।।श्री॰।। ।।८।।

विविधफलभक्ष्यभोज्यादिभिस्तर्पयित्वा दक्षिणादिभिः संतोष्य देवतां बुध्या प्रणमेत् एवं जपादि कं कृत्वासमर्थश्चेन्मध्यान्हस्नानं विधाय पूजां च यथाशक्त्या कृत्वा स्तोत्रपाठादिना दिनशेषं नयेत्॥ अथसायान्हे स्नानं विधाय॥ पुनः पूजां कृत्वा रात्रौ भोजनं कुर्यात् भोज्यं पदार्थास्तु॥ व्रीहिर्तं डुलकं मुद्गायवाः कृष्णतिलास्तथा॥ सैंधवं चापि सामुद्रं लवणं गो घृतं तथा॥ अनिःसारितसारं तु दधिदुग्ध मथैक्षवं॥ गुडवर्ज्यं नारिकेलं कदलिलवलितथोतितिण्यां म्रं चनानारंगं दाडिमं वास्तु शाककं निवा राः षष्ठिसाश्चापि मे ध्याकं दाश्च सर्वशः॥ अद्रकं च पटोलं च धात्री चैव हरीतकी इति॥ एवं भोजनं कृत्वा ॥ नीवाराः षष्ठिकाश्चापि मेध्याकद्राश्च सर्वशः॥ आचमनादि जपस्थानसमीपतः॥ निरुक्तारत्नरणमा स्तीर्य मूलेन समधाभिमंत्र्य स्तोत्रं पठेत्॥ अत्र देवास्त्रयास्त्रिंशदाशापालगमरुद्गणाः॥ रक्षं तुमांमे त्रसिध्येयतनंविभुधेश्वराः॥ १॥ महाविद्यासाधकस्य भूतवेतालकादयः॥ विघ्नं कुर्वंति सततं तेभ्योर

॥सो॰ क॰॥
॥ ९॥

क्षंतु मां शिवः॥ भैरवा मानृसहिताः कोटिशः संचरंति वै॥ सिद्धिनाशाय लोकस्य तेभ्यो रक्षंतु शं
करः॥३॥ सुखं सर्पादिरूपेण साधकं भीषयंति वै॥ सिद्धिलोपाय देवाद्याः शूलपाणिस्तथैव तु॥
४॥ अनंतमूर्ध्नि देवेषा धरा यस्मात् प्रविष्ठिता॥ तेन सत्येन वतु मामनंतः सर्वरक्षकः॥ ५॥
नमः स्वप्नाधिपतये रुद्राया मिततेजसे॥ इष्टार्थानु सम्यगात्व क्षयनाशायानिष्टसूचकान्॥ ६॥
ॐ नमः स्वप्नाधिपतये रुद्राय नमः स्वाहेति त्रिधा जप्त्वा स्वांगे मूलषडंगविन्यस्य स्वापं कुर्यात्
॥ अथ सिद्धिसूचकस्वप्नाः उपास्यदेवतारूपं प्रासादं स्फटिकोपमं॥ गुरुं प्रियजनं पूर्णचंद्र
सूर्यं सरित्पतिं॥ १॥ पूर्णानदितटाकं च प्रफुल्लकमलाकरं॥ यंत्रराजं महादेवं लिंगं हैरण्यप
र्वतं॥ २॥ दृष्ट्वा सिद्धिस्तथा नो कांतरणं स्वस्य वै जपः॥ ज्वलदग्निं हंस चक्रवाक सारस बर्हि
णः॥ ३॥ अश्वयुग्मरथं मध्यस्तंभ्वेत छत्रादिभूषणं॥ दीपपंक्तीश्वेत माल्यं दिव्यस्त्रीणां करं

॥श्री॥
॥ ९॥


बकं ॥४॥ फुल्लवृक्षंचामममांसंरवेयानमारोहयंतथा॥ श्वेताश्ववृषभौमत्तावारणंनेपुरोहणं॥५॥ वि
मानगमनंमद्यपानंमांसस्यभक्षणं॥ विष्टालेपंरक्तलेपंदधिलेपंचभक्षणं॥ राज्याभि
षेकंरत्नादिभूषणंचैवमादिकं॥ अथ अशुभसूचकाः॥ काकगृध्रोलूकभूतानूवरमा
र्जारमाहिषान्॥ चंडालंकृष्णपुरुषंस्त्रियंवाविकटंतथा॥ शून्यगर्तंशुष्कवृक्षंनदीपुष्कर
वापिकाः॥ तैलाभ्यंगंकंटकयुग्वृक्षंप्रासादभंजनं २ उन्मत्तान्नग्नतांचभीतान्नूस्वा
सनस्तथा॥ संकटेनसमायोगंपश्यन्शांतिंसमाचरेत्॥३॥ फलंतु॥ वर्षेणाचलदर्थेन
लदर्धेनचमासतः॥ आद्ययामादितोज्ञेयंफलंयामचतुष्टये ४॥ अथशुभस्वप्ननिवेदन
क्रमः॥ प्रातःस्नानंचसंध्यादिविधायगुरुसन्निधौ॥ तत्समानसमीपेवादेवतानिकटेथ
वा॥ १॥ नत्वाकृतांजलिःसर्वंवाच्यंदृष्टंवदेवहि॥ शुभस्वप्नेपुनस्वापोनकर्त्तव्यः॥ कदाचित्॥ अ

॥सो॰क॰॥ न कर्तव्यः॥ कदाचितु॥ अशुभ स्वप्न दर्शने प्रायश्चित्तं॥ मंत्रराजं परित्यज्य तु नृसिंहं प्राणार्थं बीजं जपेत्॥ नृसिंहबीजं दद्वे शिशुचिह्नतो दुर्दुरुमुखः॥ प्रार्थना मंत्रास्तु॥ नृसिंहाय नमो दोषानुज्जहि दुःस्वप्नजोन्मम॥ यतः स्वप्नाधिवस्त्वं वै सर्वेषां फलदो मतः॥ नृसिंहबीजं तुष्टौ इति॥ अथ सिद्ध चिन्हानि॥ आश्चर्य दर्शनं चित्तप्रसादो स्यारानस्तथा॥ अल्पनिद्रा मनाल्हासः॥ सिद्धि चिन्हानि शांकरी॥ अथ प्रसंगानु दशमाहाविद्यादि सर्व मंत्र शोधनमष्ट प्रकारं॥ दीक्षाकालेथवा मंत्रे अष्ट चक्रं सुशोधयेत्॥ एकवर्णस्त्रिवर्णोवा पंचार्णो सवर्णकः सप्तार्णो वसुवर्णश्च नवार्णो वा दशार्णकः॥ एवं शतार्णवर्णो वा शोधयेच्छ्रीगुरुर्मुखात्॥ उदितं योनि चक्रं च नक्षत्रं भूत चक्रकं॥ राशि चक्रं च सिद्धारि धनर्णक्रूणवश्यकं॥ एवं संशोधितं चक्रं मंत्रो भीष्टं च सिद्धिदं॥ चक्रोद्धारः प्रथम उदित चक्रोद्धारः॥ उदि

॥श्री॥

॥६०॥

तंचक्रमुद्धारंषट्कोणंचलिखेद्बुधः॥ कोणमध्येलिखेद्वर्णंअकारादिषुहंतकं॥ ऋॠऌ
ॡचवर्ज्यस्याद्जयिचनपुंसकं॥ प्रथमेसंपदाप्राप्तिद्वितीयेधनसंपदः॥ तृतीयेसुखसंप
त्तिश्चतुर्थेबंधुविग्रहः॥ पंचमंतुभवेद्व्याधिःषष्ठेसर्वस्यसंक्षयः॥ नामवर्णाधिमारभ्यमं
त्रवर्णाद्यधिक्रमात्॥ जन्मर्क्षंवाप्रसिद्धंवानामग्राह्यविशोधयेत्॥



उदितेकगुणंप्रोक्तंदद्याच्छिष्यायमांत्रिकः॥ उदित
चक्रस्यएकगुणंफलंभवति॥ योनिचक्रंविचार्यैवं
नामर्क्षजन्मसिद्धिदं॥ मन्तुनक्षत्रपर्यंतंआदियोनिं
त्यजेद्बुधं॥ ऊर्ध्वरेखादशप्रोक्तातिर्यग्रेखाचतुष्ककं॥
तेनकोष्टानिजायंतेअष्टविंशानिसंख्यया॥ लिखेन्म॥

।सो॰क॰॥ ॥२१॥

ध्येचनक्षत्रंरेवत्यंतंचपार्वती॥अश्विनीअश्वयोनिश्चभरणीगजएवच॥कृत्तिकामेषकश्चैवरोहिसर्पएवच॥उरगोमृगशीर्षश्चआरद्राश्वानएवच॥पुनर्वसुश्चमार्जारःपुष्येमेषस्तथैवच॥अश्लेषाचैवमार्जारमघामूषकएवच॥पूर्वाफल्गुन्यकेमूषधेनुश्चोत्तरफाल्गुनी॥महिषीहस्तकृक्षस्यचित्राव्याघ्रप्रदर्शिनी॥स्वातीचमहिषीप्रोक्ताविशाखाव्याघ्रसंज्ञका॥अनुराधातथाज्येष्ठामृगाद्दोश्वानमूलकं॥पूर्वाषाढोत्तराषाढावानरंनकुलंतथा॥अभिजिन्नकुलश्चैवश्रवणेवानरस्तदा॥धनिष्टासिंहकश्चैवशतभिर्हयसंज्ञकं॥पूर्वाभाद्रपदाश्चैवोत्तराभाद्रकेततः॥सिंहधेनुश्चरेवत्यागजयोनिरितीरितः॥अश्वश्चमहिषीवैरंगजसिंहरिपुस्तथा॥नकुलंचतथासर्पमार्जारंमूषकोररिः॥गोव्याघ्रंचतथावैरंमृगश्वानंरिपुंतथा॥मेषकंवानररिपुंगणितंनाममंत्रकं॥एभिर्मंत्रैरिपुर्ज्ञेयंसर्वदावर्जयेध्रुवं॥योनिचक्रंविचार्यैवंद्विगुणंच

॥श्री॰॥ ॥२१॥

फलंलभेत्॥इतियोनिचक्रस्यद्विगुणंफलंभवति॥नक्षत्रचंक्रंदेवेशिसप्तविंशतिकोष्टकं॥अ
श्विन्यादिष्वकारांतंरेवत्यंलक्षसंज्ञकं॥नेत्राभूगुणावेदक्ष्माधरानयनभूभुजः॥द्विचंद्रभुजबा
ह्न।क्षीभूनेत्रत्रिधरागुणाः॥

६

एकैकभूभुजेक्षीरामचंद्रानुभानुषु
भानुषु॥अन्यप्रकारः॥पक्षेंद्व
स्यब्धींदुरूपाक्षींद्वब्यब्धींदुले
चनां॥नेत्रनेत्रेंद्वाब्धिरामचंद्रा

अश्विनि अश्व	भरणी गज	कृतिका मेष	रोहिणी सर्प	मृग सर्प	आर्द्रा श्वान	पुनर्वसु मार्जार	पुष्य मेष	अश्लेषा मार्जार	
मघा मूषक	पूर्वा मूषक	उत्तरा गो	हस्त महिषी	चित्रा व्याघ्र	स्वाती महिष	विशाखा व्याघ्र	अनुराधा मृग	ज्येष्ठा मृग	
मूल श्वान	पूर्वाषा- वानर	उत्तराषा नकुल	अभिजि नकुल	श्रवण वानर	धनिष्ठा सिंह	शतभि- अश्व	पूर्वाभा- सिंह	उत्तराभा धेनु	रेवती गज

क्षीद्विंदुचंद्रमाः॥पक्षेंद्वब्ध्यब्धिसंख्यावर्णान्भेषुक्रमाल्लिखेत्॥अश्विन्यादिष्वकाराद्यांस्व
रांस्योक्षांततोन्यसेत्॥क्षांतौबिंदुविसर्गौतुपूषाभागेन्यवस्थितौ॥भेषुअश्विन्यादिनक्षत्रेषुअका

।।सो॰ क॰।। ।।१३२।।

रादिवर्णादिनू एकद्वित्रिक्रमादित्यर्थः।। स्वनक्षत्रादि गणयेन्मंत्रनक्षत्रतंक्रमात्।। नवभिस्तुविभ ज्याथशेषाज्ञेयंक्रमात्फलं।। अश्विन्यादिषुविज्ञेयो आदिवर्णक्रमाद्बुधैः।। जन्मसंपद्विपक्षेमप्रत्य रिःसाधकोवधः।। मैत्रंपरममैत्रंचगणनीयंस्वनामभाक्।। विपद्वधःप्रत्यरिश्चत्यजेन्मंत्रंभवेध्रुवं।। इति।। साम्यंधनंदुःखसुखशत्रुमित्रविनाशकः।। सोऽन्यंसर्वेष्टलाभश्चततन्मंत्राद्विजायत।। इति ताराचक्रस्यत्रिगुणं फलंभवति।। भूतच क्रंतथाप्रोक्तंमनुंप्राप्य चतुर्गुणं।। ऊर्ध्वरेखा

अश्विनी अ आ	भरणी इ	कृत्तिका ई उ ऊ	मृग ए	आर्द्रा ऐ	पुनर्वसु ओ औ	तिष्य क	आश्लेष ख ग घ	रोहिणी ऋ ॠ लृ ॡ
मघा घ ङ	पूर्वाफा॰ च	उत्तराफा॰ छ ज	चित्रा ट ठ	स्वाती ड	विशाखा ढ ण	अनुराध त थ द	ज्येष्ठ ध	हस्त झ ञ
मूल न प फ	पूर्वाषा॰ ब	श्रवण म	धनिष्ठा य र	शतभि॰ ल	पूर्वाभा॰ व श	उत्तराभा॰ ष स ह	रेवती अं अः ळ क्ष	श्रवण म

त्रयंप्रोक्तातिर्यग्रेखाकुलसुस्वथा।। स्वंकुलान्यकुलान्याथमंत्राणांभेदउच्यते।। प्रकृतिःपंचभूतात्मात

।।श्री॰।। ।।१३२।।

त्तोजातेतुमातृका॥तस्माद्वर्णातुपंचाशत्यंचभूतमप्ययथा॥तृतीयवर्णकाकर्णाओवत्वाभूमिका
मता:॥उऊगजडदबलओधरावर्णकंतथा॥नासेओवर्गतुर्यश्चवसोवर्णाःस्मृताअपां॥ऋॠ
औघझढधंभवसोवर्णदशास्मृताः॥नेत्रेद्वितीयवर्णानामेरक्षास्तेतजकात्मकाः॥इईऐखछठथफ
रक्षवर्णश्चतेजसाः॥वर्गाद्यानंतझिंटीशाअयषामारुतामताः॥अआएकचटतपयषवर्णदश
स्तथा॥वर्गांतिमाःकपोलौशहांतिबिंदुश्चव्यंजनाः॥ऌॡअंङंञणनमंशंहमाकाशवर्णकं॥
विसर्गस्तुप्रकृत्यासासर्वभूतस्तुसंयुतः॥प्राणेरितोविनिर्यातंकंठादिस्थानमस्पृशन्॥पा
र्थिवादिकवर्णानांस्वकीयाःस्वकुलाभिधाः॥पार्थिवस्यतुवर्णस्यमित्रंवारुणमक्षरं॥तैजसंश
त्रुभूतंस्यादुदासीनंतुमारुतं॥जलोद्भवस्यवर्णस्यपार्थिवंमित्रमीरितं॥सपत्नंवन्हिसंयु
क्तंउदासीनंतुवायवं॥पावकस्याथवर्णस्यमित्रंवारुणउच्यते॥विद्वेषीवारुणंवर्णउदासीन

स्तु पार्थिवः॥ पवनो स्थितमित्रस्य मित्रं वन्हिसमुद्भवं॥ शत्रुः पार्थिववर्णस्य उदासीन जलोद्भवं॥
चतुर्णपार्थिवादीनां आकाशार्णः सखा सदा॥ मन्त्रसाधकनाम्नोपि कोवर्णो वादिमो तयोः॥
स्वकुलादिकभेदस्तु शोध्यो मंत्र प्रदिः सदा॥ स्वकुले भीप्सिता सिद्धिः सिद्धि मित्रेपि कीर्त्तिता॥
अमित्रे मरणं रोग उदासीने न्नस्तु किंचन॥ उदासीनस्तु मित्रं च अमित्रं दूरेण वर्जयेत्॥ स्वकुलमि
त्रभक्तं च गृण्हीयाद्दिष्टकामुकः॥ नक्षत्रेष्वपि संप्रोक्तं स्वकुलं नाममंत्रयोः॥ एवं कुलाकुलचक्र
स्य चतुर्गुणं फलं भवति॥ अथ राशिचक्रं॥ राशिचक्रं तथा प्रोक्तं कोष्टं द्वादशकं तथा॥ मेषा
दि मीन पर्यंत मकारादिस्तु हं स्मृतं॥ पंच ह्रस्वाः पंच दीर्घाः संधयः पंच खादयः॥ शांतश्च नव वर्गा
स्युरग्न्यब्ध्यश्वींद्विषुमातृ॥ कषवर्णो क्षकारश्च विसर्गश्च हकारकः॥ अ आ इ ई मेषकश्च उ ऊ
ऋ ॠ वृषभस्तथा॥ ऌ ॡ मिथुनः प्रोक्तः ए ऐ कर्कटकस्तथा॥ ओ औ सिंहकन्या अं अः शषस

हस्तथा॥ तूलश्चैव कवर्गश्च वृश्चिकस्य चवर्गकं॥ टवर्गं धनराशिं च तवर्गं मकरं तथा॥ पव

र्गं कुंभकं प्रोक्तं यवर्गं मीनकं तथा॥ वेदाग्न्यग्न्यक्षिनेत्राब्धी

बाणेष्विषु शराः शराः॥ अब्धिसंख्याः शादयस्तु कन्यायां

मेषतो लिखेत्॥ स्थितिसंपद्भ्रातृ बंधुपुत्रारिस्त्रीमृतिः सुकृ

त्॥ कर्मलाभव्ययस्तेषां फलानि क्रमतो भवेत्॥ तत्रत्यजे

द्रिपुमृतिव्ययानाम गुणैर्युतः॥ पंचमं तु गुणं प्रोक्तं राशि

पृथिवी	उ ऊ ओ ग ज ड द ब ल
अप	ऋ ॠ औ घ झ ढ ध भ व स
तेज	इ ई ऐ ख छ ठ थ फ र क्ष
वायु	अ आ ए क च ट त प य ष
आकाश	ऌ ॡ अं ङ ञ ण न म श ह

चक्रफलं भवेत्॥ राशिचक्रस्य पंचगुणं फलं भवति॥ इति राशिचक्रम्॥ अथ सिद्धारिचक्रं

साधकानां शीघ्रसिद्धिं मंत्रासिद्धिमथो ब्रुवे॥ साधकस्य तु नामानि वर्णमारभ्य शोधयेत्॥

मंत्राद्यक्षरपर्यंतं चक्रे सुद्धारिके क्रमात्॥ जन्मर्क्षार्थं प्रसिद्धं वा नामग्राह्यं विशोधने॥ उद्धृगाः

पंचरेखास्युपंचत्रियगताःपुनः॥कोष्टानितत्रजा
यंतेषोडशैवात्रसंलिखेत्॥भूरामशिवनंदाक्षीवे
दार्कदिग्मासाष्टभिः॥कलाभनुशरैरद्रितिथिविश्वे
र्मितेषुच॥अथद्वितीयप्रकारः॥अकथादिचतुः
ष्कस्वारूपाभूताद्विपष्टकाः॥विश्वानंदेंदुदिग्वेदा
वस्वाग्निःस्वरभूमिपाः॥मार्तंडातिथिरुद्राःस्युरका
राद्याःस्वराःक्रमात्॥एवंकादीरतुवर्णश्चहांतश्चे
तिलिखेद्बुधः॥कोष्टेषुमातृकावर्णातत्रनामा
दितक्रमात्॥सिद्धसाध्यःसुसिद्धोरिर्ज्ञेयोमन्वक्षरावधि॥यस्मिन्चतुष्केनामार्णस्तस्यासिद्ध

वृषभ उऊऋ २ मिथुन ॠऌॡ ३	मेष १ अआइई	मीन १२ यरलव कुंभ ११ पफबभम
कर्क ४ एऐ	राशिचक्रम्	मकर १०
सिंह ५ ओऔ कन्या ६ अंअःशषसह	तूल ७ कखगघङ	धन ९ टठडढण वृश्चिक ८ चछजझञ

चतुष्टयं॥आद्यक्षिरण्या द्वितीयंस्यात्साध्याख्यं ततृतीयकं॥सुसिद्धाख्यं चतुर्थंतु सप

त्नाख्यंस्मृतोबुधैः॥एककोष्टे द्वयोवर्णाः सिद्धसिद्धः प्रकीर्तिताः॥तद्वितीयेमंत्रवर्णाः सि

द्धसाध्यउदाहृतः॥तृतीयेसिद्धःसुसिद्धः सिद्धारिस्याच्चतुर्थके॥नामार्णयुग्चतुःकोष्टा

मन्त्रवर्णश्चद्वितीयके॥चतुष्के तत्र पूर्वे तु यत्रनामाक्षरं स्थितं॥तत्र तत्कोष्टमारभ्यगणये

त्पूर्ववत्क्रमात्॥साध्यसिध्यः साध्यसाध्यस्तत्सुसिद्धश्चतद्रिपुः॥एवंज्ञेयंतृतीयेचच

तुष्केमंत्रवर्णकः॥तदापूर्वोक्तयारीत्याक्रमाज्ञेयंविचक्षणेः॥सुसिद्धसिद्धस्तत्साध्यस्त

त्सुसिद्धश्चतद्रिपुः॥चतुष्के तु चतुष्के तु अरिसिद्धोरिसाधकः॥तत्सुसिद्धोर्यरिः पश्चा

देवं मंत्रविचारयेत्॥सिद्धःसिद्धोयथोक्तेनद्विगुणात्सिध्यसाध्यकः॥सिद्धःसुसिद्धोर्ध

जपात्सिद्धारिर्हंतिबांधवान्॥साध्यंसिद्धोनिरर्थश्चतत्साध्योहंतिगोत्रजान्॥तत्सुसिद्धो

॥सौ॰क॰॥ ॥२५॥

द्विघ्नरोगाःसाध्यारिर्वंशहानिकः॥सुसिद्धसिद्धो र्धजप्राप्तःसाध्योद्विगुणोजपात्॥ नःसुसिद्धोगृहादेर्वसुसिद्धारिःकुटुंबहा॥अरिसिद्धःसुतंहन्यादरिसाध्यस्तुकन्यका॥ नःसुसिद्धस्तुपत्नीघ्नस्तद्वरिःसाधकापहः॥आद्यचतुष्केकोष्ठेतुअकथहलिखेद्बुधः॥ नद्वितीयेउङपश्वलृक्षमस्ततृतीयकं॥चतुर्थेओडवश्चेतिसिद्धकोष्ठचतुष्टयं॥द्वितीयेचचतुष्केषुआद्येचाखदलृंतथा॥द्वितीयेईचफप्रोक्तातृतीयेलृञयस्तथा॥ओढशश्चतुर्थेष्कोष्ठासाध्यकोष्ठश्चनिर्णयः॥सुसिद्धश्चैवतृतीयेइगधक्षाद्यकोष्ठके॥द्वितीयेऋछबश्चैवतृतीयेएटरस्तथा॥चतुर्थेअंणषप्रोक्तासुसिद्धश्चेतिनिर्णयः॥चतुष्केचाद्यचत्वारिईघनश्चाद्यकोष्ठकं॥ऋजभश्चद्वितीयेषुतृतीयेएटलृस्तथा॥विसर्गेंतुनसःप्रोक्ताअरिकोष्ठश्चनिर्णयः॥एवंषोडशकोष्ठेषुएकपंचाशदर्णवान्॥अन्यप्रकारः॥नाम्नामंत्रस्यवर्णा

॥श्री॰॥ ॥२५॥

ष्व लिखित्वाथ तिवर्णकं ॥ सिद्धादिगणनाकार्या यावन्मंत्रसमापनं ॥ नामोयदि समासिद्वैपु
नर्नामिलिखेत्सुधीः ॥ एवं संशोधितेषु स्युर्भूरयः साध्यवैरिणः ॥ अस्याः सिद्धा सुसिद्धा
श्च अशुभं स्युरुक्रमाच्छुभं ॥ अन्यप्रकारः ॥ मतमित्थं तु केषांश्चित्तदपि प्राप्यं लमनुं ॥ अ
थवा वैष्णवे पक्षे सिद्धादीनां विशोधने ॥ द्वादशारे लिखेच्चक्रं वर्गाश्चन्युदितः क्रमात् ॥
ईशानांतमकाराद्यान्हांतां षंढं विवर्जयेत् ॥ तत्र नामाद्यमारभ्य मंत्राद्यर्णान्वधि क्रमात् ॥ गणयेत्सि
द्धसाध्यादिफलं तेषां विनिर्दिशेत् ॥ सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः ॥ सुसिद्धः प्राप्ति
मात्रेण साधकं भक्षयेदरिः ॥ सिद्धो नवैकबाणेषु साध्यो रसदशाक्षिषु ॥ सुसिद्धस्त्रिमुनिःशेषु
रिपुर्वेदाष्टभानुषु ॥ अन्यप्रकारः ॥ अन्योपिह प्रकारोस्ति सिद्धसाध्यादिशोधने ॥ चतुःकोष्ठेषु
विलिखेद्दादिवर्णान्पुनः पुनः ॥ नामार्णात्सिद्धसाध्यादिज्ञेयो मन्वक्षरावधिः ॥ अन्यप्रकारः ॥ पंच

।सौ॰क॰।।
।।२६।।

मोपिप्रकारोस्तिसिद्धादीनांविशोधने।।नाम्नोमंत्रस्यवर्गौघंचतुर्भिर्विभजेत्सुधीः।।एकादिशेष सिद्धादिक्रमाज्ज्ञेयंविचक्षणैः।।अन्यप्रकारः।।चतुश्चतुष्कंतज्ज्ञात्वायत्रनामाद्यमक्षरं।।तस्मादृ ण्यादिमंत्रांतंकोष्ठानिगणयेत्पृथक्।।चतुश्चतुष्कंप्रत्येकंप्रादक्षिण्यक्रमेणतु।।सिद्धसिद्धंसि द्धसाध्यमथसिद्धसुसिद्धकं।।सिद्धारिंचापिदेवेशिसाध्याद्यानिपुनःक्रमात्।।चत्वार्यथसुसिद्धा द्यान्यपिचत्वारिवैपुनः।।रिप्वादीन्यपिचत्वारितेषांदेविफलंशृणु।।उक्तजपाद्द्विगुणतःप्राप्ति मात्राच्चसिध्यति।।प्राप्त्यास्वबांधवमृतिररातिक्लेशेनसिध्यति।।दुःखकृत्सिद्धिकृतद्वद्धन नाशस्तथेहदः।।सिद्धिरुक्तस्तपास्तद्वत्सहकृदुच्चारणंभवेत्।।हानिदस्त्रीसुतभ्रातास्व नाशपरतक्रमात्।।इतिसाध्याद्यानित्येस्यसाध्यसिद्धंसाध्यसाध्यमित्यर्थः।।एवमग्रे षि।।यत्रनामाद्यवर्णोवर्ततेतच्चतुष्कमारभ्यचतुश्चतुष्कंसिद्धारिनामकं।।नामाक्षरा

।।श्री।।
।।२६।।

पूर्वाक्षरं एलं ऐवं ओवं औवं ईलं ऊवं तत्र पूर्वाक्षरग्राह्यमिति ब्रह्मयामले ॥ यंत्र स्पृष्टी
कृतः ॥ रूपं प्रथम अकारः ॥ भूतपंचम उकारः ॥ अक्षी द्वितीय आकारः ॥ षष्ठकः षष्ठ ऊका
रः ॥ एतच्चतुष्कं प्रथमपंक्तयोल्लेखनीयं ॥ विश्वत्रयोदश
ओकारः ॥ नंदन वमलृकारः ॥ इंद्र चतुर्दश औकारः ॥
दिग्दशम लॄकारः ॥ इति द्वितीयपंक्तयो लेखनीयं ॥ वेदच
तुर्थ ईकारः ॥ वसुअष्टम ऋकारः ॥ अग्निस्तृतीय इकारः ॥ स्व
रास सम ॠकारः ॥ एतच्चतुष्टयं तृतीयपंक्तयोल्लेखनीयं ॥
षोडशाः विसर्गः ॥ मार्तंडा द्वादशा ऐकारः ॥ तिथि पंचदशा अं
कारः ॥ रुद्रैकादशाः एकारः ॥ एतच्चतुष्टयं चतुर्थपंक्तयोल्लेखनीयं ॥ इति ॥ अथ ऋणधनचक्रम् ॥

अकथह १	उङप २	आखह्ळ ३	ऊचफ ४
ओडव ५	लृझम ६	औढश ७	लॄञय ८
इघनङ्ग ९	ऋजभ १०	इगधक्ष ११	ॠछब १२
अःतस १३	एटळ १४	अंणष १५	ऐठर १६

।।सौ॰ क॰।। तिर्यग्रेखाचतुष्कं च ऊर्ध्वाधो द्वादशैव च।। तेन कोष्ठानि जायंते त्रयस्त्रिंशन्मितानि वै।। म
।।१७।। ध्यकोष्ठेषु देवेशि लिखेद्वर्णाननुक्रमेण तु।। अकारादि द्विशो देवि क्षकारं तं च पंचसु।।एका
रादिकमेकैकं षट्कोष्ठेषु लिखेत्क्रमात्।। त्रिराहृत्याककारादि हांतानेकैकशो लिखेत्।।
रसर्तुरसखाग्न्यब्धिवेदखव्योमखाग्नयः।। साध्यांकाऊर्ध्वगा कोष्ठा साधकांकास्त्वधोगताः
।। पक्षाक्षीषुखखखाखेंदुखवेदाब्धींदवः क्रमात्।। मंत्रवर्णा नाम वर्णाः स्वरव्यंजनभेदितः।।स्व
रव्यंजन इति।। तत्र।। भानुषु।। तर्हि।। भ आ नउ षउ इति।। चंद्रमाः।। चनद्रम आह।। हरि।। हर
इ।। विश्वेश्वर।। वइशवएशवर इति एवं प्रकार बोधव्यः।। पृथगंकांस्तु संयोज्य चाष्टभिर्भाग
माहरेत्।। शेषांकं यस्य यस्मात्तु यावद्वाधिकं भवेत्।। तावत्तस्य ऋणं ज्ञेयं धनमंत्रो न सि ।।श्री॰।।
द्धिदः।। अत्र लक्ष्यवर्णस्य।। ळकारस्य सकारो भवति।। क्षवर्णस्य सकारो भवति।। ज्ञकार ।।१७।।

स्यजयक्षबुद्धि॥ अथवैष्णवपक्षः॥ सप्ततिर्यल्लिखेद्रेखाद्वादशैर्वोर्ध्वगाः पुनः॥ तेनकोष्ठानिजा

यंतेकोष्ठषट्षष्टिसंमिताः॥ मनुनक्षत्रयुग्मार्कतिथिषड्द्वेदवन्हयः॥ आयुधावसवोनंदाः

कोष्ठेषुक्रमतःस्थिताः॥ सिद्धांकाऊर्ध्वकोष्ठस्थाःसाधकांकास्त्वधोगताः॥ दिग्चंद्रमुनिवे

दाष्टगुणसप्तेषुसागराः॥ रसाश्वरामसंख्याकाएवमंकाउदीरिताः॥ द्वितीयपंक्तौसंखे

ख्यापंचदीर्घास्थितास्वराः॥ तृतीयपंक्तौकाद्यर्णाटकारांताःशिवैर्मिताः॥ टादिफांताश्चतु

र्थेतुपंचम्यांबादिहांतिमाः॥ षष्ठपंक्तौक्रमात्संख्याअंकाःकथ्यंतएवते॥ मंत्रवर्णान्पृथ

कुर्यात्स्वरव्यंजनभेदितः॥ कोष्ठेयावतिवर्णःस्यादुणयेत्तावदंककं॥ कोष्ठेपरिष्टेनांकेनस

र्ववर्णेष्वयंविधिः॥ दीर्घस्वराणामंकास्तुज्ञेयालब्ध्यक्षरस्थिताः॥ एकीकृत्यलिखेन्नंका

नष्टभिर्भागमाहरेत्॥ शेषांकोमंत्रराशिस्यान्नामवर्णेष्वयंविधिः॥ अधः१क्ति।स्थिरेरं

॥सौ॰क॰॥ ॥१८॥

केर्गुणनीयास्तुते खिलाः॥ वर्णाधिकोंकराशिस्तु नूनो राशिर्धनिस्मृतः॥ मंत्रो यदाधिकांक
स्यात्तदा साध्यो जनीनतु॥ इति॥ अन्यप्रकारः॥ एवं धनर्ण संज्ञोक्तामन्यथा प्रोच्यते पुनः॥ ना
माद्यक्षरमारभ्य यावन्मंत्रादिमक्षरं॥ गणयेन्मातृकावर्णानुक्रमेण गुणयेत्रिभिः॥ विभक्ते
सप्तभिः शिष्टो नामराशिरुदीरितः॥ एवं मंत्रादिमारभ्य यावन्नामादिमक्षरं॥ गणयित्वात्रि
भिर्हत्वा विभजेत्सप्तभिः सुधीः॥ मंत्रराशिस्थितिः शिष्टः पूर्ववद्धनितार्णता॥ यद्वा मंत्राक्ष
राणीह स्वरव्यंजनरूपतः॥ पृथक्कृत्य द्विगुणयेद्योजयेत्साधकाक्षरैः॥ तादृशैरष्टभि
र्भक्तो मंत्रराशिरुदाहृतः॥ एवं नामार्णसंघोपि द्विगुणीकृत्य योजितः॥ मंत्रार्णैरष्टभि
र्भक्तो मंत्राराशिस्मृतो बुधैः॥ ऋणिता धनिता चात्र पूर्ववत्परिकीर्तिता॥ उक्तानितममा ॥श्री॥
र्गेण शोधनीयमृणं धनं॥ यो मंत्रः पूर्वजनुषि सेवितो न ददात्फलं॥ पापात्तापक्षयेजा ॥१८॥

लफलप्राप्तिरनेहसि॥ आयुक्षयाद्धतो नाशः साधकस्य भवांतरे॥ ऋणित्वात्प्राप्तिमा
त्रेण मंत्रो भीष्टप्रयच्छति॥ समांकोयद्युभौराशि तदा संसेवनात्फलं॥ धनिमंत्रस्तु संप्रा
प्तिः फलत्यधिकसेवया॥ धनर्णऋणचक्र
स्य गुणं समफलं भवेत्॥ इति इति ऋणधनचक्र
स्य समगुणफलं भवति॥ इति ऋणधनचक्रम्॥
अथ वश्यावश्य चक्रम्॥ तिर्यग्रेखाः सप्त कं च॥
तथा सप्ताधरोर्ध्वतः॥ भवंति षट्त्रिंशत्कको
ष्ठानि तु महेश्वरी॥ ऊर्ध्वाधः पंक्तिरूपेषु षट्सु
कोष्ठेषु वै क्रमात्॥ तत्राद्य पंक्त्या ऊर्ध्वातु अंका

१४	१७	२	१२	१५	६	४	३	५	८	९
६	६	६	०	३	४	४	०	०	०	३
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ	ए	ऐ	ओ	औ	अं	अः
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट
ठ	ड	ढ	ण	त	थ	द	ध	न	प	प
ब	भ	म	य	र	ल	व	श	ष	स	ह
२	२	५	०	०	२	१	०	४	४	१
१०	१	७	४	८	३	७	[illegible]	४	६	३

।।सौ॰क॰।। ।।१९।।

रादिषड्डुल्लिखेत्।।एकारादीनंत्यपंक्तौ षंढान्मध्यचतुष्टये।।द्वितीयपंक्तौ वर्गाद्यान्तृतीयांश्च द्वितीयकान्।।चतुर्थ्यां तु तृतीयान्वै पंचम्यां च चतुर्थकान्।।पंचमानाद्यंतपंक्तौ द्विधा देवेशि संलिखेत्।।द्वितीयादौ पंचमादौ षसहक्षांस्तथांत्ययोः।।आद्यकोष्ठे तु देवेशि लिखेदंकादितोंऽककः।।प्रादक्षिण्यक्रमेणैव कुंडल्याकारवल्लिखेत्।।थकारे तु समाप्तिर्वै चानेषट्त्रिंशदंककं।।नामाद्यक्षरकोष्ठात्तु मंत्रारंभार्णकोष्ठकं।।गणयित्वा फलं ज्ञेयं क्रमेणांकस्य चेश्वरी।।वश्याव श्येत्तथा सिद्धिर्हानिर्ज्ञेया रिपुः सुखं।।मृतिः शून्यं चेति पुनश्चतुर्था गणये क्रमात्।।आद्येता त्कालिकी सिद्धिर्द्वितीये चास्य कालतः।।तृतीये दीर्घकालेन चतुर्थे परजन्मनि।।एवं नवककोष्ठेषु चतुष्के च चतुष्टयं।।गणयित्वा च नवकं फलं ज्ञेयं विचक्षणैः।।अत्र षडस्वरानूर्ध्वाधो रीत्या लिखे त्।।द्विधा लिखितवर्णानां सविहितं फलं ज्ञेयं।।नवके च मंत्रवर्णनामवर्णत्वा रित्ता त्कालिकी सिद्धि

।।श्री॰।। ।।१९।।

रिर्थः॥एवंसर्वंज्ञायतेतिशिवं॥इतिवश्यावश्यकंचक्रम्॥येषांमनूनांसिद्धादिशोधनंनास्तितान्श्रु
वे॥एकवर्णस्त्रिवर्णोवापंचार्णोरसवर्णकः॥सप्तार्णोनववर्णोश्वरुद्रार्णोरदनाक्षरः॥अष्टार्णोहं
सवर्णोश्वकूटादेवदितोध्रुवः॥स्वप्नलब्धस्त्रियाप्राप्तोमालामंत्रान्नृकेश्वरी॥प्रासादोरविमंत्राश्च
वाराहोमातृकापरा॥त्रिपुराकाममंत्राश्चइत्यसिद्धः
पक्षिनायकः॥बौधमंत्राजैनमंत्रानैषुसिद्धादिशो
धनं॥इतिप्रशंसावाचकः॥सत्यमेवशोधनीयमि
त्युक्तम्॥सर्वविद्येषुमंत्रेषुशुद्धीरावश्यकीमता॥
विद्यामंत्रेस्तवंसत्कंअरिभूतंत्यजेध्रुवं॥अनेक
धाशोधनेचशुद्धोनप्राप्यतेमनुः॥मायाकामंश्रियं

अङ १	कथ २	ख ३	ग ४	घ ५	एङ ६
आञ २०	च २१	छ २२	ज २३	झ २४	ऐञ ७
इण १९	ट ३२	ठक्ष ३३	डल ३४	ढ २५	ओण ८
ईन १८	त ३१	थक्ष ३६	दल ३५	ध २६	औन ९
उम १७	प ३०	फ २९	ब २८	भ २७	अं म
ऊश १६	यह १५	र १४	ल १३	व क्ष १२	अः श ११

॥सौ॰क॰॥ ॥२०॥

चादौदद्यात्तद्दोषमुक्तये॥यद्वा दुष्टोमनुर्जप्तः सिध्येत् प्रणवसंपुटः॥यद्वाक्रमोत्क्रमगयाप्र जप्तोवर्णमातृकया॥यत्र यस्याभवेत् भक्तिर्विशेषात् समनुत्तमः॥वैरिकोष्टमपिप्राप्तोभीष्टद स्तस्यजायते॥बीजमंत्राः कूटमंत्रामालामंत्रास्तथापरे॥त्रिधामंत्रगुणाः प्रोक्ताबुधैरागम वेदिभिः॥बीजमंत्रादशार्णांतास्ततोमंत्रानखावधि॥विंशत्यधिकवर्णायेमालामंत्रास्तुतेस्मृ ताः॥बाल्येवयसिसिध्यंतिबीजमंत्राउपासितुः॥मंत्राः सिद्धायौवनेतुमालामंत्रास्तुवार्द्ध के॥उक्तान्यस्याअवस्थायाअभीष्टप्राप्तयेसुधीः॥बीजमंत्रादिमंत्राणांद्विगुणंजपमा॥ स्त्रीपुंनपुंसकाः प्रोक्ताः मनवस्त्रिविधाबुधैः॥वषडंताःफडंतास्तुपुमांसोमनवस्मृताः॥वौ षट्स्वाहागतानार्योहुंनमोंतानपुंसकाः॥वश्योच्चाटनरोधेषुपुमांसः सिद्धिदायकाः॥क्षु द्रकर्मकजानाशेस्त्रीमंत्राः शीघ्रसिद्धिदाः॥अभिचारेस्मृताः क्लीबाएवंमंत्रेमनस्त्रिधा॥

॥श्री॰॥ ॥२०॥

नक्षत्रशोधनेजन्मनक्षत्रमितरक्षतु॥शोधनेमंत्रभिर्ग्राह्यंप्रसिद्धंजन्मनामिवा॥सुप्तोजा
गर्तियेनासोदूरस्थोपिप्रभाषते॥वदत्यन्यमनस्कोपितंनामग्राह्यमत्रविति॥षट्त्रिंशति
गुणानुमंत्रानुपादनूनंभवेत्फलं॥संख्याश्राद्धंगुणान्मंत्रादर्धंपादंग्रहोन्मितानु॥नरम्मान्यून
गणान्मंत्रःफलन्नैव
प्रयच्छति॥अत्रसा
धकस्यजन्मनक्षत्रं
ग्राह्यं॥यदितन्नज्ञाय
तेतर्हिप्रसिद्धंग्राह्यं॥

अ	व	क	ह	ड	म	ट	प	र	त	न	य	भ	ज	ख	ग	स	द	च	ल	
इ	वि	कि	हि	डि	मि	टि	पि	रि	ति	नि	यी	भी	जि	खी	गि	सि	दी	ची	लि	
उ	वु	कु घ ङ छ	हु	डु	मु	टु	पु ष ण ठ	रु	तु	नु	यु	भु ध फ ढ	जु	खु	गु	सु	दु थ झ ञ	चु	लु	
ए	वे	के	हे	डे	मे	टे	पे	रे	ते	ने	ये	भे	जे	खे	गे	से	दे	चे	ले	
ओ	वो	को	हो	डो	मो	टो	पो	रो	तो	नो	यो	भो	जो	खो	गो	सो	दो	चो	लो	

नामनक्षत्रादिकंतत्स्वज्योतिषःशास्त्राज्ज्ञेयं॥तस्यचक्रंअत्रउदितचक्रयोनिचक्रभचक्रभतच

॥सो॰क॰॥
॥२१॥

क राशिचक्र सिद्धारिचक्र ऋणधनचक्र वश्यावश्यकचक्राणां अथोत्तरं एक द्वित्रिचतुः पंचषट्सप्तमाष्टगुणं फलं भवतीत्यर्थः॥ उदित्तचक्रस्यैकगुणं फलं भवति वश्यावश्यं तु षट्त्रिंशत् गुणं भवति॥ अथ सिद्धारि धनऋणवश्यावश्यकचक्रशोधनं च नाममंत्रयोराद्याक्षरस्याद्याक्षरेण द्वितीयस्य द्वितीयेनेरीत्या सर्वेषां मंत्राणां कर्तव्यं मंत्रवर्णाक्षराधिकश्चेल्लिपुनर्नामावृत्या नामाक्षराधिक्ये मंत्रावृत्या शोधयेदेवं सर्वमंत्राक्षरस्युद्वं मुख्यं फलं आद्यंतयोः शुद्धो मध्यम फलं॥ आदिशुद्धो अधमं फलं इति॥ ऋणधनचक्रे ऋणधनयोः शून्यं मंत्रं परित्यजेत्॥ अष्टचक्रशोधनं अवश्यके नोक्तं॥ अथ कूर्मचक्रं वास्तुचक्रं देशचक्रं च ग्रामकं॥ तिथिपंचगुणं प्रोक्तं कृत्तिकाद्यक्षसंयुतं॥ तयोर्द्वादशमिश्राणि नवभागेन भाजितं॥ चंद्रवेदमुनिजले शरपक्षवसुस्थले॥ त्रिषट्नवमा


॥श्री॥
॥२१॥

कारोत्रिविधंकूर्मलक्षणं॥जलेसर्वत्रकार्याणिस्थलेसर्वंविनश्यति॥आकाशेमरणं
प्रोक्तंत्रिधाकूर्मस्यलक्षणं॥इतिनैमित्तिकेअवश्यंचिंतयेत्॥अथहोमेआहुतीमुखविचा
र्यते॥सैकातिथिर्वारयुताकृतासाशेषेगुणभ्रेभुविवह्निवासः॥सौख्यायहोमेशशियुग्म
काशानंदनाथश्री॰।६।मंशात्तयाकाशानंदनाथश्री॰।६।ठंखंन्याकाशानंदनाथश्री॰६।वंध्व
निमात्राकाशानंदनाथश्री॰६।रंअनाहताकाशानंदनाथश्री॰६।यंइंद्वाकाशानंदनाथश्री॰६।
उंबिंद्वाकाशानंदनाथश्री॰।। इतिनवनाथन्यासः।।२।।अथषोडशमूर्त्तविद्यान्यासः।।पूर्वब्रह्म
निरेखासुचकंपंचकंमध्येचैकमितिन्यसेत्।६।स्वच्छप्रकाशपरिपूर्णपरापरसिद्धविद्या
कुलयोगिनीह्रींकुलयोगिन्यंबाश्री॰सः।६।ह्सौः स्वात्मानंबोधयबोधयस्हौः प्रासादपरां।
बाश्री॰सः।६।ऐंक्लींक्लूंक्लिंन्नेक्लेदिनिमहामदद्रवेक्लींक्लेदय२क्लींक्लींमोदय२ह्रींश्रींक्लींनमःस्वा
हा।अतिरहस्ययोगिन्यंबाश्री॰मः।६।हंसःस्वच्छानंदपरमहंसपरमात्मनेस्वाहासहश्रौं।।शां
भव्यंबाश्री॰म॰।६।ह्रींनित्यस्फुरच्चैतन्यनंदमयेमहाबिंदुव्यापकंमातृकास्वरूपिणीऐंईंह्रींचि
ल्लेखांबाश्री॰६।ऐंह्रींश्रींस्वच्छप्रकाशांमिके ह्रींकुलमहामालिनिऐंकुलगर्भमातृकेह्रींऐंसम

।सौ॰ क॰ १ यविमर्लेश्रीसमयांबाश्री॰मः।६। हंसःनित्यप्रकाशांत्मिकेकुलकुंडलिनिअज्ञासिद्धिमहा
॥२॥ भैरविआत्मानंबोधय२अंबेभगेनिह्रींहूंपरापरबोधिन्यंबा॰मः।६। ॐमोक्षंकुरुकुल
पंचाक्षर्यंबामः।६। ह१४सौःअनुत्तरापंचदशाक्षर्यंबामः।६। ऐंशुद्धसूक्ष्मनिराकारनिर्वि
कल्पपरब्रह्मस्वरूपिणिक्लींपरमानंदशक्तिःसौःशांभवानंदनाथश्रीअनुत्तरेकौलविद्यां
बाश्री॰मः।६। हंसःसोहंस्वच्छानंदपरहंसपरमात्मनेस्वाहागुरुत्तरविमर्शिन्यंबा॰मः।६। अ
नामाख्यव्योमातीतनाथपरापरव्योमातीतव्योमेश्वर्यंबा॰ह्रींश्रींअनामाख्यांबाश्री॰मः॥
ऐंईंऊंसंकेतविद्यांबाश्री॰मः।६। ह्रींभगवतिविश्वेवाग्वादिनिक्लींमहाहृदयमहामतंगिनि
ऐंक्लींब्लेंब्लूंह्रींअनुत्तरवाग्वादिन्यंबाश्री॰मः।६। झैंह्स्क्लौंझौःअनुत्तरशांकर्यंबा॰मः।६। ॥श्री॰१
ह१२सर्वानंदमयबैदवचक्रेपरब्रह्मस्वरूपिणिपरामृतशक्तिःसर्वमंत्रेश्वरिसर्वपीठेश्व ॥२॥

रिसर्वयोगीश्वरीसर्ववीरेश्वरिसर्ववागीश्वरिसर्वविद्येश्वरिसकलजगदुत्पत्तिमातृकास
चक्रासदेवतासासनासमुद्रासिसिद्धिःसायुधासवाहनासालंकारासचक्रेशकापरयाअ
परव्यापरापरयासपर्ययासर्वोपचारैःसंपूजितासंतर्पितास्तुश्रीमहात्रिपुरसुंदरिपूर्णविं
द्यांबाश्री॰मः॥इतिषोडशमूलविद्यांबान्यासः॥अथषोडाधारन्यासः॥ललूत्रिकोणाग्रको
णमारभ्यवामावर्तेनत्रिषुकोणेषुवामपृष्टदक्षपार्श्वेषुच।६।हंसःस्वात्मानंदविभूत्येस्वा
हाआधारविद्याश्रीपादुकायैनमः।६।सोहंपरमहंसविभूत्येस्वाहास्वधिष्टानविद्याश्री॰
मः।६।हंसःसोहंस्वच्छानंदपरमाहंसपरमात्मनेस्वाहामणिपूरविद्याश्रीमः।६।हंसःस्वा
त्मानंबोधय२स्वात्मानंदनाथअनाहतविद्याश्री॰मः।६।सोहंपरमात्मानंबोधय२परमा
त्मानंदनाथविशुद्धविद्याश्री॰मः।६।इतिषडाधारन्यासः॥षडध्वन्यासः॥पूर्ववत्षट्सुस्थाने

॥सो॰क॰॥
॥३॥

षु।६। हंक्लींवर्णाध्वश्रीपादुकायैनमः।६।हंऐंपदाध्वश्रीपादुकायैनमः।६।हंह्रींमंत्राध्वश्री॰
मः।६।हंसौःकलाध्वश्री॰मः।६।हंश्रींतत्वाध्वश्री॰मः।६। हंमूलंभुवनाध्वश्री॰मः।६।इतिषड
न्यासः॥अथषट्दर्शनन्यासः॥पूर्ववत्षट्सुस्थानेषु।तारेतुतारेस्वाहा॥नारादेव्यधिष्ठित
बौद्धदर्शनश्री॰मः४।तत्सवितु॰यात्परोरजसेसावदोम्।ब्रह्मदेवताधिष्ठितवैदिकदर्श
नश्री॰मः४।ओंहौंरुद्रदेवताधिष्ठितशैवदर्शनश्री॰मः।४।हांह्रींहंसःसूर्यदेवताधि(
ष्ठितसौरदर्शनश्री॰मः।४।ॐनमोनारायणायविष्णुदेवताधिष्ठितवैष्णवदर्शनश्री॰
मः।४ह्रींभुवनेश्वरीदेवताधिष्ठितशाक्तदर्शनश्री॰मः॥इतिषट्दर्शनश्रीन्यासः॥अथष
ड्योगिनीन्यासः॥षट्स्थानेषु।४।डांडींडुंडैंडौंडः।डाकिनीश्री॰मः४रांरीं॰।रःराकिनीश्री॰
मः।४।लांलीं॰लःलाकिनीश्री॰मः।४।कांकींकःकाकिनीश्री॰मः।४।सांसीं॰सःसाकिनी

॥श्री॰॥
॥३॥

श्री॰ स ः।४। हां॰ हः।४ हाकिनी श्री॰ मः। इति षट् योगिनी न्यासः। अथ चरणन्यासः। संघट्ट
मुद्रा त्रिकोणस्य अग्रादि वामतः कोणेषु मध्ये च।४। क।४। हंसः रक्त चरणाभ्यां नमः रक्त
चरण श्रीपादुकां पूजयामि नमः।४। ह ५ सोहं शुक्ल चर॰ मः शुक्ल चरण श्री॰ मः।४। स ३ हंसः
सोहं मिश्र चरण मः। मिश्र चरण श्री॰ मः।४। मूलं हंसः शिवः सोहं हंसः निर्वाण चरणाभ्यां नमः
निर्वाण चरण श्री॰ मः।। इति चरणन्यासः। त्रिकोणस्य दक्ष वाम पार्श्वयोः।४। ह्स्रैं ह्स्क्ल्ह्रीं ह्सौः चि
त्प्रकाशानंदनाथ सहज परांबा श्री॰ मः।४। ह्सौः ह्स्रैं श्रीं ह्रीं ऐं श्रीं ह ५ शांतानंदनाथ सहज परां
बा श्री॰ मः। अग्रादि वामतः कोणेषु।४। ह्स्त्रौः ह्स्त्रौः शुक्ल विद्या महापीठ शुक्ल पुष्प शुक्ल मंडल म
हापीठ शुक्ल रूप शुक्ल मंत्र महापीठ शुक्ल दीप शुक्ल मुद्रा महापीठ शुक्ल नालि महाप्रकाशानंदनाथ
ह्स्त्रौः ह्स्त्रौः ह ५ शुक्ल विद्या श्री॰ मः।४। स्हौः स्हौः रक्त विद्या महापीठ रक्त पुष्प रक्त मंडल महापीठ र

।सो॰क॰।। क्तरूपरक्तमंत्रमहापीठरक्तद्वीपरक्तमुद्रामहापीठरक्तनतिमहाप्रकाशिनिपरांबा स्हौः स्हौः

।।४।। ह५रक्तविद्या॰म।४।ज्झौः स्हौः मिश्रविद्यामहापीठमिश्रपुष्पमिश्रमंडलमहापीठमिश्ररूपमि

श्रमंत्रमहापीठमिश्रद्वीपमिश्रमुद्रामहापीठमिश्रनतिमहाप्रकाशानंदनाथज्झौः स्हौः सा।३।

मिश्रविद्यांबा॰मः।।वामपृष्ठदक्षपार्श्वमध्येच।४।ऐं ह्स्क्षं स्क्ष्म्र्यूं श्रीं नवात्मानंदनाथऐं क्लीं स्त्रीं कि(

णि२विच्चे ह्सैं ह्स्क्ष्म्र्यूं निष्कलसमयपरांबा॰मः।४।ह्स्क्ष्म्र्यूं श्रीपरापावकश्री॰मः।४।स३श्रीकाम

दुघे अमोघे वरदे विच्चे स्फर२श्रीं श्रीं श्रीं स्वाहा ह्रीं ॐ ह५कुलकामधेनुश्री॰मः।४।ह५अहम

स्मि निर्वाणानंदनाथ ह६४ अः हंसः सोहं ॐ ह्रां ह्रौं स्वात्मप्रकाशानंदनाथश्री॰मः।।इतिशांभ

वविद्यान्यासः।।अथशांभवचरणन्यासः।।पूर्ववत्संघट्टमुद्रया।कोणेषुमध्येच।४।क५ई ।।श्री॰।।

हंसः प्रकाशचरणाभ्यान्नमः प्रकाशचरणश्रीपादुकापूजयामिनमः।४।ह५ई सोहं विमर्श ।।४।।

चरणमः।विमर्शचरणश्री·मः ४ स३ ईं हंसः सोहं प्रकाशविमर्शचरणाय नमः प्रकाशविमर्शचर
णश्री·मः।४। मू· ईं हंसः शिवः सोहं अं अः निर्वाणचरणा· सः निर्वाणचरणश्री·मः पुनः क्रमे
ण।४। ह ४ ईं हंसः प्रकाशमः प्रकाश·मः ४ ह ५ ईं सोहं विमर्श·मः विमर्श·मः ४ स३ ईं हंसः सोहं
प्रकाशविमर्शमः विमर्श·मः प्रकाशविमर्शचरणमः।४। ह २४ ईं हंसः शिवः सोहं अं अः निर्वाण·
मः निर्वाणचरण·मः। इति शांभवचरणन्यासः॥ अथ कामकलान्यासः। मध्ये ४ ईं सकलस
च्चिदानंदनाथ·मः।४। निष्कलानंदनाथ·मः ४ ईं सर्वानंदनाथ·मः ४ ईं सच्चिदानंद परमसंवि
दि ईं ईं स पराई कलानाथवक्त्रश्री पादुकायेनमः। इति मुखे ४ ईं सच्चिदानवबिंदुस्तनगलश्री·
मः। हृदि ४ ईं सच्चिदानंदनाथव्यंजकरेखायोनिश्री·मः। इति गुह्ये ४ ओं हृदयाय·४ ईं शिर
से स्वाहा ४ उं शिखायै वषट् ४ ऐं कवचाय हुं ४ औं नेत्रत्रयाय वौषट् ४ अः अस्त्राय फट्। इति

सौ॰ क॰॥
॥५॥

षडंगेषु। प्रकाशमध्यस्थितचित्स्वरूपां वराभयेसंदधतीं त्रिनेत्रां। सिंदूरवर्णामतिकोमलांगीं मा
यामयींतत्वमयींनमामि॥ इतिध्यात्वा। त्रिखंडमुद्रयाब्रह्मरंध्रेन्यसेत्॥४॥ ह्स्क्लीं हसकलईं हस
कलईं सकलईं कलईं ईलईं कामकलांबाश्री॰ मः ४ हंसौः विमर्शांबा॰ मः ४ अंहंसौः प्रकाशवि
मर्शात्मक॰ ४ परमशिवानंद॰ मः ४ अमुकानंदनाथश्री॰ मः ४ हंसः शिवः सोहं निर्वाणपादुकां
पूजयामिनमः। इतिकामकलान्यासः॥ अथाष्टत्रिंशत्कलान्यासः॥ अस्यश्रीअष्टत्रिंशत्
कलामातृकान्यासस्यसोमसूर्याग्नयोऋषयः। अनुष्टुप्त्रिष्टुप्पंक्तयः छंदांसि। अष्टत्रिं
शत्कलारूपिणीमातृकादेवता। श्रीविद्याप्रीत्यर्थेन्यासेविनियोगः। चंद्रसूर्याग्निसंकाश
शवक्रेदेहपदद्वयां। सुधाकुम्भपद्मकोशाभयंवरमेवच। दधानांचिंतयेद्देवींपद्मस्थांपर
मेश्वरीं॥ त्रिनेत्रांरक्तवसनांदिव्यभूषांस्मरेद्धृदि॥ दक्षोर्ध्वाद्यधपर्यंतमायुधानिपंचपूजा

॥श्री॰॥
॥५॥

।४। अं अमृतकुलायैनमः।४। आं मानदाक॰४ इं पूषाक॰४ ईं तुष्टिक॰४ उं पुष्टिकलां।४। ऊं र
तिकला। ऋं धृतिक॰४ ॠं शशिकला॰४ ऌं चंद्रिकाक॰४ ॡं कांतिक॰४ एं ज्योत्स्नाक॰४
ऐं श्रीक॰४ ओं प्रीतिक॰४ औं अंगदाक॰४ अं पूर्णाकि॰४ अः पूर्णामृताक॰४ कं भं तपनिक॰
४ खं बं तापिनीक॰४ गं फं धूम्राक॰४ घं पं मरीचिक॰४ ङं नं ज्वालिनीक॰४ चं थं रुचिक॰४
छं दं सुषुम्णाक॰४ जं थं भोगदाक॰४ झं तं विश्वाक॰४ ञं णं बोधिनीक॰४ टं ढं धारिणीक॰४
ठं डं क्षमाक॰४।२८।४ यं धूम्रार्चिक॰४ रं उष्माक॰४ लं ज्वलिनीक॰४ वं ज्वालिनीक॰४ शं
विस्फुलिंगिनीक॰४ षं सुश्रीक॰४ सं सुरूपाक॰४ हं कपिलाक॰४ ळं हव्यवाहाकला॰४ क्षं
कव्यवाहाकलायैनमः॥ ॥इतिमूर्द्धादिवामपादांगुल्यंतं षट्त्रिंशन्मातृकास्थाने
षुमूर्ध्निसर्वांगेचन्यसेत्॥ इत्यष्टत्रिंशत्कलान्यासः॥ अथ पूर्णमंडलन्यासः॥ अस्य

।सौ॰क॰।
।६॥

श्रीपूर्णमंडलन्यासस्य सदाशिव ऋषिः॥ गायत्री छंदः॥ मातृका देवता नित्यासंयुक्ता न
त्वार्णपूर्णमंडलरूपिणी॥ श्वेतां श्वेतांबराभूषां ध्यायेंबुज चतुर्भुजां॥ पंचपूजां॥ मुखेस्व
रान्मातृकास्थानेषु विन्यस्य ककारादिक्षकारांतं पंचत्रिंशत्सु स्थानेषु रक्तषोडशदलकम
लं ऊर्ध्वमुखं विभाव्य तद्दलेषु प्रागादि प्रादक्षिण्येन ककारादीन् षोडशस्वरभिन्नान्
कं नमः। कां नमः। इत्यादि क्षं नमः। इत्यंतान् न्यसेत्। इति पूर्णमंडलन्यासः॥ अथ लघुषो
ढान्यासः॥ अस्य श्रीलघु॰ दक्षिणामूर्तिऋषिः। पंक्तिछंदः॥ महात्रिपुरसुंदरी देवता।
४ अं कं॰ ङं॰ ओं ऐं अंगुष्ठाभ्यां नमः। ४ इं चं॰ ञं ईं क्लीं तर्जनी॰ ४ उं टं॰ णं ऊं सौः मध्य॰ ४।
एं तं॰ नं॰ ४ ऐं ऐं अना॰ ४ ओं पं॰ मं॰ ४ औं क्लीं क॰ ४ अं यं॰ क्षं अः सौः करतलक॰। एवं हृद
यादि॥ उद्यत्सूर्यसहस्राभां रत्नमाल्यांबरोज्वलां॥ पाशांकुशेषुचापाढ्यां त्रिनेत्रां चंद्र

।श्री॰।
।६॥

शेखरं॥ गणेश ग्रहनक्षत्र योगिनीराशिरूपिणीं॥ देवीं पीठमयीं ध्यायेन्मातृकां सुंदरीं
परां॥ वामोर्ध्वाधःपर्यंतमायुधानि॥ पंचपूजा॥ तत्र गणेशन्यासः॥ तरुणादित्यसं
काशान् गजवक्त्रां त्रिलोचनान्॥ पाशांकुशवराभीतिकरान् शक्तिसमन्वितान्॥ वामो
र्ध्वाधःपर्यंतमायुधानि॥ तास्तु सिंदूरवर्णाभाः सर्वालंकारभूषिताः॥ एकहस्तधृ
तांभोजा इतरा लिंगितप्रिया॥ इति ध्यात्वा पंचपूजा॥ मातृकास्थाने न्यसेत्॥ यथा॥
अं विघ्नेश्वराय श्रियै नमः ४ आं विघ्नराजाय ह्रियै ४ इं विनायकाय तुष्ट्यै ई शिवोत्त
राय शांत्यै ४ उं विघ्नकृते पुष्ट्यै ४ ऊं विघ्नहर्त्रे सरस्वत्यै ४ ऋं विघ्नराजे रत्यै ४ ॠं गण
नायकाय मेधायै ४ ऌं एकदंताय कांत्यै ४ ॡं द्विदंताय कामिन्यै ४ एं गजवक्त्राय मोहि
न्यै ४ ऐं निरंजनाय जयायै ४ ओं कपर्दिने तीव्रायै ४ औं दीर्घवक्त्राय ज्वालिन्यै ४ अं

।सौ॰क॰। ।।७।।

संकर्षणायनंदायै॰ ४ अः वृषध्वजायसुरसायै॰ ४ कं गणनाथायकामरूपिण्यै॰ ४ खं गजेंद्राय सुभ्रुवे ४ गं शूर्पकर्णायजयिन्यै॰ ४ घं त्रिनेत्रायसत्यायै॰ ४ ङं लंबोदरायैविघ्नेश्यै॰ ४ चं महानादायसुरूपिण्यै॰ ४ छं चतुर्मूर्तयेकामदायै॰ ४ जं सदाशिवायमदविह्वलायै॰ ४ झं आमोदायविकटायै॰ ४ ञं दुर्मुखायघूर्णायै॰ ४ टं सुमुखायभूत्यै॰ ४ ठं प्रमोदायभूम्यै॰ ४ डं एकपादायसत्यै॰ ४ ढं द्विजिह्वायरमायै॰ ४ णं शूरायमानुष्यै॰ ४ तं वीरायमकरध्वजायै॰ ४ थं षण्मुखायविकर्णायै॰ ४ दं वरदायभ्रुकुट्यै॰ ४ धं वामदेवायलज्जायै॰ ४ नं वक्रतुंडाय दीर्घघोणायै॰ ४ पं द्विरंडायधनुर्धरायै॰ ४ फं सेनान्येयामिन्यै॰ ४ बं ग्रामण्येरात्र्यै॰ ४ भं मत्तायचंद्रिकायै॰ ४ मं विमत्तायशशिप्रभायै॰ ४ यं मत्तवाहनायलोलायै॰ ४ रं जटिनेचपलक्षिरायै॰ ४ लं मुंडिनेऋद्ध्यै॰ ४ वं खड्गिनेदुर्भगायै॰ ४ शं वरेण्यायसुभगायै॰ ४ षं वृषकेतवे

।श्री॰। ।।७।।

शिवायै ४ सं भक्ष्यप्रियाय दुर्गायै ४ हं मेघनादाय कालिकायै ४ ळं गणपाय कालजिह्वा
यै ४ क्षं गणेशाय विघ्नहारिण्यै ४ ।५२। इति गणेशन्यासः ॥ अथ ग्रहन्यासः ॥ रक्तं श्वेतं
तथा रक्तं श्यामं पीतं च पांडुरं ॥ धूम्रं कृष्णं तथा धूम्रं ग्रहानेवं विचिंतयेत् ॥ रविमुखानू का
मरूपान् सर्वाभरणभूषितान् ॥ वामोरुन्यस्तहस्तांश्च दक्षिणे च वरप्रदान् । पंचपूजा ।
हृदि ४ अं अः सूर्याय रेणुकांबिकायै । भ्रूमध्ये ४ यं वं चंद्राय अमृतांबायै नेत्रत्रये ४ ।
कं ङं मंगलाय धात्र्यंबा हृदयाधः ४ चं त्रं बुधाय ज्ञानरूपांबी हृदयोपरि ४ टं णं बृह
स्पतये यशस्विन्यंबा गले ४ तं नं शुक्राय शांकर्यंबा नाभौ ४ पं मं शनैश्चराय शक्त्यं
बा वक्त्रे ४ शं हं राहवे कलांबा गुदे ४ ळं क्षं केतवे धूम्रावायै नमः ॥९॥ इति ग्रहन्यासः
अथ नक्षत्रन्यासः ॥ ज्वलत्कालाग्निसंकाशाः सर्वाभरणभूषिताः ॥ नतिपाण्योश्चि

सो·क·॥
॥२८॥

नामुख्या वरदाभयपाणयः॥ पंचपूजा। उं ज्ञटे ४ अं आं अश्विन्यै नमः दक्षनेत्रे ४ इं भर
ण्यै· वामे· ४ ईं उं ऊं कृत्तिकायै। दक्षकर्णे· ऋं ॠं लृं ॡं रोहिण्यै·। वामक· ४ एं मृगशीर्षायै·
दक्षनासायां। ४ ऐं आर्द्रायै·। वामना· ४ ओं औं पुनर्वसवे·। कंठ। ४। कं पुष्याय· दक्षस्कं
धे। ४। खं गं आश्लेषायै· वामस्कंधे। ४। घं ङं मघायै· दक्षकूर्परे। ४। चं पूर्वाफाल्गुन्यै· वाम
। ४ छं जं उत्तराफल्गुन्यै· दक्षमणिबंधे· ४ झं ञं हस्ताय· वामे· ४ टं ठं चित्रायै· दक्षहस्ततले
४ डं स्वात्यै· वामे ४ ढं णं विशाखायै· नाभौ ४ तं थं दं अनुराधायै· दक्षकट्यां ४ धं ज्येष्ठा
यै· वामे ४ नं पं फं मूलाय· दक्षोरौ ४ बं पूर्वाषाढायै· वामे ४ भं उत्तराषाढायै· दक्षजानुनि ४
मं श्रवणाय· वामे ४ यं रं धनिष्ठायै· दक्षजंघायां ४ लं शतभिषजे· वामे ४ वं शं पूर्वाभाद्रप
दायै· दक्षपादे ४ षं सं हं उत्तराभाद्रपदायै· वा· ४ ळं क्षं अं अः रेवत्यै नमः॥ इति नक्षत्रन्या

॥श्री·॥
॥२८॥

सः॥अथयोगिनीन्यासः॥सितासितारुणारक्ताश्चित्रांपीतांचचिंतयेत्॥चतुर्भुजाःस
मैर्वक्त्रैर्युताभूषणभूषिताः॥पुस्तकंचकपालंचवराभीतिधराःशुभाः॥दक्षोर्ध्वादिधःप
र्यंतमायुधानि॥पंचपूजा॥कंठेविशुद्धौ।४।अं-अःडांडींडूंडैंडौंडःडमलवरयूंरक्ष२त्वगा
त्मनेडाकिन्यैनमः।हृदिअनाहते४कं-ठंरां-रःरमलवरयूंरक्षरक्तात्मनेराकिन्यै
नमः।नाभौमणिपूरे४डंफंलां-लंःलमलवरयूंरक्ष२मांसात्मनेलाकिन्यै-उपस्थेस्वा
धिष्ठाने४बं-लंकां-कंःकमलवरयूंरक्ष२मेदात्मनेकाकिन्यै।पायौआधारे४वंसंसां-सः
समलवरयूंरक्षरक्षास्थ्यात्मनेसाकिन्यै।भ्रूमध्येआज्ञायां४हंक्षंहां-हंःहमलवरयूंरक्ष२
मज्जात्मनेहाकिन्यै-ब्रह्मरंध्रेसहस्रदले४अं-क्षंयां-यःयमलवरयूंरक्ष२शुक्लात्मनेयाकि
न्यै-॥इतियोगिनीन्यासः॥अथराशिन्यासः॥रक्तंश्वेतंहरिद्वर्णंपांडुचित्रंसितंस्मरेत्॥पि

शांगपिंगलौकंखुकर्बुरा।सितधूम्रभाः॥तत्तदाकाराराशिध्यात्वा।पंचपूजा।दक्षीणगुल्फे४ अं
ईं मेषायनमः।तज्जानुनि४ उं ऊं वृषायतद्वृषणे।४ ऋं ॠं मिथुनाय॰।तत्कुक्षौ४ एं ऐं कर्कीय॰।
तत्स्कंधे४ ओं औं सिंहाय॰।तच्छिरोभागे।४।अं अः शं हं कन्यायै॰वामशिरोभागे४ कं॰ङं॰तुला
यै॰तत्स्कंधे४ चं॰ञं वृश्चिकाय॰तत्कुक्षौ॰४ टं॰णं धनुषेनमः तद्वृषणे।४ तं॰नं मकराय॰तज्जानु
नि४ पं मं कुंभाय॰तद्गुल्फे४ यं॰वं क्षं मीनाय॰॥इतिराशिन्यासः॥अथपीठन्यासः॥सितासिता
रुणश्यामहरितपीतान्यनुक्रमात्॥पुनःपुनःक्रमादेवंपंचाशन्नूस्थानसंचये॥पीठानिसंस्मरे
द्विद्वान्सर्वकामार्थसिद्धये।पंचपूजा॥मातृकास्थानेषुन्यसेत्४ अं कामरूपपीठाय॰४ आं वा
राणसीपीठाय॰४ इं नेपालपीठाय॰४ ईं पौंड्रवर्धनपीठाय॰४ उं काश्मीरपीठाय॰४ ऊं कान्यकुब्ज
पीठाय॰४ ऋं पूर्णशैलपीठाय॰४ ॠं अर्बुदपीठाय॰४ ऌं एकाम्रातकेश्वरपीठाय॰४ ॡं येकाम्र

पीठाय ४ ऐं त्रिःस्रोतःपीठाय ४ ऐं कामकोटपी ४ ओं कैलासपी ४ औं भृगुपी ४ अं केदारपी
४ अः चंद्रपुरीपी ४ कं श्रीपी ४ खं ओंकारपी ४ गं जालंधरपी ४ घं मालवतीपी ४ ङं कुलांतपी
४ चं देवकोटपी ४ छं गोकर्णपी ४ जं मारुतेश्वरपी ४ झं अट्टहासपी ४ जं विरजापी ४ टं राज
गृहपी ४ ठं महागिरीपी ४ डं कोलुगिरिपी ४ ढं एलापुरपी ४ णं कालेश्वरपी ४ तं जयंतीपी
४ थं उज्जनीपी ४ दं चरित्रपी ४ धं क्षिरिकापी ४ नं हस्तनापुरिपी ४ पं ओड्डीशपी ४ फं प्र
यागपी ४ बं षष्ठीशपी ४ भं मायापुरीपी ४ मं जलेश्वरपी ४ यं मलयपी ४ रं श्रीशैलपी ४
लं मेरुपी ४ वं गीरिपी ४ शं महेंद्रपी ४ षं वामनपी ४ सं हिरण्यपुरपी ४ हं महालक्ष्मीपी
४ लं ओड्याणपी ४ क्षं छायच्छत्रपी ४ ।५१। इतिपीठन्यासः॥ इतिलघुषोढान्यासः॥ अथ
महाषोढान्यासः॥ अस्यब्रह्माऋषिः॥ जगतीछंदः॥ श्रीअर्द्धनारीश्वरोदेवता॥ मोक्षार्थेविनि

योगः॥ झां झीं झूं झैं झौं झः इति षडङ्गन्यासः॥ सुधासमुद्रमध्योद्यद्रत्नद्वीपस्य मध्यतः॥
कल्पद्रुमवाटिकामध्ये विराजन्मणिमंडपे॥ नवरत्नगर्भिणी सिंहासनगतं विभुं॥ अर्द्धनारी
श्वरं शुद्ध स्फटिकाभं जटाधरं॥ व्याघ्रचर्मपरिधानं गजचर्मोत्तरीयकं॥ त्रिशूलशक्षकरं देवं भ
स्ममर्द्दनकलेवरं॥ मणिकेयूरकं कंठकुंडलादिविभूषितं॥ पुराणाभं दक्षिणांगे वामे स्त्रीरूप
धारिणं॥ तप्तहेमसमाभासं रत्नकोटिरशोभितं॥ सिंदूरकौशेयभासं कौसुंभोज्वलकंचुकं
॥ पाशचापधरं चंद्रचंदनालिप्तविग्रहं॥ नासमौक्तिकताटंकहारनूपुरशोभितं॥ त्रिनेत्रं चंद्र
चूडालं सनकादिसुसेवितं॥ चिद्विमर्शतनुं ध्यायेदानंदघनसुंदरं॥ इति ध्यात्वा॥ पंचपूजा॥
तत्र प्रपंचन्यासः॥ मातृकास्थानेषु न्यसेत्॥ ४॥ झौं झौं अं प्रपंचरूपायै श्रियै नमः॥ ४॥ झौं
झौं आं द्वीपरूपान्यै मायायै· ६ इं जलधिरू· कमलायै· ६ ईं गिरिरू· विष्णुवल्लभायै· ६ उं पतन

रू· पद्मधारिण्यै· ६ ईं पीठरू· समुद्रतनुयायै· ६ ऋं क्षेत्ररू· लोकमात्रे· ६ ॠं वनरू· कमल
वासिन्यै· ६ लृं आश्रमरू· इंदिरा· ॡं गुहारू· मायायै· एं नदीरू· रसायै· ६ ऐं चत्वररू· प
द्मायै· ६ ओं उद्भिजरू· नारायणप्रियायै· ६ औं स्वेदजरू· सिद्धलक्ष्मै· ६ अं अंडजरू·
राजलक्ष्म्यै· ६ अः राजयुजरू· महालक्ष्म्यै· ६ कं लवरू· आर्यायै· ६ खं त्रुटिरू· उमायै·
६ गं कलारू· चंडिकायै· ६ घं काष्ठारू· दुर्गायै· ६ ङं निमेषरू· शिवायै· ६ चं क्षणरू· अप
र्णायै· ६ छं घटिकारू· अंबिकायै· जं मुहूर्त्तरू· सत्यै· ६ झं प्रहररू· ईश्वर्यै· ६ ञं दिवास
रू· शांभव्यै· ६ टं संध्यारू· ईशान्यै· ६ ठं रात्रिरू· पार्वत्यै· ६ डं तिथिरू· सर्वमंगलायै· ६ ढं
वाररू· दाक्षायण्यै· ६ णं नक्षत्ररू· हैमवत्यै· ६ तं योगरू· महामायायै· ६ थं करणरू· म
हेश्वर्यै· ६ दं पक्षरू· मृडान्यै· ६ धं मारू· रुद्राण्यै· ६ नं रात्रिरू· शर्वाण्यै· ६ पं ऋतुरू· पर

मेश्वर्यै॰६ फं अयनरू॰ काल्यै॰६ बं वत्सररू॰ कात्यायन्यै॰६ भं युगरू॰ गौर्यै॰६ मं प्रलयरू॰
भवान्यै॰६ यं पंचभूतरू॰ ब्राह्म्यैः६ रं पंचतन्मात्ररू॰ वागीश्वर्यैः६ लं पंचकर्मेंद्रियरू॰ वाण्यै॰
६ वं पंचज्ञानेंद्रियरू॰ सावित्र्यै॰६ शं पंचप्राणरू॰ सरस्वत्यै॰६ षं गुणत्रयरू॰ गायत्र्यै॰६
सं अंतःकरणचतुष्टयरू॰ प्राकृप्रदायै॰६ हं वस्थात्रयरू॰ शारदायै॰६ ळं सप्तधातुरूपा॰
यै॰ भारत्यै॰६ ऐं ह्रीं श्रीं क्षं दोषत्रयरू॰ विद्योत्मिकायै नमः॥ सर्वांगे॥ ह्रीं श्रीं अं॰ क्षं
सकलप्रपंचरूपायै श्रीपरांबादेव्यै नमः॥ इति प्रपंचन्यासः६ अथ भुवनन्यासः॥६॥
तत्र पादयोः॥४॥ ह्रीं श्रीं अं॰ इं अतललोक निलयशतकोटि गुह्ययोगिनी मूलदेव
तायुताधारशक्तयं बादेव्यै नमः॥ गुल्फयोः६ ईं॰ उं वितललोक॰ गुह्यतरानंतयोगिनी
मू॰ मः जंघयोः६ ऊं॰ लं॰ सुतललो॰ गुह्यातिंभयोगिनी॰ मः जान्वोः६ ॡं ऐं महातललोक॰

कोटिमहागुह्यस्वतंत्रयो॰ मः॥ऊर्वोः।६।ओं औं तलातलुलोक॰ कोटिपरमगुह्येछायो॰
सः॥गुह्ये।६।अंअः रसातलुलोक॰ कोटिरहस्यज्ञानयो॰ मः॥मूलाधारे।६।कं॰ ङं पाता
ललो॰ कोटिरहस्यतरक्रियायो॰ मः।लिंगोर्ध्वे६ चं ञं॰ भूर्लो॰ कोटय तिरहस्यडाकिनीयो॰
मः।नाभौ।६।टं॰ णं भुवर्लोक॰ कोटिमहारहस्यराकिनीयो॰ मः।हृदि॰ ६ तं॰ नं स्वर्लोक॰ को
टिपरमरहस्यलाकिनीयो॰ मः कंठे।६।पं॰ मं महर्लोक॰ कोटिगुह्यकाकिनीयो॰ मः ना
साग्रे६ यं॰ वं जनलोक॰ कोटिगुप्ततरसाकिनीयो॰ मः ललाटे।६।शं हं तपोलोक॰ कोय्य
तिगुह्यहाकि।नीयो॰ मः ब्रह्मरंध्रे६ ळं क्षं सत्यलोक निलयशतकोटिमहागुप्तयाकि
नीयोगिनीमूलदेवतायुताधारशक्तयंबादेव्यैनमः।सर्वांगे॰।४।ह्रीं स्हौः अं॰ क्षं सक
लभुवनाधिष्ठात्र्यै श्रीपरांबादेव्यैनमः॥इतिभुवनन्यासः॥अथमूर्तिन्यासः॥तत्र।

।।सो॰क॰।।
।।१२।।

शिरसि ४ ऌं औं स्हौंः अं केशवाय कीर्त्यै नमः मुखे ६ आं नारायणाय धात्र्यै दक्षां

से ६ इं माधवाय इष्टदात्र्यै वामांसे ६ ईं गोविंदाय शान्तायै दक्षपार्श्वे ६ उं विष्णवे उ

ग्रायै वामे ६ ऊं मधुसूदनायोर्ध्वनयनायै दक्षकट्यां ६ ऋं त्रिविक्रमाय ऋध्यै वामे ६

ॠं वामनाय ६ ह्रीं रूपिण्यै दक्षोरो ६ ऌं श्रीधराय उमायै वामे ६ ॡं हृषीकेशाय ऌन

दोषा दक्षजानुनि ६ एं पद्मनाभाय कनापिकायै वामे ६ ऐं दामोदराय कारिण्यै दक्षजं

घायां ६ ओं वासुदेवायोघवत्यै वामे ६ औं संकर्षणायोर्विकायै दक्षपादे ६ अं प्रद्यु

म्नाय जनप्रभायै वामे ६ अः अनिरुद्धायास्थिमात्रधरायै दक्षपादे ६ कं भं भवाय

करभद्रायै वामे ६ खं बं शर्वाय खगवल्गायै दक्षपार्श्वे ६ गं फं रुद्राय गिरिमादिफलमदाः

वामे ६ घं पं पशुपतये घंटापद्मधरायै दक्षबाहौ ६ ङं नं उग्राय ङसर्णायै वामे ६ चं धं म

।।श्री।।
।।१२।।

हादेवायचंद्रार्द्धधारिण्ये॰ कंठे ६ छंदं भीमायछंदोमय्ये॰ वदने ६ जंथंईशानायजगत्स्वा
नायै॰ दक्षकर्णे ६ झंनंतत्पुरुषायज्ञस्तलारायै॰ वामे ६ अंणंअघोरायज्ञानदायै॰ मस्तक
पृष्ठे ६ टंटंसद्योजातायटंकरठकाठपीये॰ शिरसि ६ ठंडंवामदेवायटकारडामर्यै॰ आधा
रे ६ यंब्रह्मणयक्षिण्यैवास्वाधिष्ठाने ६ रंप्रजापतयेरंजिन्यै॰ मणिपूरे ६ लंवेधसेलक्ष्म्यै॰
अनाहते ६ वंपरमेष्ठिनेत्रिण्ये॰ विशुद्धौ ६ शंपितामहायशशिधारिण्ये॰ आज्ञायां ६ षंवि
धात्रेषडाधारालयायै॰ अर्द्धेंदौ ६ संविरिंचयेसर्वनायिकायै॰ रोधिन्यां ६ हंस्त्रष्ट्रेहसितान
ना॰ नादे ६ लंचतुराननायलळितायै॰ नादांते ६ क्षंहिरण्यगर्भायक्षामांयै॰ सर्वांगे ४ ज्झौः
स्हौः अं॰ क्षंसकलमूर्तिरूपायैश्रीपरांबादेव्यैनमः॥ इतिमूर्तिन्यासः॥ अथमंत्रन्यासः॥ आ
धारे॥ ज्झौः स्हौः अं॰ इं एकलक्षकोटिभेदप्रणवाद्यक्षरात्मारिवलमंत्राधिदेवतायेसकल

सौ॰क॰॥
॥२३॥

फलप्रदायैएककूटेश्वर्यैबादेव्यैनमः॥स्वाधिष्ठाने६ ईंछंद्विलक्षकोटिभेदहंसादिद्व्यक्ष
रात्मा॰दायैद्विकूटे॰।मः।मणिपूरे६ रंलंत्रिलक्षभेदवन्ह्यादित्र्यक्षरा॰यैत्रिकूटे॰मःअ
नाहते६ लृंएंचतुर्लक्षभेदचंद्रादिचतुर॰यैचतुष्कूटे॰मः।विशुद्धौ६ ओंअंःपंचल
क्ष॰भेदसूर्यादिपंचा॰पंचकू॰मः।लंबिकायां६ कं॰गंषट्लक्ष॰भेदस्कंदादिषड॰यैषट्
कूटे॰मः॥आज्ञायां६ घंचंसप्तलक्ष॰भेदगणेशादिसप्ता॰यैसप्तकू॰मःबिंदौ॰सा॰छं
झंअष्टलक्ष॰भेदबटुकाद्यष्टा॰यैअष्टकू॰मः।अर्द्धेंदौ॰६ जंटंनवलक्षभेदब्रह्मानवा॰
यैनवकू॰मः।रोधिन्यां६ डंणंदशल॰भेदविष्ण्वादिदशा॰यैदशकू॰मःनादनादांतयो॰
६ तंदंएकादशलक्ष॰रुद्राद्येकादशा॰यैद्वादशकू॰मः।शक्तौ६ धंपंद्वादशल॰भेदवा
ण्यादिद्वादशा॰यैद्वादशकू॰मः।व्यापिकायां६ फंभंत्रयोदशल॰भेदलक्ष्म्यादित्रयो

॥श्री॥
॥२३॥

दशाये॰ त्रयोदशाकू॰ मः समानायां६ मरं चतुर्दशलक्ष॰ भेदगोर्यादि चतुर्दशा॰ ये चतु
र्दशाकू॰ मः उन्मनायां६ लं॰ शं पंचदशल॰ भेददुर्गादि पंचदशा॰ ये पंचदशाकू॰ मः महा
बिंदौ६ षं क्षं षोडशलक्षकोटिभेदत्रैपुरादि षोडशा सा खिल मंत्राधिदेवतायै सकल
फलप्रदायै षोडशाकूटस्वर्यंबादेव्यै नमः॥ सर्वांगे॥ ऐं॰ स्हौं॰ अं॰ क्षं सकलमंत्ररू
पायै श्रीपरांबादेव्यै नमः॥ इति मंत्रन्यासः॥ अथ देवतान्यासः॥ दक्षपादांगुष्ठे६ ऐं॰
स्हौं॰ अं आ सहस्रकोटि ऋषिकुलसेवितायै निधयंबादेव्यै नमः।६ इं ईं स॰ टियोगिकु
ल॰ ये प्रतिष्ठांबा॰ मः। दक्षगुल्फे६ उं ऊं स॰ टितपस्विकु॰ ये विद्यांबा॰ मः। वामे६ ऋं ॠं
स॰ टीशांतकु॰ ये शांत्यंबा॰ मः। दक्षजंघायां६ लृं ॡं स॰ मुनिकु॰ ये शांत्यतीतांबा॰ मः॥
वामे६ एं ऐं स॰ टिदेवकु॰ ये हृल्लेखांबा॰ मः दक्षजानुनि६ ओं औं स॰ टि॰ टिराक्षसकु॰

सो·क·।
।२६॥

यैगगनांबा। वामे।६ अंअः स· टिविद्याधरकु· येरक्तांबा· मः दक्षोरौ६ कंखंस· टिसि
द्धकु· येमहाशुष्मांबा· मः वामे६ गंघंस· टिसाध्यकु· येकरालिकांबा· मः दक्षकट्यां
६ ङंचंसकोश्यसरकु· येजयांबा· मः वामे६ छंजंस· टिगंधर्वकु· येजयांबा· मः दक्षपा
र्श्वे६ झंञंस· टिगुह्यककुल· येअजितांबा· मः वामे६ टंठंस· टियक्षकुल· येअप
राजितांबा· मः दक्षस्तने६ डंढंस· टिक्षेत्ररकु· येवामांबा· मः वामे६ णंतंस· टिपन्नगकु
ल· येज्येष्ठांबा· मः दक्षकक्षे६ थंदंस· टिपितृकु· येसेज्यांबा· मः वामे६ धंनंस· टिगणे
शकु· येमायांबा· मः दक्षकरे६ पंफंसः टिभैरवकु· येकुंडलिन्यंबा· मः वामे६ बंभंसः·
टिबटुककुल· येकाल्यंबा· मः दक्षांसे६ मंयंस· टिक्षेत्रकु· येकालरात्र्यंबा· मः वामे६
रंलंस· टिप्रथमकु· येभगवत्यंबा· मः दक्षकर्णे६ वंशंस· टिब्रह्मकु· येसर्वैश्वर्यैबा· मः

।श्री·।
।२६॥

वामे ६ षंयंस· टिविष्णुकु· येसर्वज्ञांबा· मः दक्षऊर्ध्वभागे ६ हंळंस· टिरुद्रकु· येसर्वकर्त्र्यं
बा· मः वामे ६ क्षंसहस्रकोटिचराचरकुलसेवितायैश्रीत्रेयांबादेव्यैनमः ४ ऐंह्रींश्रींः ऐं
अं· क्षंसमस्तब्रह्मांडरूपायैश्रीपरांबादेव्यैनमः॥ इतिदेवतान्यासः॥ अथमातृकान्या
सः॥ आधारे॥४॥ ऐंह्रींश्रींः कं· उं· अनंतकोटिभूचरिकुलसहितायैआंक्षांमंगलांबाद
व्यैआंक्षांब्रह्माण्यंबादेव्यैअनंतकोटिभूतकुलसहितायअंक्षंमंगलनाथायअंक्षंअसि
तांगभैरवनाथायनमः॥ स्वाधिष्ठाने ६ चंछं· जंजं· टिखेचरीकु· येईळंचर्चिका· देव्यैईळं
माहेश्वर्यै· व्यैज· टिवेतालकु· यईळंचर्चिकानाथायईळंरुरुभैरवनाथायनमः। मणिपूरे।
६ टंणंज· टिपातालचरीकु· येउंहांयोगीश्वर्यै· व्यैउंहांकौमार्यै· व्यैज· टिमिश्राचकु· यउं
हंयोगीश्वरनाथायउंहंचंडभैरवा· मः अनाहते ६ तंनंअ· टिदिक्चरीकु· येऋंसांहरसि।

ह्रांबा॰ये ऋंसांवैष्णव्यं॰ये अ॰घपस्मारकु॰यंकं संहरसि॰यकं सक्रोधभै॰मः॥विशुद्धौ १६ पं॰मं
अ॰टिसहचरिकु॰यलृं षांभद्रांबा॰वाराहंबा॰व्येअं टिब्रह्मराक्षसकु॰यलृं षंभद्रनाथाय॰
ऋं षंउन्मत्तभै॰मः॥आज्ञायां ६ यं॰वं अ॰टिगिरिच॰येऐं शांतिकिलकिला॰येंऐं इंद्राण्यंबा॰
व्येअ॰टिचेटककु॰यएरांकेऋंकिलकिलानाथ॰यएं रांकपालभै॰मः।नादांते ६ सं॰हं अटि
वनच॰येओवांकालरात्र्यं॰व्ये॰औंवांचामुंडांबा॰व्येअंटिप्रेतकु॰यओंनंकालरात्रिना
थ॰पऊं वंभीषणभै॰मः॥महाबिंदौ ६ लुं क्षं अनंतकोटिजलचरीकुलसहितायेअंः शं
भीषणांबादेव्येअंः लांमहालक्ष्म्यंबादेव्येअनंतकोटिकूष्मांकुलसहितायअंलंभीष
णनाथायअंलं संहारभैरवायनमः॥सर्वांगे ४ ह्सौः स्हौः अं॰क्षं समस्तमातृभैरवाधिदे
वतायैश्रीपरांबादेव्यैनमः॥इतिमातृकान्यासः॥अथमहाषोढान्यासः॥श्रीचक्रन्यासः॥त

आदौ मूलेन प्राणानायम्य मूलत्रं ५ ष्यादिन्यासांतं कृत्वा। हृदि देवं ध्यात्वा मानसं संपूज्य।
स्वदेहत्वेश्री चक्रत्वेन ध्यायेत्॥ यथा॥ पृथ्वी पुरतृनयभूमिपपत्रनागपत्रेंदुकोणयुगेभको
णं॥ अंतस्त्रिलोकमथ बिंदुपदं समीड्यं श्री चक्रराजमतुलं विमृशे स्वदेहं॥ इति ध्यात्वा।
आदौ पीठशक्तिन्यसेत्॥ यथा॥ ४॥ मोंमो हिन्यै· पादांगुष्ठयोः ४ क्षोंक्षो भिण्यै· दक्षजानु
नि ४ वंवशिन्यै· दक्षकूर्परे ४ स्तंस्तंभिन्यै· दक्षगुल्फाग्रे ४ आंआकर्षिण्यै· शिखायां ४ द्रां
द्राविण्यै· वामगुल्फाग्रे ४ आंआल्हादिन्यै· वामकूर्परे ४ क्लिंक्लिंनायै· वामजानुनि ४ क्लेंक्ले
दिन्यै· हृदि· ४ क्लींसर्वजगत्वकमलासनायनमः सर्वांगे इति स्वदेहं पीठशक्तिमयं ध्यात्वा ४।
मूलं० श्री महात्रिपुरसुंदर्यै नमः हृदि· इति त्रिर्न्यस्य॥ पुनस्तत्रैव॥ तिथिनित्यां दिननित्यां
चतत्तन्मंत्रेणविन्यस्य॥ कंठमध्याधः॥ स्थानमारभ्य दक्षवामस्तनक्रमेण त्रिकोणं दक्षरे

स्वायां पंत्तयाकारेण न्यसेत्॥ एवमेवाग्रेपि॥ तत्तत्स्थानेषु तत्तच्चक्रं ध्यात्वा न्यसेत्॥ यथा॥ ५।
अं कामेश्वरीनित्यायै॰ ५ आं भगमालिनीनित्यायै॰ ५ उइं नित्यक्लिन्नानित्यायै॰ ५ ईं भेरुंडानि
त्यायै॰ ५ उं वन्हिवासिनीनि॰ दक्षिणस्तनमारभ्य वामपर्यंतं ५ ऊं महावज्रेश्वरीनि॰ ५ ऋं शि
वदूतीनि॰ ५ ॠं त्वरितानि॰ ५ ऌं कुलसुंदरीनि॰ ५ ॡं नित्यानित्या॰ २॰ वामस्तनमारभ्य कंठम
ध्याधः पर्यंतं ५ एं नीलपताकानि॰ ५ ऐं विजयानित्या॰ ५ ओं सर्वमंगलानित्या॰ ५ औं ज्वाला
मालिनीनि॰ ५ अं चित्रानित्या ५ १५ हृदि ५ मूलं त्रिपुरसुंदरीमहानित्यायै॰ पुनस्तत्रैव ५ अं
ह १६ सप्तदशीनित्यायै नमः॥ इति न्यासः॥ अत्र समर्थस्तु अं आं इत्येतदुत्तरं तत्तं नित्यामं
त्रान् पठेत्॥ पक्षन्यवस्थाध्यानं आवरणपूजावत्॥ हृदि ५ मू॰ महात्रिपुरसुंदर्यै॰ इति त्रिः।
अथ नाभ्युपरि कक्षोदेरे दिवा मां तंत्रिपंक्तिरूपेणौघत्रयं न्यसेत्॥ यथा॥ हृदयसमीपे रेखा

यां॥४ ऐं दिव्यौघेभ्यः परारव्येभ्यो गुरुभ्यो नमः॥ इति व्यापकं विन्यस्य ४ ऐं परप्रकाशानंद
नाथाय ४ ऐं परशिवानंदना० ४ ऐं पराशक्त्यंबा० ४ ऐं कौलेश्वरानंदनाथा० ४ ऐं शुक्लादेव्यंबा०
४ ऐं कुलेश्वरानंदनाथाय० ४ ऐं कामेश्वर्यंबायै० द्वितीयरेखायां ४ ऐं सिद्धौघेभ्यः परापरारव्ये
भ्यो गुरुभ्यो० इति व्यापकं विन्यस्य० ४ ऐं भोगानंदनाथा० ४ ऐं क्लिन्नानंदनाथाय० ४ ऐं समयानं
दनाथाय० ४ ऐं सहजानंदना० तृतीयरेखायां ४ ऐं मानवौघेभ्यः परारव्येभ्यो गुरुभ्यः॥ इति व्या
पकं न्यस्य० ४ ऐं गगनानंदनाथा० ४ ऐं विश्वानंदना० ४ ऐं विमलानंदना० ४ ऐं मदनानंदना० ४ ऐं भु
वनानंदना० ४ ऐं लीलानंदनाथाय० ४ ऐं स्वात्मानंदना० ४ ऐं प्रियानंदना० तत्रैव परमेष्ठीगुर्वादित्र
यं तत्तन्मंत्रेण न्यसेत् रेखात्रये महापादुकां व्यापकत्वेन न्यसेत्॥ इत्योघन्यासः॥ दक्षस्तनाधः ४
ऐं सर्वज्ञानहृदयशल्ययेन० वामाधः ४ क्लीं नित्यतृप्ताशिरःशक्ति० मः दक्षग्रीवाधः ४ सौः अनादि

बोधाशिखाशक्तये· वामग्रीवाधः ४ ऐं स्वतंत्राकवचाशक्तये· कंठमध्याधः ४ क्लीं नित्यमलुप्ता
नेत्रशक्तये· दक्षस्तनादिव्यापकत्वेन· ४ सौः अनंतास्त्रशक्तये· इति षडंगयुवतीन्यासः॥ पुनः
हृदि॥ मू· त्रि· समस्तदेहे· ४ मूसमस्तप्रकट· भ्योनमः॥ पुनः शिरवादिपादांतं॥ अं आं सौः त्रैलो
क्यमोहनचक्रा·॥ पुनः शिखादिपादांगुष्ठांतं ४ चतुरस्राद्यरेखायै नमः॥ शिखायां ४ अं अणि
मासिद्ध्यै नमः॥ वामकूर्परे ४ उं लघिमासिद्ध्यै· पादांगुष्ठयोरग्रे ४ मं महिमासि· दक्षकूर्परा·ग्रे· ४
ईं ईशित्वसि· वामकरांगुल्यग्रे· ४ वं वशित्वसि· वामजान्वग्रे· ४ प्रां प्राकाम्यसि· दक्षजान्वग्रे ४
भुं भुक्तिसि· दक्षकरांगुल्यग्रे· ४ ईं इच्छासि· दक्षकर्णाग्रे· ४ प्रां प्राप्तिसि· वामाजंघागुल्फाग्रे· ४।
सं सर्वकामसि· पुनः शिखादिमूलपादांगुष्ठमध्यांतं ४ चतुरस्रद्वितीयरेखायै· शिखामूले· ४
आं ब्राह्म्यै· वामकूर्परे· मध्ये· ४ ईं माहेश्वर्यै· पादांगुष्ठयोमध्ये· ४ ऊं कौमार्यै·॥ द· कूर्परमध्ये· ४ ऋं

वैष्णव्यै · वामकरांगुलमध्ये · ४ लृं वाराह्येन · वामजानुमध्ये · ४ ऐं माहेंद्र्यै · दक्षजानुमध्ये · ४ औं
चामुंडायेन · द · करांगुलमध्ये ४ अः महालक्ष्म्यै · ॥ ८ ॥ पुनः ब्रह्मरंध्रादितो पादांगुष्ठमूलांतं ४ अं
नम्बतुरस्नरेखायै · ब्रह्मरंध्रे ४ द्रां सर्वक्षोभिणीमुद्रायै · वामकूर्परमूले ४ द्रीं सर्वविद्रावणीमुद्रा
यै · पादांगुष्ठयोर्मूले ४ क्लीं सर्वविद्राविणी · द · कूर्परे ४ ब्लूं सर्ववशंकरी · वाकरांगुलमूले · ४ सः
सर्वोन्मादिनी · वा · जानुमूले · ४ क्रों सर्वमहांकुशामु · द · जानु · ४ ह्सैं ह्स्क्लीं ह्स्रौः सर्वत्रिखंडामुद्रा ·
दक्षकरांगुलिमूले · ४ ह्सौः सर्वबीजमुद्रा · कर्णरंध्रोर्ध्वे ४ ह्स्खें सर्वखेचरीमुद्रा · वामजंघागु
ल्फमध्ये अंतः ४ ऐं सर्वयोनिमुद्रा · पुनरुक्तस्थानेषु व्यापकं ४ अं आं सौः त्रिपुराचक्रेश्वर्यै न
मः ॥ पुनस्तत्रैव ॥ ४ ॥ मंमकरयोगिन्यैनमः ॥ इत्यणिमादिन्यासः ॥ फालाग्रादिपादपर्यंतं ४
ऐं सर्वाशापरिपूरकचक्राय · फालाग्रे ४ अं कामाकर्षिणीनित्याकलायै · ॥ दक्षकर्णरंध्रे ४ ।

ओं बुध्याक· दक्षकरभे ४ इं अहंकाराक· द· मणिबंधाग्रे ४ ईं शब्दाक· दक्षकराग्रे ४ उं स्प
र्शाक· दक्षोर्वग्रे ४ ऊं रूपाक· दक्षजंघाग्रे ४ ऋं रसाक· दक्षगुल्फाग्रे ४ ॠं गंधाक· पादपृष्ठ
योः ४ ऌं चित्ताक· वामांगुल्फग्रे ४ ॡं धैर्याक· वा· जंघाग्रे ४ ऐं स्मृत्याक· वामोर्वग्रे ४ ऐं नामा
क· वा· करा· ४ ॐ बीजाक· वाममणिबंधाग्रे ४ औं आत्माक· वा· करभे ४ अं अमृताक· वा·
कर्णरंध्रे ४ अः शरीराकर्षि· १६ पुनरुक्तस्थानेषु व्यापकं ४ त्रिपुरेशी चक्रेश्वरी· पुनस्तत्रैव ४
गुं गुप्तयोगिन्यै· ॥ इति कामाकर्षिण्यादिन्यासः ॥ पार्ह्विद्वयाग्रादि फालमध्यांतं ४ ह्रीं क्लीं सौः
सर्वसंक्षोभणचक्रा· पार्ह्वर्यग्रे ४ कं· ङं· अनंगकुसुमायै· दक्षकरमध्ये· ४ चं ५ अनंगमेखला·
फालमध्ये ४ टं ५ अनंगमदनायै· वा· क· ध्ये ४ तं ५ अनंगमदनातुरायै· द· गुल्फे ४ पं ५ अनंगरे
खा· द· क· तले ४ यं· वं अनंगवेगिन्यै· वा· क· तले ४ शं· हं अनंगांकुशायै· वा· गुल्फे ४ ळं क्षं

अनंगमालिन्यै० पुनरुक्तस्थानेषुव्यापकं ४ ह्रीं क्लीं सौः त्रिपुरसुंदरीचक्रेश्वर्यै० पुनस्तत्रैव
॥गुंगुप्ततरयोगिन्यै०॥इत्यनंगकुसुमादिन्यासः॥भ्रूमध्यादिपार्ष्णिमूलांतं ४ हैं ह्क्लीं ह्सौः
सर्वसौभाग्यदाय० भ्रूमध्ये ४ कं सर्वसंक्षोभिणीशक्त्यै नमः दक्षकर्णमूले ४ खं सर्वविद्राविणी
शक्त्यै० द० करांगुलिमूले ४ गं सर्वाकर्षिणी० द० भुजमध्ये ४ घं सर्वाल्हादिनी० दक्षोरुमूले ४ ङं
सर्वसंमोहिनी० दक्षजंघामूले ४ चं सर्वस्तंभिनी० दक्षगुल्के ४ छं सर्वजृंभिणी० पार्ष्णिमूला
ग्रे ४ जं सर्ववशंकरी० वामगुल्फमूले ४ झं सर्वरंजिनी० वामजंघामूले ४ ञं सर्वोन्मादिनी० वा
मोरुमूले ४ टं सर्वार्थसाधिनी० वामभुजमध्ये ४ ठं सर्वसंपत्तिपूरिणी० वामकरांगुष्ठमूले०
४ डं सर्वमंत्रमयी० वामकर्णमूले ४ ढं सर्वद्वंद्वक्षयंकरी० पुनरुक्तस्थानेषुव्यापकं॥ हैं ह्क्लीं ह्सौः
त्रिपुरवासिनीचक्रेश्वर्यै० पुनस्तत्रैव ४ संसंप्रदाययोगिन्यै० इतिसर्वसंक्षोभिण्यादिन्यासः॥

नासामूलाद्युपस्थांतं ४ ऐं क्लीं सौः सर्वार्थसाधकचक्राय· नासामूले ४ णं सर्वसिद्धिप्रदा
दे॰व्यै· दक्षनेत्रे ४ तं सर्वसंपत्प्रदादेव्यै· दक्षहनौ ४ थं सर्वप्रियंकरीदेव्यै· दक्षकट्यां ४ दं सर्व
मंगलकारिण्यै· दक्षस्फिचि ४ धं सर्वकामप्रदादे· उपस्थे ४ नं सर्वदुःखविमोचिनीदे· वाम
स्फिचि ४ पं सर्वमृत्युप्रशमिनीदे· वामकट्यां ४ फं सर्वविघ्ननिवारिणीदे· वामहनौ ४ बं सर्वा
गसुंदरीदे· वामनेत्रे ४ भं सर्वसौभाग्यदायिनीदे· पुनरुक्तस्थानेषु व्यापकं ४ ऐं क्लीं सौः
त्रिपुराश्रीचक्रेश्वर्यै· पुनस्तत्रैव ॥ कुं कुलोत्तीर्णयोगिन्यै· ॥ इति सर्वसिद्धिप्रदादिन्यासः ॥
नासाग्रादिबस्तिपर्यंतं ४ ह्रीं क्लीं ब्लें सर्वरक्षाकरचक्रा· नासाग्रे ४ मं सर्वज्ञादे· दक्षकपोले
यं सर्वशक्तिदे· दक्ष·स्कंधे ४ रं सर्वैश्वर्यप्रदायिनी·दे· पार्श्वे ४ लं सर्वज्ञानमयीदे· द·कटिस्कं
धो ४ वं सर्वव्याधिविनाशिनीदे· बस्तौ ४ शं सर्वाधारस्वरूपादे· वामकटिस्कंधौ ६ षं सर्वपा

पहरादे॰ वा॰ पार्श्वे ४ सं सर्वानंदमयीदे॰ वा॰ स्कंधे ४ हं सर्वरक्षास्वरूपिणीदे॰ वा॰ कपोले ४ ळं
क्षं सर्वेप्सितप्रदादेव्यै॰ पुनरुक्तस्थानेषु न्यापकं ४ ह्रीं क्लीं ब्लें त्रिपुरमालिनी चक्रेश्वर्यै॰ पुन
स्तत्रैव ४ निं निगर्भयोगिन्यै॰ ॥ इतिसर्वज्ञादिन्यासः। चुबुकादिनाभ्यंतं ४ ह्रीं श्रीं सौः सर्व
रोगहरचक्राः चुबुके ४ अं अः ब्लूं वशिनीवाग्देव॰ द॰ ग्रीवायां ४ कं ५ क्लू ह्रीं कामेश्वरीवा॰ द॰
कक्षे ४ चं ५ न्ब्लीं मोदिनीवा॰ द॰ कुक्षौ ४ टं ५ यूं विमलावा॰ नाभौ ४ तं ५ ज्मीं अरुणावा॰ वामकु
क्षौ ४ पं ५ ह्स्ल्व्यूं जयिनी॰ वामकक्षे ४ यं ५ झ्म्र्यूं सर्वेश्वरीवा॰ वा॰ ग्रीवायां ४ षं ५ क्ष्म्रीं कौलिनी
वा॰ पुनरुक्तस्थानेषु न्यापकं ॥ ह्रीं श्रीं सौः त्रिपुरासिद्धा चक्रेश्वर्यै॰ पुनस्तत्रैव ४ रं रहस्ययोगि
न्यै ॥ इतिवशिन्यादिन्यासः ॥ कंठादिहृदयाधस्तपर्यंतं ४ ह्रैं ह्क्लीं ह्सौः ॥ सर्वसिद्धिप्रदचक्रा
वामस्कंधमूले ४ द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां शां सर्वजंभनकामेश्वरकामेश्वरीवाणदे॰ दक्ष।

स्रो॰क॰॥ ॥२०॥

स्कंधमूले ४ धंथंकामेश्वरमोहनका॰ वा॰ पदे॰ दक्षरत्ननाथः ४ आं-ह्रींसर्ववशीकरणका॰ पा
शदेवता॰ वामरत्ननाथः ५ क्रोंक्रौंसर्वस्तंभनका॰ यंकुशदे॰ कंटे ४ ऐंक ४ अग्निचक्रे॰ कामेश्व
र्यै॰ द॰ स्तने ४ क्लींह ५ सूर्यचक्रे॰ वज्रेश्वरीदे॰ वामस्तने ४ सौः स ३ सोमचक्रे॰ भगमालिनीदे॰॥
पुनरुक्तस्थानेषुव्यापकं॥४॥ ह्स्रैं ह्स्क्लीं ह्स्रौः त्रिपुरांबाचक्रेश्वर्यै॰ पुनस्तत्रैव ४ जंअतिर
हस्ययोगिन्यै॰॥ इतिकामेश्वर्यादिन्यासः॥ हृदि ४ मू॰ सर्वानंदमयचक्रा॰ पुनस्तत्रैव ४ ऐं३मू॰
परब्रह्मचक्रे॰ महात्रिपुरसुंदर्यै॰ पुनस्तत्रैव ४ पंपरापररहस्ययोगिन्यैनमः॥ इतिमहात्रिपुरसुं
दरीन्यासः॥ समस्तदेहे॥ व्यापकत्वेन ४ ह १२ महोड्याणपीठे चर्यानाथात्मिके तुरीयातीतदद
शाधिष्ठायिके शांत्यतीताशक्त्यात्मकपरब्रह्मात्मकप्रकाशविमर्शसामरस्यात्मशक्तिश्रीम
हात्रिपुरसुंदरीदेव्यैनमः इतिविन्यसेत्॥ इतिश्रीचक्रन्यासः॥ अयंचन्यासस्त्रिविधः॥ सृष्टिस्थि

॥श्री॰॥ ॥२०॥

तिसंहारभेदात्॥तत्रभूपुरादिबिंदुपर्यंतंन्यासः॥संहाराख्यः॥बिंद्वादिभूपुरांतः॥सृष्ट्याख्यः॥
पादजानूरुमूलनाभिहृदयकंठमुखनेत्रद्वयमूर्द्धसुक्रमेणत्रिपुराचक्रेश्वरीमंत्रान्नमोंतादिन्य
सेदितिचक्रन्यासः॥अथमहाशक्तिन्यासः॥आदौजगच्छून्यंध्यायंनिरालंबमुद्दयाक्षरंसंस्थि
त्वा४हूंपृथिव्यै॥इतिस्वासनाधःसंपूज्य॥आसनंस्पृशन्हृल्लेखांसप्तधाप्रजप्य॥स्वासनेस
प्तशक्तीःपूजयेत्॥यथा॥४जंजया·४विंविजिता·४जंजयंत्यै·४अंअजिता·४अंअपराजि
ता·४संसंगमायै·४रंरमायै·४इतितत्तः॥मूलविद्ययाप्राणायामंत्रिधाकृत्वा॥अस्यमहाश
क्तिन्यासस्यपरशिवऋषिः॥अतिजगतीछंदः॥श्रीमहाशक्तिर्देवता॥श्रीविद्याप्रीतयेन्यासे
विनियोगः॥ऐंह्रींश्रींइतिकरषडंगंन्यासंकृत्वा॥महाशक्तिरूपांमूलदेवींहृदिध्यात्वा॥तद्रूपं
स्वदेहंध्यायन्॥यथा॥योनौ४ऐंह्रींश्रींनमः॥नाभौ४ह्रांह्रींहूंनमः॥कराग्रयो४क्लांक्लींक्लूं॥हृदि४

सौ॰ क॰॥

॥२१॥

ह्रांह्रींह्रूं॰ ललाटे४ सांसींसूं॰ कर्णयोः४ ह्रां ह्रीं ह्रूं॰ लिंगमूले४ ह्रां ह्रीं ह्रूं॰ चुबुके४ सौः श्रीं सौः॥
ब्रह्मरंध्रे सकलमातृकामूलभूतं सर्वानुस्यूतं च अकारं ध्यायन्४ ऐंईसौः अं नमः। ततः। अका
रमयानन्याआकाराद्यान् ध्यायन्। तालुमूले। ऐंईसौः। आं नमः। नासाग्रे७ इं॰। उपस्थे। ईं। गु
दे७ उं पृष्ठे७ ऊं॰ कटिमध्ये७ ऋं॰ दृगग्रे७। ॠं। पृष्ठोर्ध्वे७। लृं। लंबिकायां७। ॡं सर्वांगे७ एं। शिव
शक्तिसामरस्यमयं ऐंकारं ध्यायन् बुद्धे७ ऐं। लिंगमध्ये७ ओं नादे७ औं नादांते७ अं कंठे७
अः हृदि७ कं मस्तके७ खं जंघयोः७ गं स्तनयोः७ घं नासिकायां७ ङं॰ भ्रूमध्ये७ चं वामकुक्षौ७
छं। दं॰ कुक्षौ७ जं ऊरुमूलयोः७ झं दंते७ ञं जिह्वाग्रे७ टं मुखे७ ठं कक्षयोः७ डं अस्थिषु७ ढं
चित्ते७ णं नाभौ७ तं ललाटे७ थं कर्णरंध्रयोः७ दं कपोलयोः७ धं नेत्रयोः७ नं ऊर्ध्वसहस्रक
मले७ पं अनाहते७ फं स्कंधयोः७ बं भ्रूमध्ये७ भं हनुमूलयोः७ मं तालुमूलयोः७ यं गुदलिंग

॥श्री॥

॥२१॥

मध्ये ० रं जिह्वायां ० वं वाममूर्द्धादिवामपादरक्षपार्श्वक्रमेण दक्षमूर्द्धान्तं व्यापकत्वेन ० शं तालु मूलयोः ० षं सर्वांगे ० सं सर्वांगे ० हं परमस्तके ० ळं संधिषु ० क्षं कुंडलिन्यां ० ॐ कुंडलिनी सुषुम्णामार्गेण षट्चक्रभेदक्रमेण ब्रह्मरंध्रस्थ चंद्रमंडलेलीनां विभाव्य ० अं क्षं ० रक्षरक्षशू लिनि मां त्रैलोक्यानंददायिनी ॥ रक्षमां त्रिपुरे देवी रक्षमां त्रिपुरेश्वरी ॥ १ ॥ रक्षरक्ष महादेवी अ स्मदीयमिदं वपुः ॥ ऐं ह्रीं श्रीं ह्स्ख्फ्रें ह्सौः ह्स्ख्फ्रें श्रीं ह्रीं ऐं सम यिनि मदिरानंद सुंदरी सम स्तसुरावंदिते भुजंगभूपालमौलिमालालंकृत चरणकमले विकटदंतघटाटोप निवारिणी मदीयं शरीरं रक्षरक्ष परमेश्वरी हुं फट् स्वाहा ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वाहा। ॐ भूर्भुवः स्वः स्वाहा। २५। नरांगमालाभरणभूषिते महाकौलिनी महद्ब्रह्मवादिनी महाथ नोन्मादनकारिणी महाभोगप्रदे अस्मदीयं शरीरं वज्रमयं कुरु २ दुर्जनान्हन २ दुष्टमहीपा

ला॰ भक्षय २ परचक्रं भंजय २ जयंकरि गगनगामिनी त्रैलोक्यस्वामिनी यल्व्यूं म्ल्व्यूं वेल्व्यूं ८
म्ल्व्यूं श्रीभैरवि प्रसादय स्वाहा ११४ कुलांगनाकुलं सर्वं मदीयं परमेश्वरी॥ देवी रक्षतु दिव्यो
गी दिव्यात्मा भोगदायिनी॥ रक्ष २ महादेवी शरीरं परमेश्वरी॥ मदीयं मदिरानंदे आपादतलमस्त
के॥ इति व्यापकेनात्मरक्षां कृत्वा॥ त्रिपुराख्या महादेवि भुक्तिमुक्तिफलप्रदा॥ न गुरोः सदृशं
वस्तु न देवः शंकरोपमः॥ न च कौलात्परो योगो न विद्या त्रैपुरी समा॥ न च शांतेः परं ज्ञानं न चक्षां
तेः परं सुखं॥ न वै शक्तिसमो न्यास्यो विद्याने भुवने ष्विह॥ दर्शनेषु समस्तेषु षडंगेषु विशेषतः
॥ दिव्यरूपा महादेवी सर्वत्र परमेश्वरी॥ ४॥ इति न्यासविद्ययोः महिमानं स्मृत्वा॥ पीठोपपीठ८
शिरस्थ गगनागिरि भुवन गोकुल निवासिनी जयंती कुलशक्ती महीतल पातालनिवासिनी
कुलकौलविभेदिनी सकलजनमनआनंदकारिणी करोतु मम चिंतितं कार्यं भैरवीशनमेकं

पुनातुपरमेश्वरीमदनमंडलालंबिनीसप्तकोटिसहस्राणांमंत्राणांपरमेश्वरी१६॥५ॐऐं
नमोभगवतित्रिकोणत्रिधावर्तेमहालिंगालंकृतेत्रैलोक्योत्पत्तिस्थितिप्रलयकारिणीसह
लह्रींकंदर्पानंददायिनीसहह्रींअग्रमदंडरखेसहह्रोंचित्स्वरूपेपाशांकुशालंकृतेवद२वाग्वा
दिनीश्रीभ्रष्टमहीपालराज्यप्रदेऐंवरदाभिनहस्तेसमस्तजनानंदकारिणीक्लीं२कामराज
बीजाश्रयेद्रांद्रींक्लींब्लूंसःक्षोभयपरक्षोभिणीज्झौः३मथ२अभयप्रदायिनीचतुर्भुजेत्रि
नेत्रेप्रेतासनोद्धारिणीमहाकपालमालालंकृतेचंद्रकृतशेखरेत्रिपुरेभुक्तिमुक्तिफलप्रदेॐ
ऐंॐनमःसिद्धंअंक्षंसंजंथंसिमःनॐऐंॐसर्वबीजमातःश्रीसमयिनीममममनोरथंदेहिस्वा
हा२३इतिमंत्रद्वयंपठित्वा४ऐंईंसौःमंत्रराजायनमः॥इतिनत्वासकृत्॥त्रिपुराविद्यागणंजपेत्४
॥ऐंज्झौःसहलह्रींसहहौंऐंसहह्रींसहहूं१९कामत्रिपुरायैनमः॥इतिप्रणमेत्॥सर्वत्रविद्यागणे४

सौ॰क॰।
।२३।

ऐं ह्रीं क्लीं ज्ञों ज्ञौं ५ त्रिपुरभैरव्यै नमः ४ ऐं ह्रीं सः वाक्त्रिपुरायै॰ ४ ऐं ह्रीं श्रीं ज्ञोः ४ लक्ष्मीत्रिपुरायै॰
ऐं ह्रीं सौः वह्नित्रिपुरायै॰ ४ ऐं क्लीं २ मोहनीत्रिपुरायै ४ ऐं क्लीं ब्लूं स्त्रीं ४ भ्रामरीत्रि॰ ४ ऐं ह्रीं श्रीं फ्रें ज्ञोः ५
त्रैलोक्यवासस्वामिनीत्रिपु॰ ४ ऐं डां डः हंसा त्रिपुरा॰ ४ ऐं २ सौः ३ कौलिकात्रि॰ ४ ऐं २ सौः ३ चंडिकात्रि॰ ४
ऐं २ सौः ३ तालुमध्यात्रि॰ ४ ऐं २ सौः ३ कपालांकुरवासिनीत्रि॰ ४ ३ नतः ठः २ इत्यथाशक्ति जपित्वा
स्वशिरसि रक्तपुष्पैः ४ ऐं ईं सौः आत्मने नमः इति संपूज्य॥ पंचोपचारैः स्वात्मानमभ्यर्च्य ४ ऐं ईं सौः
इति जपन् स्वदेहं महाकामकलात्मकं ध्यायन्॥ श्लोकदशकं न्यासानुसंधानेन पठेत्॥ यथा रु
द्रशक्तिमयं देहं मदीयं त्रिपुरं कुरु। देहि मे वरदे देवेशि नित्यं नित्यमभीप्सितं॥१॥ मस्तके मंगला
देवि ललाटं कुलसुंदरी॥ नेत्रयुग्मं महाकालि रक्षिका रोरक्षतु कुटस्थी।२। कपालीकर्णगर्भे चुकयो।
लौकमलावलि॥ दंतान्रक्षतु चामुंडा चुबुकं मेरुवासिनी॥३॥ भ्रूमध्यकंठदेशं च रक्षेत्त्रिभुवनेश्व

।श्री॰।
।२३।

री॥ जिह्वांसरस्वतीरक्षेत्तालुकंतालुवासिनी॥४॥ स्कंधानुमेकपिलाक्षस्कंधेस्कंधानेकुलमालि
नी॥ कुक्षौविनायकीरक्षातुजयानंदास्तनद्वये॥५॥ कंठकूपेमहालक्ष्मीर्हृदयेचंडभैरवी॥ ब्रह्मा
णीनाभिदेशेतुरक्षातुज्वालावतीगुदे॥६॥ लिंगेलिंगेप्रभाचैवमुंडिनीमेदमंडले॥ नाडीचक्रेम
हावेगादुद्गारादक्षिणेकरे॥७॥ वामहस्तेमहामायाविद्याहस्तांगुलीषुच॥ वेदलीवामपादेचरक्षा
तुचक्रायुधान्विता॥८॥ तथादक्षिणपादेतुएकपादासुरेश्वरी॥ पादांगुलीषुकौमारीरोमकू
पेमहोद्भवा॥९॥ मंडलानखमूलेतुवाहीनखमूर्द्धसु॥ जालंधरीजलस्थानेकामाक्षीकाममध्य
गा॥१०॥ उड्डियानाभिलिंगांतनासांतेपूर्णपीठगा॥ पृष्ठवंशेजयादेवीअस्थिसंधिषुचर्चिका
॥११॥ त्वचिरक्षातुचर्मधारारसेनित्यंमहायशा॥ रक्तमध्येमांसकेचरक्षातुमेहंसिनीशुभा॥
॥१२॥ माहेश्वरीचकौमारीद्वेचतेरक्षातुचांगयोः॥ वामदक्षिणयोश्चैवधीरालोकटिसंधिषु॥

॥१३॥ देवीरक्षतुमेगात्रंमस्तकंकुलकामिनी॥पृथिव्यापस्तथातेजोवायुराकाशमेवच॥१४॥पं
चभूतेषुभूतेशीसदारक्षतुमेकुलं॥राज्यंददातुमेचैंद्रीप्रजांचैवप्रजावती॥१५॥मर्यादांदातुमेनित्यं
धनंधान्यंयशस्तथा॥रणेराजकुलेचैवशत्रुमध्येमहावने॥१६॥रक्तनेत्रामहादेवीकरोतुममचिं
तितं॥समयासमयंरक्षेद्दिव्यांविद्याकुलागमे॥१७॥साधकानांजगन्नाथभुक्तिमुक्तिफलप्रदा
॥त्राणानुकरोतुमेसिद्धिंत्रैलोक्यविजयासुखं॥१८॥घंटालीयामहाविद्यासामेयच्छतुमंगलं
॥सप्तकोटिसहस्राणांमंत्राणांनायकानुया॥१९॥सामेसुरेश्वरीदेवीसदासिद्धिंप्रयच्छतु॥
उल्कामुखीमुखेष्ठातुमार्जारीदेहसंधिषु॥२०॥भद्रकालीतुयाविद्यासामेस्थातुशिखाभुवि॥
त्रिकोणंचत्रियावर्तंत्रैपुरंचक्रमुत्तमं॥२१॥मस्तकेस्थातुमेनित्यंतस्यांतर्बहुरूपिणी॥पूर्वोक्ता
त्रैपुरीशक्तिःस्थातुमेमन्मथोत्थिता॥२२॥क्षोभयंतीजगत्सर्वमदिरानंदविह्वला॥निवासंकु

रुमदेहे सांप्रतं कुरु योगिनी॥ २३॥ एह्येहि त्वं महादेवी सिद्धियोगिनि मे कुले॥ शत्रूणां घातनार्था
य जंतूनां भोगदायिनी॥ २४॥ महायोगिनि देहेस्मिन् सर्वदा निलयं कुरु॥ माहेंद्री च शिखास्थातु
यानि मध्ये गणेश्वरी॥ २५॥ प्रेतासीनाम विख्याता करोतु कुशलं मम॥ डाकिनी पूर्वभागे च मम सौ
ख्यं प्रयच्छतु॥ २६॥ साकिनी पश्चिमांगेषु चाक्षिणे चापिराक्षसी॥ वामभागे महामाया करोतु कुश
लं मम॥ २७॥ अस्मदीयशिरस्था मे सदा तिष्ठतु भैरवी॥ याविशाला विशालाक्षी निर्मला मलवर्जि
ता॥ २८॥ सा योगिनी महायोगा स्थातु श्रीमस्तके मम॥ या कालकलिका काली॥ कालरात्री तु कथ्यते
॥ २९॥ सा योगिनी महायोगा स्थातु श्रीमस्तके मम॥ या निशाचरराजन्य पूजिता च निशाचरी॥ ३०॥
सा योगिनी महायोगा सातु श्रीमस्तके मम॥ या चोर्ध्वकेशिका नाम मुक्तकेशी महाभया॥ ३१॥ या
वीरेति समाख्याता वीराणां जयदायिनी॥ सा योगिनी॥ ३२॥ या मालिनी समाख्याता ना सायैविं

दुमालिनी॥ सायो॰॥३३॥ याकंकालकरालांगी चंडकंकालकुंडला॥ सायो॰॥३४॥ याप्रचंडावि
रूपाक्षी विरूपा विश्वरूपिणी॥ सायो॰॥३५॥ खद्धांगीकथ्यते या च रौद्रीरूपेण पूजिता॥ सायो॰॥
॥३६॥ कालयोगेनमः सिद्धा या लोके श्रूयते कलौ॥ सायो॰॥३७॥ प्रेताक्षी कथ्यते या च पेत्कारा कं
टगर्जिता॥ सायो॰॥३८॥ धूम्राक्षी या समाख्याता शास्त्रे स्मिन्योगिनीमता॥ सायो॰॥३९॥ घोररू
पा महादेवी कथ्यते या कुलागमे॥ सायो॰॥४०॥ विश्वरूपा विशेषेण करोति च जगत्त्रयं॥ सा॰॥४१॥
भयंकरी समादिष्टा या चोक्ता वै कुलागमे॥ सा॰॥४२॥ कपालमालिका प्रोक्ता या देवी मुंडधारि
णी॥ सा॰॥४३॥ भीषणी भैरवी नाम या देवी भीमविक्रमा॥ सा॰॥४४॥ न्यग्रोधवासिनी या च कथ्य
ते च सुरार्चिता॥ सा॰॥४५॥ भैरवी भीषणी या च भैरवाष्टकवंदिता॥ सा॰॥४६॥ प्रोच्यते दीर्घलंबो
ष्ठी महामाया महाबला॥ सा॰॥४७॥ खद्धांगी या महाशक्तिः संसारार्णवतारिणी॥ सा॰॥४८॥ या

समस्तेषुतंत्रेषुप्रोच्यतेतंत्रवादिनी॥सा०॥४९॥कालघ्नीकथ्यतेयाचयुगांतेपरमेश्वरी॥सा०॥५०॥
ग्राहिणीतिसमाख्याताषुरासुरमहोरगा॥सा०॥५१॥चक्रिणीगद्यतेयाचएकपादत्रिलोचना॥
सा०॥५२॥याविश्वबाहुकादेवीविश्वनाथप्रियासदा॥सा०॥५३॥दर्शनेषुसमस्तेषुविदिताभुवनेश्व
री॥सा०॥५४॥कंठकाच्छेदनार्थायशास्त्रमाकंठकीस्मृता॥सा०॥५५॥कीलकेकथ्यतेयाचसप्तह
स्तीमहाबला॥सा०॥५६॥संग्रामेयामहादेवीमहामारीतिकथ्यते॥सा०॥५७॥यमदूतीतिविख्या
तायासुरासुरपूजिता॥सा०॥५८॥करालिनीतियादेवीमहामायामहाबला॥सा०॥५९॥ललितां
बामहाराज्ञीसर्वचक्रैकनायिका॥सा०॥६०॥नासाग्रेकौलिकीस्थातुमदिराक्षीतथामुखे॥व्यो
मजंघाकपोलेचतालुकेचापधारिणी॥६१॥द्राविणीक्षोभिणीचैवस्तंभिनीमोहिनीतथा॥रौ
द्रीकर्ममहाघंटाडामरीचरितामतिः॥६२॥ऐंह्रींश्रींकुलमाताचकाकवक्त्राप्यधोमुखी॥क्षपा

सौ·क॰।

।२६१।

लकुंडलाद्दीर्घकपालीकुलमालिनी॥६३॥देवीरक्षतुमेगात्रंमस्तकंकुलमालिनी॥भूमिरापस्तथातेजोवायुराकाशमेवच॥६४॥पंचभूतेषुभूतेशीसदारक्षतुमेकुलं॥राज्यंददातुमेवैद्वीपजांचैवप्रजावती॥६५॥मयाददातुमेनित्यंधनंधान्यंयशस्तथा॥रणेराजकुलेचैवशत्रुमध्येमहानने॥६६॥रक्तनेत्रामहादेवीकरोतुममचिंतितं॥समयासमयंरक्षेद्विद्याविद्याकुलागमं॥६७॥साधकानांजगन्नाथाभुक्तिमुक्तिफलप्रदा॥द्विजरात्रिजयामोल्काकदलीदलिताखिला॥६८॥गायत्रीचांबिकातारापार्वतीकमलप्रभा॥मोदिनीप्रमदाभारामदनामदरातुरा॥६९॥भीषणाभीषणान्नापेतसिद्धाविभीषणा॥क्षुधातृष्णातथानिद्राकांतिर्वृद्धिस्तथाद्युतिः॥७०॥संध्याधृतिरतिक्षांतिर्यनिशंपरिपठ्यते॥सुरनाथेतिविख्यातानगरेनरदेवता॥७१॥ग्रामदेवीत्वधिष्ठात्रीपीठपीठेश्वरीविदुः॥कावेरीनर्मदाचैवगंगाचयमुनोच्यते॥७२॥गोदावरीमहापुण्याप्रोच्यतेचा

।श्री।

।२६१।

प्यरं धत्ती ॥ त्रैलोक्येपिमहादेवीस्त्रीनाम्नीचाप्रकारिका ॥ ७३ ॥ सादेवीरूपलक्षातुस्थातुश्रीहृ
दयेमम ॥ सुवर्णरेखिनीप्रोक्ताविद्यासाप्रोच्यतेकिल ॥ ७४ ॥ निर्मूलिनीभुजंगानांसाकरोतुसु
खंमम ॥ कुरुकुल्लेतिविख्यातापक्षिराजमुखोद्भवा ॥ ७५ ॥ याविद्यासामहारूपाजिह्वाग्रेस्थातुमे
सदा ॥ ॐकारिणीतिविख्यातादेहेस्थातुसदामम ॥ ७६ ॥ विद्यापहारिणीनामकलिरूपविदारि
णी ॥ भेरुंडास्थातुमेकंठेलोतलास्थातुमस्तके ॥ ७७ ॥ तथासुबलरेखापिमूलस्थातुसदामम ॥
जांगलीविषनाशायवाचासिद्धिंकरोतुमे ॥ ७८ ॥ सर्वसिद्धिकरीविद्याभुक्तिमुक्तिफलप्रदा ॥ अ
हंब्रह्मा अहंविष्णु अहंदेवोमहेश्वरः ॥ ७९ ॥ सर्वभूतनिवासोहंलोकेश्रीचक्रचिंतकः ॥ शक्तिन्या
सेनपूतेनशरीरेणसुरासुराः ॥ ८० ॥ प्रदत्तादेशमात्रेणआज्ञांकुर्वंतुमेसदा ॥ यत्किंचिद्योगि
नीरूपंत्रैलोक्येचास्तिशंकरी ॥ ८१ ॥ नत्सर्वस्यान्निजदेहेशक्तिन्यासउपासने ॥ कामिनीकुरुल्ले

चापियान्यासंशक्तिनिर्मिता॥८२॥तांदेवींदिव्यरूपस्थांसंसारेत्रिपुरांविदुः॥नमोस्तुतेजग
न्मातर्न्नमोस्तुभुवनेश्वरी॥८३॥नमोभोगप्रदेदेवीनमोदेविमहेश्वरी॥प्रकटागोपितासर्वानि
र्वाणाभैरवीशिवा॥८४॥संभ्रमारिजयाहंसाशुभासाजलदेवता॥यक्षणीचूडकन्याचतथा
चाकाशगामिनी॥८५॥भूचरीचरिताकुंभीसर्वागमनिवासिनी॥रंजिनीदेवमैत्रीचप्रसि
द्धामदिरालिका॥८६॥पूजितासर्वसिद्ध्यर्थंशास्त्रेस्मिन्योगिनीमते॥स्थापिनीकथ्यतेस
द्भिःसानंदावनवासिनी॥८७॥चतुःषष्ट्याश्रयेदेवीयोगिन्योयेनचिंतिताः॥आधारेलीयमा
सुमयायोगीयोगविद्भवेत्॥८८॥ललाटेमंगलास्थातुविरजास्थातुमस्तके॥एकाक्षीदक्षिण
स्कंधेवामेचैवत्रिलोचना॥८९॥जयंतीस्थातुमेकुक्षौकट्यांकंदर्पकुंडली॥मालिनीलिंगसं
धौचहृदिस्थातुसमृद्धिनी॥९०॥अंबिका ष्टवंशचपार्श्वयोस्थातुमेदिनी॥दिग्राजागीक

रायेचनागेंद्रीनखसंधिषु॥८१॥व्याघ्रवक्त्रीचजंघायांस्छातुपातुतलेमहीं॥अमृतारांखि
नीरंध्रेशोचनेचविलासिनी॥८२॥कालिंदीमूलजिह्वांचरलंरक्षतुरक्तिनी॥शंगलांजांगना
रक्षेदस्छिनीचास्छिसंधिषु॥८३॥वचंरक्षेतुचलाक्षीममरोगप्रणाशिनी॥उड्डाकुरलेशां
तिसदैवममविग्रहे॥८४॥पादापादतलस्छातुपथिरक्षंतुपंथिनी॥मज्जिनीदेहमज्जातुशुकं
शुक्रेश्वरीतथा॥८५॥चौराग्निराजसर्वेभ्योभयरक्षतुभैरवी॥दुष्टानांदृष्टिबंधंतुसदाकु
र्यात्तुबंधिनी॥८६॥चपेटीनामयाविद्यासामेकुर्यात्तुमंगलं॥मर्कटीघंटकर्णीचहनुमद्गीति
रावणी॥८७॥घुर्घुरीकीर्तिविख्यातावंदेविद्याचतुष्टयं॥चेटकाज्ञानदाविद्याकोमारीचरणा
वली॥८८॥विघ्नजैरोस्तुतानामतुष्टासंतानरूपिणी॥मूलकाशस्छिताहंसीपताकीदलनोद्धता
॥८९॥दशैतामंत्रविद्यास्तुतिष्ठंतुममस्तके॥शुभामेचाग्रतःस्छातुलोहितास्छातुदक्षिणे॥९०॥

वामांगे रतिचास्थातु पश्चिमा स्थातु मृं खलु ॥ शिखायां शंखिनी रक्षेदस्त्रे त्वस्त्रवती सदा ॥ ८९ ॥ कवचे कवचांगी च नेत्रे नेत्र कृतो सवा ॥ तिष्ठंति योगिनी रूपा त्रैलोक्ये स चराचरे ॥ २ ॥ योगिन्यायाः कृताः सर्वांगे हं कुर्वंतु मेव पुः ॥ पुत्राणां च तथा देयो भक्तानां च विशेषतः ॥ ३ ॥ शक्तिन्यासस्त्वयं देवी न देयो यस्य कस्यचित् ॥ मनुष्याणां महीलोके चिंतितार्थफलप्रदः ॥ ४ ॥ यः करोति सदा न्यासं षोढान्यासादिकं शिवे ॥ स जीवन् शक्तिरूपो वै त्रैलोक्योन्मूलनक्षमः ॥ ५ ॥ अयं तु परमो न्यासः सकृद्विन्यस्य देहके ॥ सकलं न्यासजालानां यावज्जन्म फलं लभेत् ॥ ६ ॥ शक्तिन्यासकृते जीवे यः कश्चिच्छेदको भवेत् ॥ कर्मणा मनसा वाचा तस्य पातो भविष्यति ॥ ७ ॥ इति महाशक्तिन्यासः ॥ अथ सौभाग्यवर्द्धनन्यासः ॥ ब्रह्मरंध्रे षोडशीमरुणप्रभां ध्यात्वा ॥ पुनस्तत्र स्रवत्सुधां महासौभाग्यदां स्मरेत् ॥ वासांते ॥ सरलोर्ध्वाग्रतर्जनीयुतवाममुष्टिरूपसौभाग्यदं

डिनोमुद्रांपादक्षिण्येनभ्रामयेत्॥पादाधः॥अंतरंगुष्ठवाममुष्टिरूपरियुजिह्वाग्रमुद्रान्य
सेत्॥ललाटमध्ये॥त्रैलोक्यस्याहंकर्त्रीतिध्यायन्॥षोढान्यस्य॥वदनेप्रादक्षिण्येन॥षो॰॥ग
लेऽर्द्धेषो॰दक्षपाददिवामपादांतंव्यापकत्वेनदेहेषो॰॥महायोगिनीमुद्रांमुखे॥न्यस्यप्रणमे
त्॥इतिसौभाग्यवर्द्धनन्यासः॥१७॥अथसंमोहनन्यासः॥षो॰॥अनामयामूर्ध्वंःपरिभ्रमणे
नब्रह्मरंध्रेन्यसेत्॥दक्षमणिबंधेअनामिकयाषो॰॥पुनस्तथैववामे॥ललाटेपुनरनामिकया
॥षो॰॥न्यसेतिसंमोहनन्यासः॥१८॥श्रीमाधवानंदनाथकृतेसौभाग्यपूर्वके॥कल्पद्रुमेप्रथम(
स्कंधेविशेषन्याससकलः॥इतिश्रीसौभाग्यकल्पद्रुमेन्यासस्कंधःसप्तमःसमाप्तः॥श्रीमन्
महात्रिपुरसुंदरीदेवतार्पणमस्तु॥श्रीरस्तुशुभंभवतु॥संवत् १९४१ शाके १८०६ पौषशुक्लेति ॥श्री॰॥
थौ १५ गुरौपुस्तकंसमाप्तं॥श्री॰॥ ॥श्री॰॥ ॥श्री॰॥ ॥श्री॰॥ ॥श्री॥ ॥श्री॰॥

॥इतिश्रीसौभाग्यकल्पद्रुमसप्तमस्कंधःसमाप्तः॥

वे॰ ३८ प॰ ५२

अष्टमस्कंध

॥श्रीगणेशायनमः॥ यस्याशेषविधिंसम्यग्ज्ञात्वासाधकोपिसन्॥ वीरेंद्रत्वंनलभतेतां(
मंवासलतंभजेत्॥ अथोपासकानामावश्यकःशेषविधिर्निरूपिते॥ तत्रादावुपासकानां
प्रायश्चित्तविधिः॥ तच्चचांद्रायणंकृच्छ्रमहासांतपनमितित्रिविधं॥ यथानुसारज्ञामादायशु
भयोगयुक्तायांसिताष्टम्यांउषस्युत्थितःमौनेनस्नानादिसंध्यांतंनिर्वर्त्य॥ गुरुज्येष्ठादिसमीपे
आचम्यप्राणानायम्यलिश्वाघुच्छितस्येजन्मप्रभृत्येतत्क्षणपर्यंतंकृतानामपराधानांअघानां
चक्षयद्वाराश्रीपरदेवताप्रीत्यर्थंमहासांतपनाख्यंदेवताव्रतंकरिष्येइतिसंकल्प्य॥ शिवाख्या
दिपुरश्चरणस्कंधोक्तस्थानेभूसुध्यादिषडंगन्यासांतंकृत्वामूलंपंचदशशतसंख्ययाजप्त्वा
जपदशांशेनदीक्षाप्रकरणोक्तसंस्कृताग्नौ अथवानित्यहोमवेद्यांसिद्धाग्नौघृताक्तैर्बिल्व
पत्रैर्हुत्वा॥ रात्रौवाचार्यादिद्वाराचक्रराजमभ्यर्च्यसामयिकपूजांतांनिर्वर्त्यस्वयमपियथायो

ग्यतः पात्राणां त्रयं चतुष्टयं पंचकं वा स्वीकृत्य एकैकपात्रं तेषु ध्यादिमिश्रितं मयूरांडमितं ग्रो
ष्टासंस्पर्शग्रासं भक्षयेत्॥ ततः पात्रसमसंख्यं चुलुकोदकं पिबेत्। ततः मूलशांतित्रयं प्रजप्य
सामेकाननुभोजयित्वा स्थंडिले ब्रह्मचर्येण शयीत एवं त्रिरात्रजपादिकं निर्वर्त्य चतुर्थदिने च
कराजसमर्च्य सामेकपूजां तत् कृत्वा गुरुमाचार्यं सामेकांश्च यथाशक्त्या दक्षिणाद्यैः संतोष्य देव
तायैश्रन्नं निवेदयेत्। ब्राह्मणाननुभोजयेत्। इतिमहासांतपनप्रायश्चित्तविधिः। अथ चांद्राय
आश्च। आततः पंचमे। आद्वानिसृजेत्। अथपूर्तिविद्या। सर्वानंदमयाद्वै द्वचक्रेचततथापरं। ब्रह्म

स्वरूपिणिपरामृतशक्तिश्च सर्वतः। मंत्रपीठयोगिवीरवागविद्यालिषडीरयेत्। अंतेसर्वत्रेश्वरीति

सकलाजागदेवच। उत्पत्तिमातृकापश्चात्सचक्राचसदेवता। सासनाचसमुद्राचससिद्धिः सायुधा

तथा। सवाहनासालंकाराथसचक्रेशिकाततः। परयाचाथापरयापराचपरयातथा। सपर्ययाच

सर्वोपचारैः संपूजिताततः। संतर्पितास्तुसर्वादौस्यात्तुरीयामहेश्वरी। ऋषिसागरचंद्रार्णासंत्रो

क्तोयंमहेश्वरी। प्रथमेद्वै। आत्। चतुर्थीद्वितीयेच। सर्वतः सर्वइत्येतस्मान्मंत्रपीठेत्यादिकं। तंदंते।

ईश्वरीति। तेन सर्वमंत्रेश्वरी। सर्वपीठेश्वरीत्यादि सर्वविद्येश्वरी संततं। चतुर्थे। आत्। एवं च पंच
मे। पश्चाच्च। षष्ठे चव। तथा सप्तमे। अथ तथाष्टमे। चाथाच। तथा। नवमे। च ततः। सर्वादौ संपूर्ण
विद्यादौ। सप्तचत्वारिंशदुत्तरशतलाक्षरो मंत्रः। अथ पंचपंचाकाः। लक्ष्मीबीजेन चाद्यास्याल्लक्ष्म्यै
वा परमेश्वरीस्पष्टं॥१॥ तारो रमापुटा माया कमले कमलालये। प्रसीदयुग्ममाद्यादि विलोमेन म
हेश्वरी। महालक्ष्म्यै च हृदयं वसुपक्षाक्षरो मनुः। महालक्ष्मीति संप्रोक्तेति। रमापुटा मायाश्रीबी
जपुटिताद्द्लुखा। आद्यादि। प्रणवादि चतुष्टयं विलोमेन। लक्ष्मीमायाकामराजस्त्रिशक्तिस्त्र्य
क्षरी स्मृता। त्रिशक्तिरिति विद्यानाम रमा सहकलां तु माया लक्ष्मीस्ततः परं। सप्ताक्षरी समाख्या
ता साम्राज्येति महेश्वरी। सकल इति स्वरूपं। आत्माष्टाक्षरविद्येव परंज्योतिः प्रकीर्तिता। कौशां

वेति महादेवि शृणुष्वाद्य समाहिता। ततः परा निष्कला च शांभवीति प्रकीर्तिता। अजापा तु पुरा

प्रोक्ता मातृकापि महेश्वरी। मायामूलद्वयकं। वाग्भवं तुर्यबाणश्च मरुच्छ्रोत्र मरुद्रणाः॥ बिं
द्वाढ्यं वामनेत्रस्था पंचकामाः प्रकीर्तिताः। एषा कल्पलताप्रोक्ता पंचकामेश्वरी शिवे। मूलद्वि
तीयकं क्लीं। तुर्यबाणाः। ब्लूं। मरुत्। सश्रोत्र तमरुद्रणः रैं तेन स्त्रीं। तारमायापुटं देवि त्रिपुरांबाद्य
बीजकं। सरस्वत्यै च हृद्यंरे द्वाणां परमेश्वरी। पारिजातेश्वरी नित्रिपुरांबाद्यं बीजं। ऐं। काम
वाक्शक्तियोगेन कुमारी त्र्यक्षरी मता। पंचबाणैः पुरा क्लैश्च पंचबाणेश्वरी भवेत्। तारोमाया
जया संजीवनी चामृतबीजकं। जीवं प्राणग्रंथिवैरंठ गुरुयुग्मां यबाणकं। मूर्द्धि चामृतबीजे
यंत्रयो विंशाक्षरी भवेत्। अमृतबीजं। जूं। संजीवनी स्यादिस्वरूपं। वैनिस्सजेत्। अंत्यबाणः सः।
वदयुग्मं वाक्भवादीनि त्रिपुरांबाद्यमेव च। क्लिन्ने क्लेदिनि पश्चात्तु महाक्षोभं कुरुद्वयं। द्वितीयं
प्रणवो मोक्षं कुरुयुग्मे तृतीयकं। बिंद्वाढ्यं सवरहितं भृगुणार्णा समीरिता। सुधासूरिति वि

॥सौ॰क॰॥
॥२९॥

स्याता त्रिपुरां बाद्यबीजकं। ऐं। द्वितीय त्रिपुरां बा द्वितीयं। क्लीं। तृतीय तस्या एव विसर्गरहि
तं बिंदुयुक्तं। सौं। अमृतेश्वरी तृतीया चात्र प्रोक्ता महेश्वरी। अन्नपूर्णापि देवेशि पुराप्रोक्ता वसा
भवेत्। रागकालोपरस्थयुतस्पर्शो बिंद्वाद्यन्तुषष्ठिगः। महाचंडं तथा तेजः संकर्षणं च कालि च।
मंथाने सर्वयुक्तेजः सिद्धलक्ष्मी मनुस्मृतः। ऋषिचंद्राक्षरी तेषां रागजकालस्थ उरस्थस्पर्शो रबिंद्वा
द्यन्तुषष्ठिगः। ईकारगतः तेन स्त्रीं महेत्यादि स्वरूपं। प्रथमे ईं। तथा च चर्यजेत्। सर्गयुक्ते जः हः। च
तुरक्षरं ततो बाला तारो हृदयमेव च। भगादि तीति सप्तार्णा राजमातं च गीश्वरी। सर्वोष्टकं तेजनम
नोहारीति सुखाच्चरं। जिविकामा तथा माया लक्ष्मी रत्नद्रुराजतः। तथा स्त्री पुरुषो देवं दुष्टपूर्वम्
गादथ। सखा ह्लोकाद्दरांकरी जनंमेवशमानय। शिरा विलोमं बाला च त्रितारी च शिखेछिवे। मनु
स्तु राजमातंगी रूपांबरधरार्णकः। भगेत्यादि रूपं। तत्र आदि सजेत्। तेन ॐ नमो भगवति र

॥श्री॰॥
॥२९॥

तिसप्तार्णा। अस्मिन्नवार्ई चइतियजेत्। सर्वे सप्तधा संस्थाप्य प्रथमस्यांतेजनमनोहारि द्वितीय
स्यांतेमुखरंजनि। तत्पश्चात् काममायालक्ष्मीबीजत्रयं। ततः राजन्तः इत्यादि पंचकांतेवशंकरी
ति। तेन सर्वराजवशंकरी सर्वस्त्रीपुरुषवशंकरीत्यादि सर्वलोकवशंकरी इत्यंतं ज्ञेयं। १८। लक्ष्मी
मायापुनर्लक्ष्मीभुवनेशीतु त्र्यक्षरी। १९। तारवाक् चंद्रशक्तिश्च कामः सप्ताक्षरी ततः। वार्ता लियु
ग्मं वाराहि द्विवाराहमुखि द्वयं। वाग् चंद्रो वाङ्मनः पंचतदादौ तु क्रमात् छिखेत्। अंधे अंधिन्ये रुधे
रुधिन्येतद्द्वेवहि। जंभे जंभिन्ये चरत्नं भे रत्नं भिन्ये पुनरेव च। मोहे मोहिन्ये द्वितीयात्त्रयं सर्वो च दु
ष्टतः। प्रदुष्टानां च सर्वेषां वाक् चित्ता चक्षुरेव च। मुखाद्गतिमतिको धजिह्वास्तंभं कुरु द्वयं। शीघ्रं व
श्यं कुरु द्वयं वाक् चंद्रो वाक् भवेत्तथा। चतुर्थोलंगतीपश्चात् वचास्त्रे शिरस्तथा। वाराह्यामनुरे
षस्यादत्तु पक्षेंदुवर्णकः। तारेत्यादि बीजपंचकं। चंद्रं ग्लौं। सप्ताक्षरी नमो भगवति। वाराही द्विद

यमित्यर्थः। नमः पंचधा नमइत्येतत्तिरेखतु। तदादौ नमइत्यस्यादौ क्रमात्। अं धे अं धि स्ते नमइ
त्यादिकं। द्वितीयात्रयं। आदावंत्तु पंचबीजेषु द्वितीयात्। वाग्भवमाराध्यत्र यं बीजत्रयं। सर्वेत्यादि
स्वरूपं। आतुतः। च। आत्। एव च। आदित्यजेत्। शंगखीदः इति पंचपंचिका। अथ वज्रेश्वरीमंत्रः।
वाङ्मायासर्वकार्यार्थं ततः साधिनिवेतततः। वज्रेश्वरीवज्रपदे वज्रपंजरमध्यगे। मायाक्लिन्नेचा
भवं चांकुशानियमदद्रवे। वज्रशंकुस्तथा मायावज्रनित्या च येनमः। अस्वाब्धिवर्णा इति सर्व
कार्येत्यादि स्वरूपं। प्रथमं ह्रं। ततः वे ततः तृतीयमाये। तेबीजं। चइत्यजेत्। अंकुशांकों। शंकुपं।
अं येद्वं च त्यजेत्। अथ त्रिपुरसुंदरीसमयविद्या। कामो भगवति प्रांते तुर्यबाणस्तदं ततः। का
मेश्वरी ततो माया सर्वसत्ववशंकरी। अं त्यबाणस्त्रिपुरभैरवी वाग्भवमेव च। विश्वकामो महा
त्रिपुरसुंदर्यै च हृततः। गगनांबुधिवर्णाय तुर्यबाणः क्लूं अंत्यबाणसः। अथाम्नायसमयदेवताः

वन्हिवायुस्पर्शयुताशुद्धविद्येत्यक्षरी। आदौ चतुस्त्वारयुतासमार्णयंसमीरिता। वन्हिह। वायु
स। स्पर्शर। लघुताशुद्धविद्या। ऌैं ऌीं ऌौ ः। इति पूर्वाम्नायसमय विद्या चतुरक्षरं तारवाक्वक्लि
न्ने क्लिन्नमदद्रवे। कुले शक्तिरस्तु मंत्रोयं मुनिचंद्राक्षरस्मृतः। क्लिन्नेत्यादिस्वरूपं। इति दक्षिणाम्ना
यः। चतुस्तारं रप्रसादपरा त्रिः खेचरी च सौः। भगशब्दाश्च चत्यं वेदंद्दमानंदभैरवं। अघोरेद्दित
यं चाघोरमुखीतिनतः परं। छ्रां छ्रीं किणिद्वयं विश्वे षडं पंचमखेचरी। आनंदभैरवं द्दंद्दं लक्ष्मी
पंचमषड्वकाः। प्रासादस्तुपराख्यश्चताहशः परमेश्वरी। मंत्रोयं परमेशानि पक्षवेदाक्षरोमनुः।
प्रासादपराऌौ ः। खेचरी स्ख्फ्रूं। आनंदभैरवदंद्द ऌस्म्ल्व्य्रूं स्स्म्ल्व्रीं। षडपंचमः। ऌैं तादृ
शः। पराख्यः प्रासादः परप्रासादः रघुनः षडः। इति पश्चिमाम्नायः। चतुस्तारं तारशं कुमहा
चंडयोगीश्वरी। चतुर्दशार्णेति शंकुभ्रं। इत्युत्तराम्नायः। उपस्थमृद्धिपायूचरसर्शोज्योत्स्नाम

।सो॰क॰।

।३२१।

हांततः। बाणाहंकारशब्दो च प्रीतिस्मृतिपराकिका। गंधोवरलिखेदेषमुनि चंद्राक्षरस्मृतः।
उपस्छमा। रुद्धिरवा। पायुभा। स्पर्शरा। ज्यो स्नार्थे। महाबाणस्वरूपं। अहंकारउ। शब्द्य। प्रीति।
ओ। स्मृतिग। पताकिकाए। गंधश्रा। वरूस्वरूपं। इत्यूर्ध्वाम्नायः। सेंदु क्लिन्नाख्छिनोवन्हिवायुर्व्य
जनरूपवान्। सेंदुज्वाला सुंदरी च शिवोहं सर्वबीजकः। शिवसंपुटबालांसमहः सूर्याक्षरालि
यं। बिंदुयुक्त नित्यक्लिन्नाख्छावन्हिहिंवायुर्व्यंजनरूसेंदुज्वाला ओ। सुंदरी अः। शिवअं अहंस्व
रूपं। सर्वबीजकः ह्सौः शिवसंपुटंबालासंलं अंसौः अं अहंस्वरूपं। इत्याम्नायः। अथबलिमंत्रः।
तत्रादौ मंडलपूजामंत्रः। वाग्भवं च ततो माया व्यापकामंडलायहृत्। व्यापकेत्यादिस्वरूपं। आ
दित्यजेत्। ह्रंनमः। एह्येहि देवीपुत्रांनेबटुकांनाथनःशिवे। कपिलांतेजराभारभासुरांतेत्रिने

।श्री॰।

त्रलः। ज्वालामुखा सर्वविघ्नांनाशयद्दितयंपटेत्। सर्वोपचारसहितं बलिंगृह्ण हृद्यं शिरः। बटु

।३२१।

कस्यबलेर्मंत्रः। पंचपंचाशदक्षरः। प्रथमेई। अंते। आत्। तः शिवे। द्वितीये। अंते २ ततृतीये।
आसटेत्। इत्युक्त्वा शेषंस्वरूपं। नाराय। गृण्ह इति च द्विवारं। १। योगिनीभ्यः शिरः सर्वयोगि
नीभ्योथवर्मवै। अस्त्रे शिरश्च मायादौ मंत्रः सप्तदशाक्षरः। शिरस्वाहा। अथवर्मवैयुक्त्वा।
शेषंस्वरूपं। यामिति सर्वमंत्रादौ २ आघर्णजातयोर्वर्मस्थानक्षेत्रानुपालवै। धूपदीपाद्य
सहितंबलिंगृण्हद्वयंततः। सर्वकामान्पूरकंस्यात्पंचत्रिंशाद्यदक्षरः। आघर्णक्षेत्रपालइ
त्यस्यक्षकारः। तस्यजातयः। क्षांक्षींक्षूंक्षैंक्षौंक्षः। इतिवर्महुं। स्थानेयादिस्वरूपं। आतुवै।
आततः इत्यजेत्। ३कं शिरःस्वाहा। ३ गांगींगूंगणपांतेवैतयेवरवराद्यद। सर्वजनंमेवश
मानतोनयबलिंवदेत्। गृण्हद्वयंशिरश्चायंस्यादेकत्रिंशादक्षरः। प्रथमेई। अंते। वै। आ
द्यद्वितीये। ततोवदेत्। इत्युक्त्वा शेषंस्वरूपं ४ नारोमायासर्वविघ्नःकृद्यः सर्वचभूचते।

॥सौ॰क॰॥
॥३२॥

ध्योहंमूर्द्धासर्वभूतेभ्यएषबलिर्नान्मम। अष्टाविंशाक्षरो ह्येषइतिसर्वविघ्नेत्यादिस्वरूपं। चच।
आदित्यजेत्। मूर्द्धास्वाहा। ५। क्षेत्रनामक्षेत्रपालराजराजेश्वरात्ततः। इमांपूजांबलिंगृण्हद्वय
मग्निप्रियांतथा। द्वाविंशार्णसमुद्दिष्टइतिक्षेत्रनामतःक्षेत्रनामः। काशीत्यादि। क्षेत्रपालेत्या
दिस्वरूपं। आत्तनइत्यजेत्। अग्निप्रियास्वाहा। ६। इतिबलिमंत्रः। अथनवरत्नमंत्रः। पंचरत्न
संपुटितेरमामायाद्वयेनतु। नवरत्नाख्यबीजानीति। लक्ष्मीमायाद्वयेन। श्रींह्रींइति। अथस
मर्पणमंत्रः। इतःपूर्वप्राणबुद्धिदेहधर्माधिकारतः। जाग्रत्स्वप्नसुषुप्त्याद्यवस्थासुमनसाततः।
वाचाकर्मणाहस्ताभ्यांपद्भ्यामुदरेणच। शिश्नायस्मृतंयदुक्तंयत्कृतंचाथतद्वदेत्। सर्वंश्रीगु
रुनाथस्यसमर्पितमथास्तुतःशिरःसमर्पणेमंत्राएकसप्ततिवर्णकः। इतिसुषुप्त्याआदिछेदः
द्वितीयेआद्ये। ततःतृतीये। चतुर्थेचाथवदेत्। पंचमे। अथतः। इत्यकारांशषंस्वरूपं। शिरःस्वाहा।

॥श्री॥
॥३२॥

अथोच्छिष्टश्यामलामंत्रः। उच्छिष्टचांडालीमातंगीसर्वज्जननतोवशं। करीशिरोमुखेदेवीवाग्भ

वंहृदयंशिवे। द्वात्रिंशत्यक्षरीति। आननतोइत्यजेत्। शिरःस्वाहा। मुखेसर्वादोहृदयन्नमः। अ

थोच्छिष्टभैरवीमंत्रः। त्रिलारंचननोच्छिष्टभैरवादेहियुग्मकं। बलिंगृण्हयुगंवर्मास्त्रंशिरोमनु

रीरितः। द्वाविंशत्यक्षरइति। उच्छिष्टेत्यादिस्वरूपंआदिसजेत्। एहिगृण्हइतिद्विःभैरवएही

ससंधिः। इतिद्वितीयस्कंधमंत्राः। अथनिंबपुष्पमंत्रः। तारोखंनिंबपश्चात्तु निंबासिनिंबनिं

बवोप्रियेसर्वामयाद्धारिणिवेपरचदेवताः। प्रियकारिणिवर्मांतेमूर्द्धा। द्वात्रिंशदक्षरः। निंब

सादिस्वरूपं। प्रथमेदेपश्चात्तु। चावेद्वितीये। आदेचत्यजेत्। अथदमनप्रोक्षणमंत्रः। अघो

रवाग्भवंघोरेमायासर्वचनस्तथा। सर्वेशर्वेभ्योचघोरेतरेलक्ष्मीनमोस्तुते। अस्तुरुद्रा

ख्यरूपेभ्योमायालक्ष्मीमुखेध्रुवः। रामाग्निवर्णइति। वाग्भवंमायालक्ष्मीध्रुवमितिबीजानि

॥सौ॰क॥
॥३२३॥

ध्रुवः प्रणवः। प्रथमेद्वे च। तथा द्वितीये च तु तृतीये आत्म इत्यजेत्। शेषं स्वरूपं। मुखे सर्वदा॥
अथाग्न्युत्तारणमंत्रः। रुद्रयामले काश्मीररहस्ये। भुवनेशीं रमां चोक्त्वा अग्नेवै अमृतान्मयं। कु
रु मृत्युंजयांतस्थयुगलं वै शिरोंतगं। अग्न्युत्तारणमंत्रोयं लिप्यर्णैः संप्रकीर्तिताः। जपेत्षोड
शवारं यो पुनः षोडशधा जपेत्। अग्नेपदस्य स्थाने तु कुलायंत्रादिनाम वै। इत्यग्नेत्यादि स्वरू
पं वै आत्। इत्यजेत्। मृत्युंजयांतस्थयुगलं जूंसः। शिरोंतगं स्वाहा। इत्यस्यांते। अग्नेअमृतेत्य
संधिः। अथ यंत्रगायत्री। यंत्रराजाय विद्महे वरप्रदाय धीमहि तन्नो यंत्रः प्रचोदयात्। चतुर्वि
शाक्षरी। आद्यद्वे तिस्यजेत्। शेषं स्वरूपं। अथाम्नायमंत्राः। सबिंदु विजया तुष्ट्यन्वा लास
गयुतानलः। त्र्यक्षरी शुद्धविद्येज्ञे यं इति। चित्रस्था बिजया वर्णो वाग्भवं संप्रकीर्तितं। शक्ति
रूपयुता तुष्टिः कामराजं सबिंदुकं। त्वाशांते सुंदरी तस्मिन्वायुः शांतयाख्यमीरितं। इयं बाल

॥श्री॥
॥३२३॥

र्यक्षरी।२। वह्निवायुसमष्टिरूपास्पर्शार्हिः कारकाः प्रिये। शुद्धविद्यात्रिबीजस्था द्वादशार्द्धभवेदियं।३।
सप्तार्णाय महापश्चात्स्तुकायत्रिभुतोवना। हुंकाराय राजमदमर्दनाय ततो वदेत्। शीघ्रं राजानं च मे
वशमानय शिरस्तथा। मनुश्चुकः श्यामलायाश्चंद्रवेदाक्षरः स्मृतः। इति ङे सप्तार्णो। ॐ नमो भगव
तेइति महेत्यादिमानपेसंतं स्वरूपं। पश्चात्ततो वदेश्च इत्यन्वका।४। सप्तार्णा श्यां श्यारिके च सकलांते
कस्तनथा। कोविदे मम देवीं च बोधयेति द्विधा शिरः। श्यारिकाश्यामलामंत्रश्चंद्ररामाक्षरः स्मृतः।
इति श्यां श्यारीत्यादि बोधयेत्यंतं स्वरूपं। चांते तथा च इत्यजेत्।६। सप्तार्णा वीरं वीणायै मम संगीत
शब्दतः। विद्यांप्रयच्छत पश्चाच्छिरः स्यात्परमेश्वरी। संगीतस्यामलामंत्रो रामपक्षार्णकः स्मृतः।
वीमित्यादि प्रयच्छेत्यंत स्वरूपं च शब्दतः इत्यजेत्।७। सप्तार्णा वैवेणवे च साहित्यां पूर्ववत्परं। सा
हित्यश्यामलामंत्रेति वेमित्यादि स्वरूपं। साहित्यशब्दाद्दूर्वरितं। पूर्ववत्संगीतश्यामलावत्।८। हसंती

हसितोल्लापेमातंगीपरिचारिकेभयविघ्नापदांनाशंकुरुयुग्मंचित्तंगल्ही।वर्मास्त्रंचशिरश्चांतेता
रोमायामुखेभवेत्।हसंतीश्यामल्लामंत्रोमुनिरामाक्षरोमतः।इतिहसंतीत्यादिकुरुद्वयंतंस्वरूपं।
त्तंगल्हीटः।मुखेसर्वादोत्तारोमायाच।लघुश्यामलागुरुत्रयमहगणपतिमंत्रंउद्धृताः।१०।अथ(
पीठमंत्राः।अनुत्तररत्तलरश्चविंदुयुक्तोततःपरं।शक्तिबीजंकामगिरिपीठायब्रह्मतलरं।अलश
रश्चमेपश्चात्रमोष्टादशवर्णकः।भुवनेशीरमाशक्तिःपश्चात्पूर्णगिरीतिच।विल्लुथास्मानंपूर्वस्या
दूर्णसंख्यापिपिर्वत्।शक्तिर्मायारमाजालंधरपीठायतलरं।रुद्रासपूर्ववत्पश्चान्नुखेस्या।
त्सप्तबीजकं।इतिअनुत्तरअलसरआकामगिरीत्यादिस्वरूपं।तलरंचपश्चा।इतिसृजेत्।अ
ग्रेप्येवंज्ञेयं।सप्तबीजकंचतुरोवाल्लाच।१७।समयस्तुद्धोद्धृता१८इतिपूर्वाम्नायः।सौभाग्यविद्या
उद्धृता।तारोग्निरूपस्पर्शस्तुतुष्टिविंदुयुता।शिवे।बगलामुखिसर्वात्तुदुष्टानुप्रदुवेततः।ष्टानां

मुखवाचं देवी पदं स्तंभयवेतलः। जिह्वां कीलय बुद्धिं च विनाशय द्वितीयकं। तारः शिरो यं वग
लामंत्रो नं दार्णवर्णकः। अग्निह। रूपठ। स्पर्शर। तुषिबिंदुयुताः। ह्लीं इति वगलेत्यादिनाश
येत्यंतं स्वरूपं। आतुरवेतलः। देवीवैतलः। चत्सनेतु। द्वितीयकं ह्लीं ॥२१॥ वाराही बटुकभैरवाति
रस्कारिणी मंत्रोद्धृताः ५ शंकुस्त्रं फ। द्वितुर्यरक्तं बिंदुयुक्तं ततः परं। भुवनेशी रमा चैषा षडर्णोस्य
ष्टभैरवः। शंकुफं फट् स्वरूपं। द्वितीयतुर्यस्वरस्थितं। भैरवनामानि। मंथानश्चाथ फट्कारः
खचक्रोर विभक्षकः। एकात्मानंद चंडौ च नभो निर्मल एव च। उमर्वायोभास्करप्रोक्तो देव्य
ष्टभैरवाः। त्रितारः पूर्णगिर्याख्यः सिद्धा मंत्रः षडक्षरः। इति पूर्णगिर्याख्यः। द्वितीयपीटमंत्र
गतबीजत्रयं। ह्रीं श्रीं सौः इति ॥२२॥ तासां नामानि। महापूर्वा दुर्मनं च सुंदरी विम्बपूर्तिका द
राकरालिकानंदा चिविडा च ततः परं। भीमाकराली चखराननेति परिकीर्तिता। विशालनय

नाचेतिनवांबालाः प्रकीर्तिताः।महादुर्मनाविश्वदत्ता इतिभुवनेशीरमाहुं फट् बटुकोवेदवर्ण
कः।२।एकंदश्मित्रोविरिंचिश्चबटुकत्रयमुच्यते।इतिलोपामुद्राकूटयुग्मंतुरीयान्तदनंतरं।
चतुर्विंशत्यक्षरोवेपदद्वयमनुस्मृतः।२७।प्रकाशश्चविमर्शश्चपदयुग्मंप्रकीर्तितं।इतिसम(
यविद्योद्धृता।इतिदक्षिणाम्नायः।४६२।लोपामुद्राभुवनेशीअन्नपूर्णाचउद्धृता।३।सविंदुंतुषि
मयाचकामराजस्ततःपरं।कूटद्वयंतुसौभाग्यंविद्यायास्तदनंतरं।मंत्रःकामःकलायालुवेदरू
पाक्षरोमनुः।४।आद्यद्वितीयपीठंतुदूतीमंत्रःषडक्षरः।बीजःकामगिरिपीठपूर्णगिरिपीठं
ततः।अथनामानि।योनिस्तदादिसिद्धादिनाथाचैवंमहादिका।दिव्ययोनिःशंखयोनिस्त
दाद्यासिद्धनाथका।पद्मयोनिस्तथासापिचांबातानयदूतिकाः।तदादिसिद्धादिनाथा।योनि
सिद्धनाथाइति।महापूर्तिकाएनयोरेवनाम्नोर्महाचद्मादो।तदाद्याशंखयोनिःसिद्धनाथेति

नथासापिपमयोनिः सिद्धनाथेत्यपि ॥ २३ ॥ तारो माया रमा शक्ति र्माया पंचाक्षरी मनुः ॥ शक्तिस्था
ने कामबीजं वाग्भवं चक्रमालपठेत् । अग्निसूर्यसोमपूर्वमंडलानां मनुस्मृतः ॥ २६ ॥ पंचं षट् द्वित्रि
तुर्यं वै भैरवार्णानुक्रमान्न्यसेत् । वीराणां मंत्र एषस्यात्संचवर्णो महेश्वरी । पंचहीं षट् श्रीं द्वि ह्रीं म
फट् त्रिफां तुर्यफीं इति । नामानि । सृष्टिस्थितिश्च संहारो रक्षो वै यम एव च । मृत्यो भद्रोथ च परा
क्रमो मार्तंड एव च । कालाग्निरुद्रश्च दशवीरांस्युर्भैरवांतकाः ॥ २६ ॥ भैरवांतकाः सृष्टिवीरभैर
वेत्यादिस्वरूपाः । चतुस्तारं कामबीजं रमा माया च शक्तिकं । रमामायेति नाथानां मंत्रस्याद्दशव
र्णकः । शक्तिकं शक्तिबीजं । अथ नामानि । मंगला चंडिका ज्येष्ठा कंचुकी पटहा ललः । श्रेष्ठा कूर्मा
च धनदा गंधास्यात्तुलतः परं । मुलगा चंपका पूज्या नथा कैवर्तका पुनः । मत्तंगगमना सूर्यनभो
भक्षे च स्त्रोलिका । रूपका दंष्ट्रका धूम्राक्षा ज्वाला लपरत्रतु । गंधारा चाथ गगनेश्वरा माया महा

॥सौ॰क॥
॥३६६॥

द्विका। नित्याशांलालतथाविश्वाकामुकोमाततनश्वरं। सुभगा च महालक्ष्मी विद्यामीनामृलाततः।
चंडालरिक्षासिद्धा च श्रद्धानंता चशांबरा। उल्कालतरस्तुत्रैलोक्याभीमावैराक्षसीलतः। मति।
नाचप्रचंडाचानंगाविधिचरातनः। अथानभिहिताचाभिमहावैसुंदरीलतः। विश्वेश्वरा च।
कौला चलतस्पश्चात्तुमहेश्वर। महाकलामहादेवीतत्पश्चाद्भयास्मृता। विकारा च महापूर्वास्त।
कालास्यातनःपरं। पूता च शर्वरी व्योमा नाथाश्चाष्टगुरुणाष्टकाः। नाथांतास्युर्महादेवीनाम्नासि
द्धाःप्रकीर्तिताः। सूर्यभक्षानभोभक्षाइतिद्वयंमहाद्विका। महामायामहापूर्वाविकारा च महास्मृ
ता॥८॥ समयविद्योक्ता। इतिपश्चिमाम्नायः॥२३७॥ लोपामुद्राख्यविद्यायांमहाद्वयविनीहि
तः। तुरीयायाभवेन्मंत्रोगुरुणाभूमिमितार्णकः। प्रथमद्वितीयंमायाविहीनतः।२। वाक्कुण्डिवि
दुरात्क्लिश्वसौभाग्यकूटयुग्मकं। संसृष्टिनित्यस्वाहेतिसविद्भिःरुक्तिनोतिच। पूर्णहृत्तुष्टि

॥श्री॥
॥३६६॥

बिंदुश्च महासंहारिणीति च। क्रूरं च चंडा तु काली फडंहि स्मं च महानघे। अनंतभास्करी चंडकालस्य
स्त्रं तु षष्ठिबिंदुकं। महासंहारिणी त्यादि फडंतं पूर्ववत्पुनः। हमित्यादि हृद्धृतं च समित्यादि शिरोंतकं।
तृतीयकूटं स्लस्यास्तु विलोमाद्यं त्रिबीजकं। महाद्यायास्तु मंत्रोयं भूतनंदाक्षरो मतः। वाग्वाग्भवं तु
षष्ठिबिंदुः शक्तिबीजं स्वरूपकं। शक्तिबीजं ई। इति सबिंदुग्निः हमिति च हृत्। तुषष्ठिबिंदुश्चेति। चातु
चं। अरत्रेति यजेत्। २ पाशमायांकुशाएहि परमेश्वरी शिरः। अश्वारूढेयमाख्याता द्वादशाक्ष
ररूपिणी। पाश आं अंकुश क्रों। एहीत्यादि स्वरूपं। वेति यजेत्। ३ वाग्भवं चाथ मिश्रांबायैनतो हृ
दयं वदेत्। मिश्रांबाया मनुः प्रोक्तः सप्तवर्णसमन्वितः। ४। वाक्माया शक्तिवेदश्च वाग्वादिनी शिर
स्तथा। वाग्वादिनी मनुः प्रोक्तो रामरूपार्णकः शिवे। वाग्वाग्भवं शक्तिबिजं वद युग्वद युग्मकं। ५।
अथ नव मुद्रामंत्रोद्धृताः। १४। वाग्भवं भुवनेशानि रमाबालाषडक्षरः। वीरावली मनुः प्रोक्तः पंच

धा परमेश्वरी। तंनामानि। ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः। वीरावली तिसंयुक्ता नामांते
परमेश्वरी। ४६। समयविद्योद्धृता॥ ३५७॥ इत्युत्तराम्नायः। प्रासादविद्या चैकाक्षरी परा द्याप्तसहरूपि
णी। प्रासादविद्या प्रासादपराख्यौः। परा चापरा प्रासाद। तस्य स्वरूपमाह। सहरूपिणीति। स्हौः
अत्र यद्यपि पारायणप्रयोगित्वेन विद्याद्वयरूपेणोद्धारो स्ति तथापि यंत्रराजानुरोधेन मूलतंत्रो
क्तसंख्यानुरोधेन चाम्नायेऽयमेकैक विद्याप्यक्षरी॥ १॥ परा च शक्तिरूपा वै। शक्तिबीजरूपा। २।
चतुस्त्वार खेचरी च शक्तिरंत्या त्रितारिका। पराशांभवमंत्रो यं नवार्णस्तु समीरितः। खेचरीं स्फ्रं
शक्तिबीजं अंत्या तु विपरीता। ३। अकारादिक्षकारांतं मालिनी मातृकामयी॥ ४॥ उग्रवीरं चाथ
महाविष्णुं चाथ ज्वलंतं च तं। सर्वतोमुखं पश्चान्नृसिंहं भीषणं तथा। भद्रं वै मृत्युमृत्युं च मान्यहर

॥ श्री ॥

दनाक्षरः। मंत्रराज इति। उग्रमित्यादिस्वरूपं। चाथा च च पश्चात्तु तथा वै तिसृजेत्। बालाबीज

त्र्यंकादिविद्याकूटत्रयादिकं। अंतेजपाक्रमादि्दंशदर्णस्या गुरुमंडलो प्रथमबीजंप्रथमकू
टमित्यादिसर्वांते अजपा। तंनामानि। आत्माचाथपरात्माचशांभवश्चापितत्परः। विशुद्धा
त्मगयोनीउक्तं टासप्तमएवच। चिप्रसन्नश्च विश्वश्चाप्रकाशः स्वप्रकाशकः। गुरुमंडलकं
देवीप्रोक्तं द्वादशसंख्यकं॥१८॥समयविद्योद्भृता॥इत्यूर्ध्वाम्नाः॥१८५॥अनुत्तराम्नायसमय
विद्योद्धृता॥लक्ष्मीमायांकामराजंवाग्भवंशक्तिबीजकं।वेदाद्यंचद्वितीयाद्यविद्यासौभाग्य
संज्ञिता।विलोमपंचबीजानिविद्येषाषोडशाक्षरी।वेदाद्यंप्रणवःद्वितीयंमाया।आद्यंश्रीं।पंच
बीजानिआद्यानि।२।कामबीजंकामसंकर्षिणीस्वाहा॥नवाक्षरी॥चतुस्तारयुतावक्त्रेकाल
संकर्षिणीत्वियं।कालेत्यादिस्वरूपं॥३॥यद्यपिसमयविद्यांतेअपेक्षितातथैवान्यत्रदर्शना
त्।तथाप्यनुत्तराम्नायविद्यानांअत्युत्तमत्वाविष्करणायादावेवाभिहिता।अत्रश्रीविद्याप्र

सौ॰ क॰॥
॥३८॥

तिपादिकेषु तंत्रेषु विद्याचतुष्टयस्य प्राधान्यमुक्तं। ताः विद्यास्तु। पराप्रासादा कामराज विद्यालो
पामुद्रा पराचेति देवसिद्धमानवेषु तद्विद्याप्रवर्त्तका गुरवः। दिव्यौघाः। सिद्धौघा मानवौघा इति
उपासकेन तेषां मूलगुरूणां नाम स्मर्तव्यमिति। तन्नामानि तंत्रेषु परिदृष्टानि अतस्तेषामुद्धार
इत्युच्यते। परमादिः शिव आद्यस्याननः कामेश्वरी स्मृता। दिव्यौघश्च महौघश्च सर्वप्रज्ञादिदेविका।
प्रकाशश्चेति दिव्यौघो दिव्यश्चित्रस्ततः परं। कमलश्च परस्तद्वन्मनोहर इति स्मृतः। स्वात्मप्रतिभ
इत्येवं मानवौघः समीरितः। आनंदनाथः शब्दांता चांबानास्तु स्त्रियः स्मृताः। मुनिवेदेभसंख्या
ताश्चतुस्तारं तथोदिताः। पराप्रासादविद्यौघः एवं सम्यङ्निरूपितः। परमशिव आद्यः। प्रज्ञादेवि
चिदानंदनाथः। इति पराप्रासादौघः। एतस्यावौघौघ इत्यपि संज्ञा। तत्रांतरे च स्यैलोपामुद्रौघ
मुक्तं॥ १॥ पराभट्टारिका चाद्या घोरः श्रीकंठस्ततः परं॥ अथ शक्तिधराः॥ क्रोधीशश्च त्र्यंबक एव च।

॥श्री॰॥
॥३८॥

पराभट्टारकश्चेतिदिव्यौघःसंप्रकीर्तितः॥प्रतिभश्चाथवीरोवैसंविदःसंविदेवच।सिद्धौघइति
विख्यातःसदाशिवमहेश्वरौ।संविच्छ्रीविघलःसंविततःश्रीमदनुत्तरः।योगश्चसंविदित्येवं
मानवौघःसमीरिताः।परौघश्चेतिसंप्रोक्तोमूलमादौतुसर्वतः।संविदितिसंविदांवाश्रीवि
घकः।श्रीविनंदनाथः।इतिपरौघः।२।परप्रकाशश्चपरशिवःशक्तिःपरादिकाः।कौलेश्वरश्च
शुक्लाघादेवीचाथकुलेश्वराः।कामेश्वरीचेतिदेवीदिव्यौघःसंप्रकीर्तिताः।भोगक्लिन्नश्चसम
यःसहजश्चततःपरं।सिद्धौघोगगनोविश्वाविमलोमदनस्तथा।भुवनश्चतथानीलःस्वात्मश्च
प्रियएवच।मानवौघइतिप्रोक्तःकामराजौघईरितः।शक्तिःपरादिकामराजशक्तिःसुकुदेवी
तिकामराजौघः।३।परप्रकाशश्चपराशक्तिःकामेश्वरीततः।वज्रेश्वरीचभगमालिनीलोपा
दिमुद्रिका।अगस्त्येतिदिव्यौघःकुलधर्मादिचार्यकः।मुक्तकेशीश्वरीदीपकलःसिद्धौघई

सो॰ क॰॥

॥३९॥

रितः। विह्नुदेवो मातृगुह्यस्तेजोदेवस्ततः परं। ॐजोदेवो मनोजयः परमः स्वामा च एव च। ज्ञा
नस्वमानवौघायं लोपामुद्रौघई रितः। लोपामुद्रा। धर्माचार्यः। इति लोपामुद्रौघ। अथ चरण
वासना। अत्र पूर्णदीक्षा। वना चरणचतुष्टयस्य मूर्ध्नि वर्णमयत्रिकोणकोणेषु मध्ये च न्यासः
कर्त्तव्यः। स च न्यासः पराप्रासादादि विद्याचतुष्टस्यापि पृथक्‌विधः। तत्रोपयुक्त मंत्राश्चरण
वासनामंत्राः। अंत्यबाणो वन्हिरेफसर्गः। शक्तिस्तथाजया। विसर्गाद्योचतौ सोहं शक्तिं सर्गौ
द्वितीयकः। हंसः सोहं शक्तिसर्गौ द्वितीयाहं स एव च। शिवः सोहं क्रमादेन चतुष्टयमुदीरितं।
वाणं बाणाश्चनंदार्णश्चानुस्वारमुखे भवेत्। प्रकाशचरणाभ्यां हृदेवमन्यत्र सर्वतः। विमर्शस्था
थ आनंदोन्यो लिप्यादस्ततः परं। अंत्यबाणसः। वन्हिरेफः सर्गः हः। शक्तिबीजं। विसर्गाद्यौ तौ
अः हः सोः इति द्वितीयकः हः एवमन्यत्र विमर्शचरणाभ्यां नम इत्यादि सर्वतः। सर्वत्र एवमग्रेपि

॥श्री॰॥

॥३९॥

ज्ञेयं। वन्हिवायुस्पर्शयुतः ज्वालाशसर्गो मरुन्मुखः। अंगदाबिंदुसहिताद्वयं सर्गस्तनः परं। शक्तिः
सर्गः स्तनो हंसः शिवः सोहमिति क्रमात्। भूपक्षरामनागार्णा चतुस्तारे मुखे भवेत्। प्रकाशः
श्च विमर्शश्च द्वयं तद्वत्तुरीयकं। वन्हिवायुस्पर्शयुतज्वालाशसर्गा ह्स्रौः मरुन्मुखः। स्हौः। अंग
दाबिंदुसहिता औं द्वयं ह्स्रौः स्हौः द्वयं प्रकाशविमर्शचरणाभ्यां नमः। इति तुरीयं ज्योतिष्पा
दः। शक्तिः शांतिः शक्तितारमायावर्मास्त्रमेव च। परमादथ घोरे च वन्हिस्पर्शरतींदवः। घोररू
पेण मायाच घोरान्मुखे च भीम भीषणी पश्चाद्धम द्वंद्व पिब द्वंद्वं नभो गदार खेरुरु ताश्च मा
यास्त्रं चेति वैक्रमात्। भूचंद्र भूतरामाब्धि वर्णस्यात्क्रमशः शिवे। आनंदचरणं देवी परांबा
त्रितयं तथा। मध्यमारभ्याग्नेकोणपर्यंतं तु क्रमान्न्यसेत्। शक्तिबीजं अघोरे स्यादिरुरुइ
सं तं स्वरूपं च माया बाणा सस सः एव च। आदथा च वन्हिस्पर्शरतींदवहूं अथ माया च आत्।

सौ॰क॰ ॥४०॥

चपश्चाद्दद्वं४नभोगदाहौंवैतित्यजेत्। आनंदचरणाभ्यांनमः।परांबाश्रीपादुकामित्यादि
त्रयंमध्यदक्षवामाग्रकोणेषुन्यसेत्। शक्तितारोतथामायाबिंदुद्वयस्यप्रसादयुक्। मध्ये
नमःशिवायेतिपराप्रासादएवच। शक्तितारोतथामायावर्मास्त्रंषोडशाक्षरी। महाद्यामातृका
नंदनाथश्चांतेनव्यापकं। पराप्रासादविद्यायाचरणस्यतुवासना। बिंदुद्वयःप्रासादःपरा
पराप्रासादयुक्द्वयं। तयोर्मध्येनमःशिवायेतिपराप्रासादःस्हौःमातृकानंदनाथश्रीःइति
व्यापकंकुर्यात्। नामैकदेशेनामग्रहणं। इतिपराचरणवासनेतिपाठः। अथपराप्रासादवि
द्याचरणवासना। शुक्लंशुक्लमिश्रमपिनिर्वाणंकूटयोजितं। व्यस्तयासमस्ताहंसश्चसोहंचोभ
यमेवच। हंसःशिवःसोभयंचाविपरीतंमहेश्वरि। मुनिनागेभरामाम्बीवर्णास्युःक्रमतःशि
वे। रत्नंशुक्लंमिश्रमपिनिर्वाणंचरणंन्यसेत्। कामराजाख्यविद्यायाश्चरणवासना। उभ

॥श्री॥
॥४०॥

यंचविपरीतंसोहंहंसः इतितेनक ४ हंसः रक्तचरणाभ्यांनमः। इत्यादितिकामराजवि
द्याचरणवासना। लोपामुद्राख्यविद्याया एवमेवमहेश्वरी। प्रकाशंचविमर्शंचद्वयंनिर्वा
णमेवच। लोपामुद्राख्यविद्यायाभवेच्चरणवासना॥ परांविद्यांविसर्गश्चमुखेनिक्षि
प्यविन्यसेत्। वेदवेदश्चतुर्दिग्वर्णालोपामुद्राचहीश्वरी। इयंपराख्यविद्यायाभवेच्चरण
वासना। लोपामुद्रावत्प्रकाशेतिपराचरणवासना। चित्प्रकाशानंदनाथसहजाश्चपरां
बिका। आदौखेचरीबीजेप्रसादपरमेवच। प्रासादपरखेचर्यौरमामायाचवाग्भवंल
क्ष्मीकामाख्यकूटंचशांतानंदाश्चनाथवै॥ सहजाश्चपरांबास्यादथमंत्रत्रयंशृणु॥ त्रि
पुरांबायुगलंशुक्लविद्यामहानलः। पीठशुक्लानलः पुष्पाशुक्लमंडलंवैमहा॥ पीठशुक्ला
दूपशुक्लमंत्रादथमहानलः॥ पीठशुक्लदीपशुक्लमुद्रापश्चान्महानलः। पीठशुक्लनतिमहा

।।सौ॰क॰।।
।।४२।।

प्रकाशानंदनाथच।।आद्यं द्वयंमहाविद्यावाकूटमितिशंकरी।।साद्यमाद्ययुगंदेविशुक्रं
रक्तपदंक्षिपेत्।प्रकाशिनीपरांबेतिप्रकाशानंदनाथके।।आद्यद्वयंकामकूटंरक्तविद्य
यमीरिता।।हाद्यंसाद्यंचेतियुग्मंशुक्लमिश्रपदंक्षिपेत्।आद्ययुग्मंतथैवांतेशक्तिकूटं
ततःपरं।मिश्रविद्येयमाख्याताचाद्याशुक्लाख्यकाभवेत्।चित्प्रकाशेत्यादिजंबिकेत्यं
तंस्वरूपं।आद्यइत्यजेत्।अंबिकांबाशांतेत्याद्यंबेइत्यंतंस्वरूपं।आद्यैवैआद्येतित्यजे
त्।त्रिपुरांबायंतंह्सौःइतिद्वयंशुक्लेत्यादिनंदनाथेत्यंतंस्वरूपं।।ततःआततःवेआत्।।
आदथांततःपश्चाततःइत्यजेत्।आद्यह्सौः।द्वयंद्विधाआद्ययुगंह्सौःइतिआद्यंस्हौः
इतिसर्वत्रशुक्लपदस्थानेरक्तपदंज्ञेयं।रक्तविद्येतिप्रकाशानंदनाथेत्यत्रप्रकाशिशाप
रांबेति।योजनीयं।आद्यद्वयंस्हौःइत्याद्याशुक्लाख्यकाशुक्लविइतिहाद्यंसाद्यंह्सौःस्हौः

।।श्री।।
।।४२।।

इति सर्वत्र शुक्लपरस्थाने मिश्रपदं ज्ञेयं। आद्यं युग्मं ह्सौः स्हौः इत्याद्या शुक्लाख्यका शुक्ल
विद्या। वागानंदभैरवं। श्रीनवात्मानंदनाथ च। वाग्भवं छ्रीं च्लीं च किणि द्वयं विश्वे च खे
चरी। निष्कलात् समयदेषा परां बलिप्रकीर्तिता। श्रीपरापावका सर्वाराध्या सर्वचम्
ईतः। श्रीपुरानाथा वीसे द्वैततो गुरु स्वयं गुरु। तथा शंभुगुरुप्रांते मुखे चानंदभैरवः
श्रीपरापावको युष्मः स्वेषः कामधेनुं कुलं शृणु। लक्ष्मी कामदुघे शक्तिकूटमायोस
मीरयेत्। अमोघे वरदे विश्वे स्फुरयुक्कमलात्रयं। स्वाहा माया तथा तारो वाकूटं हादिसं
स्थितं। अहमस्मिस्त्व निर्वाणानंदनाथ ततः परं। हादिविद्या तथा नेता हंसः सोहं शुव
स्तथा। बिंदुप्रतिष्ठा सस्था ग्निर्ज्वाला बिंदुयुगस्तथा। कामकूटं मुखे स्वात्मा प्रकाशा
नंदनाथकः। पक्षोर्कऋषितकौंचवसुतकैंचिषड्सो। मुखदेवासुराभ्राब्धिः क्रमात्से

ख्यासमीरिता ॥ वाग्भवबीजं आनंदभैरवं ऌ‍ंस्रूंश्रीनवेत्यादिस्वरूपं चवाग्भवं च
द्यं चइत्यजेत् । निष्क समयपरांबाइयं श्रीपरेत्यादिस्वरूपं । आनात्मस्वतःआत्म । आद्दे
चलतोलथाप्रांतेमुखे अं याघयोः कुलकाम धेनुंशृणु । आदौशक्तिबीजं कूटं रमा
बीजं कामदुघेस्वरूपं । अमोघेत्यादिरूपं स्फुरयुग्द्विधा हादिविद्यावाकूटं अहमस्मी
त्यादिस्वरूपं चेतियजेत् । अनंत । अः हंसः सोहं स्वरूपं बिंदुप्रतिष्ठासंस्थामिः हांजा
लाबिंदुयोगतः हौंस्वात्मप्रकाशानंदनाथः द्विद्वादशसप्तषष्ठि अष्टषष्ठिषट्षष्ठिविं
शतित्रयस्त्रिंशत्चत्वारिंशद्वर्णाः ॥ क्रमादेषानविद्याइतिसांभवचरणविद्या । कादि
हाद्यार्घ्यष्टिभेदात् । समष्ट्याचमहेश्वरी । अंतेसबिंदुतुष्टिचहंसः सोहं तथाद्वयं । हंसः
शिवः सोहमपिस्वरौयौवापियोजयेत् । प्रकाशं चविमर्शंचद्वयंनिर्वाणमेवच । सबिंदु

तुष्टिं ईस्वरांत्या अं अः इति शांभवचरणवासना। अथमध्ये च सकलास्सच्चिदानंदना
थकं। निष्कलानंदनाथं च सर्वानंदाख्यनाथकं सबिंदु तुष्ट्याद्ययुक्तं विन्यस्याथ महेस्व
री। सच्चिदानंदपरमसंविदितुष्टियुग्मकं। बिंद्वाद्यंसपरार्द्धं तु कलानाथार्द्धवक्रतः। श्री
पादुकायैहृदयमेवमन्यद्द्वयं भवेत्। वक्रस्थाने पटेद्द्वी बिंदुरत्नयुवैगलं। व्यंजकादपि
रेखालोयोनिमेवं क्रमान्न्यसेत्। सबिंदुतुष्टि गाश्चाग्निवायुशक्तिक्रियास्ततः। मायाही
नं तथा लोपामुद्रा वा कूटकं शिवे। अंते सबिंदुशांत्याद्यं पुनः सादिचतुष्टयं। कादित्रयं
लादियुग्ममेकमंते समीरयेत्। इयं कामकला विद्या षोडशार्णा समीरिता। प्रकाशानंदना
था च विमर्शा वा क्रमाच्छिवे। बिंद्वाद्यशिववन्नूद्यं न वा शलान्तीयमुच्चरेत्। क्रमादेतन्मु
खे क्षिप्त्वा तालीयं तु द्वयां ततः। प्रकाशविमर्शात्मकं परमाच्छिवमेव च। श्रीगुरुत्वं नामयु

त्मथहंसः शिवस्ततः। सोहं निर्वाणतः पादुकां पूज्य चततः परं। यामिवन्मंत्रवैन्यासः मि
तिकामकलाख्यकः। मध्ये चेत्यादिन्यासस्थानं। सकलस सच्चिदेत्यादिनामत्रयई कारयुक्तं।
सच्चिदेत्यादिपादुकाये त्यंतं स्वरूपं बिंद्वाद्यं तु षियुग्मकं। ईई आतु आ ब्लः इत्यनेन तु। वक्रे
पदस्थान बिंदुस्तन सुगुलं व्यंजर रवायो निइति च पटेल्। अग्निहा वायुसशक्तिका। त्रि
यात्त। सबिंदुतुषिगताः। ह्स्क्लीं। इतिप्रकाशेत्यादिनामद्वयं। अहं इत्यनेन बालानार्तीयं द्वयां
ततः। अहंसौः नामत्रयादौ क्रमेण त्रयं योजनीयं। हंसं इत्यादि स्वरूपं ततः चततः परं इत्य
जेत्। ह्रं मंत्रेनमः। इति कामकलाविद्या। परापादुकेत्यपि नामानरं। अथ कादिहादिविद्ययोः
पादुकाक्रमः। कूटत्रयांते सर्वांतेशक्तिबीजं निवेशयेत्। हंसः सोहं चोभयं च हसांत्यं शि
वमध्यगं। तद्द्वयं शतयादौ चैकैकस्मिं निवेशयेत्। रक्ताद्युक्तानुमिश्रतश्च निर्वाणादपि

पादुका। श्यामंतेहृदयंचेतिहादिविद्याविद्यावपि। प्रकाशाश्चविमर्शाश्चोभयादपिमहेश्व(
री। चतुष्पादन्यो तिष्ठतीशेषंपूर्ववदेवहि। इतिसर्वातेसमष्टयंतेउभयंहंसः सोहंहंसांसे
शिवमध्यकं। उभयंहंसः शिवः सोहंहंसः॥ इतिशक्तयादौकादिविद्यायांरक्तपादुकाभ्या
न्नमः। हादिविद्यायांप्रकाशपादुकाभ्यान्नमः। इत्यादिमहापादुकापूर्वमुद्धृता। अथसप्त
विंशतिरहस्यानि। स्वराः समस्ताःस्पर्शास्तुव्यस्ताद्याद्याः समस्ततः। क्रियाज्ञानेच्छानंदा
चशक्तयः पंचसंख्यकाः। रूपांताः पंचसंख्याद्याः सद्योजातोथशंकरी। वामदेवस्तथाघो
घोरस्ततः स्तत्पुरुषः शिवो। ईशानइत्यात्मकाक्षी पराभट्टारिकातथा। अंबाख्यीपादुकापूजया
सिद्धकार्नयक्रमात्। शक्तिबीजंसर्वतत्त्वंस्वरांतेविनिवेशयेत्। चिदाद्याशक्तयोदेवीईशा
नाद्यान्विशोमतः। काद्यंतेषुक्रमाच्छक्तिंपृथिव्यादींश्चयोजयेत्। समस्तयाद्यंततस्तुनि

स्ययादिशिवांतकं। समस्तशक्तिं सद्यादिपंचकं चापि योजयेत्। सप्तविंशतिसंख्याता विद्या
स्तु परमेश्वरी। इति स्वराः समस्ताः अकारादिविसर्गांताः एकविद्यादोपटनीयाः। स्पर्शाः का
दिमांताः व्यस्ताः एकैकशः यायाः समस्ताः स्वरवत्। क्रियेत्यादिशक्तिं पंचकं रूपांतं क्रिया
शक्तिरूपेत्यादि सद्योजातेत्यादिनामपंचकं आत्मकाः सद्योजातात्मकं श्रीपराभट्टारिकेत्या
दिस्वरांते सबीजत्वं चिदादिशक्तीः ईशानादिनामानि च विलोमेन योजयेत्। तथाहि। अंअः
सौः सर्वतत्वचिदानंदेच्छाज्ञानक्रियाशक्तिरूपेशानतत्पुरुषाघोरवामदेवसद्योजाता
त्मक श्रीपराभट्टारिकांबा श्रीपादुकां पूजयामि॥१॥ कं सौः पृथ्वीतत्वक्रियाशक्तिरूपे सद्यो
जातात्मक श्रीपरा॰॥२॥ खं सौः अप्तत्वज्ञानशक्तिरूपवामदेवात्मक श्रीपरा॰॥३॥ इत्यादिमं
सौः इत्यंतं पुरुषतत्वचिच्छक्तिरूपेशानात्मक श्रीपरा॰ यं क्षं सौः नियतिकालरागविद्याक

त्तामायाशुद्धविद्येश्वरसदाशिवशक्तिशिवतत्त्वक्रियाज्ञाने च्छानंदचित्स्वल्परूपसद्यो
जातवामदेवाघोरतत्पुरुषेशानात्मकश्रीपरा॥२६॥इति॥अथपंचांबामंत्रः॥आदिनाथ
तथाव्योमातीतांबाद्याप्रकीर्तिता॥अनादिनाथव्योमेश्वर्यंबास्यात्तुद्वितीयका॥अनाम
यतथानाथव्योमगांबातृतीयका॥अनंतनाथव्योमातुचारिण्यंबातुरीयका॥चिदानंदना
थःस्वप्रकाशव्योमस्थांबातुपंचमी॥अतेश्रीपादुकायंचहृत्तादौतुद्वितारिका॥नंदचित्स्व
तिरुद्वार्कवर्णाएतेक्रमात्स्मृताः॥इतिद्वितारिकाः॥ह्रींश्रींइदंसर्वदौअंबांताःसर्वेमं
त्राः॥आद्येनतथा॥तृतीयेनतथा॥चतुर्थे॥आतुसर्गेनतु॥श्रीपादुकेत्यादिन्यासोपयोगिले
नोक्तं॥अथनवनाथमंत्राः॥उन्मनीसमनीतद्वद्व्यापिकाशक्तिरेवच॥ध्वनिश्चध्वनिमा
त्राचनादहलेंदुस्ततःपरं॥बिंदुश्चेतितत्तःप्रोक्ताआकाशांतामहेश्वरी॥आनंदभैरवोस्त्र

तुवर्णऐकैकशः क्रमात्। योज्याश्च बिंदवश्चाद्वितार्यो स्विपूर्वं तु दिलि। आकाशांताः
उन्मन्याकाशसमनाकाशसमनाकाशइत्यादि। आनंदभैरवस्थो वर्णाः सबिंदवः। हंसंक्षं
मंलंवंरंयंउं ईत्यैकैकमादौ योजयेत्। तदादौ द्वितारि। अथ षोडशमूलविद्यामंत्रः। स्वच्छ
प्रकाशा च परिपूर्णा चापि परापरा। सिद्धविद्या कुलयोगीनि मायाग्नेश्च वर्णिका। स्वच्छे
त्यादिस्वरूपं। आच्च। आच्चपि। आतु इत्यजेत्। मायाबीजं। इति कुलयोगिन्यंबा॥१८
स्वात्मानं बोधय हूं हूं प्रासादद्वयसंपुटं। रुद्राक्षरी लियं प्रासादा सपरांबा प्रकीर्तिता। बोध
येत्यस्य हूं हूं द्वियोच्चारण। प्रासादद्वयं प्रासाद परापरा। प्रासादा च। २ वाग्भवं कामबीजं
चतुर्थं बाणस्ततः परं। क्लिन्ने क्लिदिनि चैप श्चान्महामदनथाद्रवे। कामः क्लेदययुग्मं चक्लीं ८
कामोमोदयद्वयं। मायालक्ष्मीः कामद्रवशिरः षट्रामसंमिता। क्लिन्नेत्यादिस्वरूपं। वैपश्चा

त्। तथा कामबीजयुग्मं च। कामबीजद्वयं इति यजेत्। मायेत्यादिबीजं इत्यादिरहस्ययोगि
न्येवा ३ स्वच्छानंदाच्च परमहंसाश्च परमात्मने। शिवः सह ष्लौं हंसा घाभूपक्षार्गसमीरि
ता। शांभव्यं बा इति। स्वच्छेत्यादिस्वरूपं। आद्य। आद्य इत्यजेत्। ४। मायानित्यस्फुरच्चैत
न्यानंदचमये महा। बिंदुव्यापकवैमातृकास्वरूपिणि वाग्भवं। तुर्या मायारमा तुर्या चंद्रा
ग्न्यर्णप्रकीर्तिता। नित्येत्यादिस्वरूपं। चवैतियजेत्। तुर्या ई। इति चित्सुरवांबा। ५। वाग्मा
यारमा स्वच्छवैप्रकाशात्मिके ततः। मायाकुलमहामालीनिवाकुलचगर्भवै। मातृके
चाथ मायावाक्समया द्विमलेरमा। समायां वैयमात्म्यालाभूतरा माक्षरी शिनं। वाग्वाग्भ
वं। स्वच्छेत्यादिस्वरूपं। वैततः मायाबीजं। वाग्वाग्भवं च वैचोथमायावाग्वाग्भवं जातृ।
रमाबीजं इति यजेत्। ६। नित्यप्रकाशात्मिके च कुलकुंडा दथोदिनी। आज्ञासिद्धिमहाभै

रवीआत्मानंदीबोधयअंबेभगवतोवातिमायावर्ममुखेजया।वैभूदार्णापरपराबोधि
न्यंबासमीरिता।नित्यत्यादिस्वरूपं।च।आदथा।द्विबाधयद्वयं।ततोआत्मायाबीजंस
वर्तीअजपाहंसः इत्यजेत्।७।तारोमोक्षंकुरुइतिकुलपंचाक्षरीमता।८।लोपामुद्रास्य
केशक्तिःषाडशार्णमहेश्वरी।अनुत्तरापंचदशाक्षयेंबाख्यासमीरिता।लोपामुद्राविद्यां
तेशक्तिबीजं।९।शुद्धसूक्ष्मनिराकारनिर्विकल्पपरादथा।अस्वरूपिणीततःकामबीजं
परातथा।नंदशक्तिशक्तिबीजंशांभवीनंदनादथ।श्रीचादौवाग्भवंचेयंमुनिरामोक्ष
रीभवेत्।अनुत्तरकोलविद्यांवतिशुद्धत्यादिश्रीयंतंस्वरूपं।आदथ।ततःकामबीजं।
तथाशक्तिबीजं।चेतिसजेत्।१०।सोहंस्वच्छानंदपरमहंसपरमात्मने।शिरश्वादौहंस
इतिनवार्णयंमहेश्वरी।गुरुतरविमर्शन्यंबेति।११।अनोमाख्यातव्योमातीतंनाथचप

रा१रा। व्योमानीथ तथा व्योमेश्वर्यंबा चादितामिका। भूताक्षिवर्णा चाना रव्यां वांबेति परि
कीर्तिता। अथ च तथा च इत्यन्कारा षंरवरूपं। द्वितारिका। ह्रींश्रीं। २२। वाग्भवं तु श्विबीजं च
रतिबीजं महेश्वरी। त्र्यक्षरी संकेत विद्याति तु श्विबीजं ईं रति। बीजं ऊं। २३। मायापश्चाद्भग
वती विश्वेवाग्वा तथादिनिका मो महा च हृदयमहा चैव मलं गिनि। वाक्लिन्ने तु यं वाणश्चमा
याष्टाविंशदक्षरी। प्रोक्तानुत वाग्वादिन्यं बति। भगवतीत्यादिक्लिन्नेयंतं स्वरूपं। तथाका
मबीजं च चैव वाग्बीजं इत्यजेत्। तु यं वाणः ब्लूं। २४। त्रिपुरांबेवानु तरं शाक यंवा समीरिता।
त्रिपुरांबा च केश्वरी। ४५। पूर्तिविद्यांबा उद्धृता। २६। पूर्ववत्तु महेशानि द्वितीदि नियोजयेत्।
अत्र षोडशा विद्यास्तु प्रत्येकं आदौ द्वितारीयोगः कर्तव्यः। अथ षडाधार विद्याः। स्वात्माने
दविभूत्ये च मूर्द्धादौ हंस एव च। १। परमहंसाद्विभूत्ये मूर्द्धादौ सोहमेव च। २। सोहं स्वच्छानं

।।सौ॰क॰।।
।।४७।।

दपरमहंसपरमात्मने। मूर्द्धादौ चापि देवेशि अजपापरिकीर्तिता।३। स्वात्मानं बोधयं हंहंसमू
र्द्धि स्वात्मा ततः परं। नंदनाथ ततः आदौ तु अजपापरिकीर्तिता।४। स्वस्थाने परमेशु त्का सोहं
माघस्ततः परं। स्वात्मानमित्यत्र परमात्मानमिति।५। सोहं स्वच्छानंदनाथ चित्प्रकाशांमृ
तेति च। हे तर्व च शिरस्थाद्यौ हंसयुक्ता महेश्वरी।१। रुद्रादियनरवबिंदुचंद्राग्नि द्विवर्ण
कः। आधाराद्यास्तथा शांताद्द्वितायीद्वितु पूर्ववत्। रुद्रेत्यादिवर्णसंख्या।६। आधारवि
द्यास्वाधिष्ठानविषेत्यादि नाम। आदौ द्वितारयोगः सर्वत्र। अथ षडध्वविद्या। कामवाग्भ
वमाया च शक्तिश्रीर्मूलमेव च। नभो बीजमुखं देवी क्रमान्नामानि संशृणु। वर्णपदं तथा मं
त्रः कलातलं च वशंकरी। भुवनं चेति संप्रोक्ता अध्वतास्तु महेश्वरी। कामादिशक्त्यंतं बीजपं
चकं। मूलं सौभाग्यविद्या। नाभो बीजं हं। तेन हं क्लीं। हं ऐं इत्यादि वर्णाध्वेत्यादि नाम। अत्राप्या

।।श्री॰।।
।।४७।।

दोर्द्वितारयोगः। अथषट्दर्शनविद्या। तारेचतुरस्तारेमूर्द्धसप्तार्णयंसमीरिता।१। गायत्रींच
तुर्थ्यारंतु।२। तारोग्निस्त्वंगदागतः। सबिंदुः३ रथसूर्यस्यमनुःग्रोंक्रोंमहेश्वरी। तारोनमोंत
नारायणायेत्यष्टाक्षरीमनुः। मायास्याद्भुवनेशानि चैवंषट्दर्शनंभवेत्। ताराब्रह्मरुद्र
श्चरसूर्योविष्णुस्तथैवच। भुवनेशीदेवतात्र अधिष्ठात्रीक्रमाद्भवेत्। बौद्धवैदिकशैवानिसौ
रवैष्णवशाक्तकाः। षट्दर्शनानितुदेवेशीति। वाग्देवतामंत्रउद्धृताः। अथषट्योगिनीविद्या।
अहंकारस्पर्शयुक्तः शक्तिवाय्वग्निवर्णकः। षट्जातिभेदितारेवीति। अहंकारेत्यादिवर्ण
षट्कंडरलकसहप्रत्येकंषट्जातिभेदितं। डांडींडूंडैंडौंडः इत्यादिनामानितु। डाकिनीराकि
नीलद्वच्छाकिनीकाकिनीतथा। साकिनीहाकिनीचैव॥ ॥अथासपादुकोद्धृ
ता। महावाक्यानितुप्रसिद्धानि। इत्युत्तराम्नायः। वन्हिचैतन्यमंत्राः पाशाद्यसोहकंवन्हि

॥सौ॰क॰॥
॥४८॥

चैतन्यायहृद्रेति। अग्निज्वालनमंत्रः। चित्पिंगलदहदं दहनदं दंपंचदयं। सर्वज्ञाज्ञापय(
शिरस्त्वनुरस्तामुखः। शिवेति। हनदहपचइतित्रयमपिप्रत्येकं द्विधा। अष्टाविंशत्यक्षरः।
अथाग्निमंत्रः। वैश्वानरजातवेदइहावहचलोहिता। क्षसर्वकर्माणिसाधयमूर्द्धायंमनुर्भ
वेत्। षट्विंशत्यक्षरमिति। वैश्वानरेत्यादिस्वरूपं। चेतित्यजेत्। अथसप्तजिह्वाबीजानि।
सबिंदुरतिसंस्थोनुशब्दस्पर्शमहेश्वरी। विज्ञानतुवाय्वादिशब्दांतायोयथाक्रमात्। सबिं
दुरतिसंस्थशब्दस्पर्शौयूंइति। एतदादौसकारादियकारांताक्षरसप्तयोगः। क्रमेणकर्त्त
व्यः। तेनस्त्रूंष्ब्रूंइत्यादिस्त्रूंइत्यादिसिद्धं। इतिचतुर्थस्कंदमंत्राः॥ अथेंद्रादिबलिदानमंत्रः।
एहींद्रपूर्वदिग्भागेपूजितोवसकौतुके। मांरक्षचततोनिर्विघ्नंकार्यंचसाधयपुनः। साध
यवैमासततोभक्तबलिंतथा। गृण्हहृयंततोमूर्द्धारामवेदाक्षरोमनुः। ततद्दिशीदेवतानाम

॥श्री॰॥
॥४८॥

संयोगादस्तु मंत्रकाः। चलतो च पुनः वै ततो तथा ततो इति सत्काशेषं स्वरूपं मूर्द्धा स्वाहा।
अथ मालापूजन मंत्रः। माया सिद्ध्यै च हृदयं पंचार्ण पूजने मनुः। अथ मालाग्रहण मंत्रः। अ
विघ्नं कुरु पश्चाद्धे मे माले च शिरस्तथा। गंधाद्यं ग्रहणे चैव रुद्रवर्णस्मृतो मनुः॥ अथ रुद्र
मंत्रः। तारश्च हृदस्वग्न धिवेयत च येततः। रुद्राय हृदयं मूर्द्धा नृपवर्ग इति। स्वग्न्याादि स्वरू
पं। रेचततः इत्यजेत्। अथ नृसिंहबीजं। पृथ्वी स्पर्शयुता ज्वाला विंद्वाढ्येति समीरितं। क्ष्रौं
इति। पंचस्कंद मंत्राः। अथ पारायण मंत्रः। चतुस्तारं मूल विद्या विद्याम ष्टांगसंज्ञिता। भ
गमाला तु षष्ठिमपि अजपां चेति वै शिवे। एकत्रिंशद्वर्णमयी सर्व पारायणे भवेत्। अष्टांग वि
द्या पारायणस्कंधोक्ता। अथ हैमवती मंत्रः। तु षष्ठिस्था वन्हि वायूराः विंदुयुक्ताथ तु षष्ठिस्थो
वायुवन्हियुतस्वरः। विंदुयुक्तो हैमवतीति। अथ प्रथमस्कंध मंत्राः। सप्तमस्कंध मंत्रः। के

त्रिदुद्धृताः। अवशिष्टाः ग्रंथविस्तरभयान्नोद्ध्रीयंते। मूलमंत्रा देवावर्गतंत्र्याः। इति। अ
थात्रानुक्रमणिका लिख्यंते। मंगलाचरणं प्रातःस्मृतिस्नानं त्रिपुंड्रकं। प्रातःसंध्या तथा
शौचापत्योरपि च तद्विधिः॥१॥ नाथादि विद्याप्रजपः संध्यायामान्हीकी तथा। तत्र विद्या
जपश्चैव संध्या सायान्हिकी तथा। २। नित्या विद्याजपस्तद्वत् त्रिंशत् षोडश पत्रके। प्रायश्चि
त्तं तु संध्यानुतदिशाकालेनिर्णयः॥३॥ भूशुद्धिर्भूतशुद्धिश्च प्राणसंस्थापनं ततः। प्राणा
यामो मातृकायाः करांगन्यासयोर्विधिः॥४॥ अंतर्बहिर्मातृका च चक्रन्यासस्तथा द्विधा।
वाग्देवतानां मूलविद्यातत्वानां न्यास एव च॥५॥ कामेश्वर्यादिकस्तद्वत् करशुद्धिः षडंगकः॥
एवं दशविधान्यासो शक्तया पत्तु च निर्णयः॥६॥ आद्यस्कंधस्य वृत्तांत चैवं सम्यग्निरूपितः।

त्रैविध्यं पूजनस्यादौ द्वारपूजा व्यवस्थितः॥७॥ पूजा तर्पण मुद्रा च भूस्तुत्यादि विनिर्णयः॥ सं

कल्पो नित्यपूजायां पात्रादिस्थाननिर्णयः।८। दिग्व्यवस्था गणेशस्य प्रार्थनं चातिरस्कृतेः।
सूर्यार्घ्यपात्रसंस्कारतीर्थसंस्कार एव च।९। पुष्पखंडादिसंस्कारपीठार्चा चात्मपूजनं।।
आवाहनादिकं चैव च चतुःषष्ट्युपचारकौ।१०। आद्यतिर्बलिहोमादिरारार्तिकमतः परं। गु
र्वादिपूजनं देव्या उद्वासः शांतिसंस्तवः।११। विशेषार्घ्योद्वासनं च सूर्यार्घ्यादिकमेव च।।
अशक्तानां तु संक्षेपपूजा चार्घ्यादिसंस्थितिः।१२। षोडशाद्युपचारांश्च तर्पणस्य च नि
र्णयः। आत्मशक्तेश्च पूजा च तद्दशपतिकालिकी।१३। पूजाविघ्नस्य शांतिश्च विघ्नेन्यनस
मापनं। अनुकल्पस्तु तीर्थादेस्तत्पूजाविधिरेव च।१४। अथातिसंक्षेपपूजाचाशौचनि
यमस्तथा। विधिः सामयिकानां च शक्तिसंस्कार एव च।१५। प्रायश्चित्तं तु पूजायामुपघा
तादिके तथा। इति द्वितीयस्कंधस्थानां तत्तु निरूपतः।१६। नैमित्तिकार्चा दिवसाः क्षपा

हस्यविधिर्गुरोः। चैत्रशुक्लप्रतिपदि निंबपुष्पेण पूजनं। १७। तत्पूर्णिमायां दमनारोपणं चान्य
पुष्पकैः। वसंतपूजा वैशाखे फलपुष्पैश्च पूजनं। १८। ज्येष्ठ कदल्यादिफलैराषाढे चंदनादि
भिः। श्रावणे चापि वित्रेणकेन च आभाद्रमासके। १९। नित्यानामाश्विने पूजा नवरात्रस्य पूज
नं। तत्पूर्णिमायां पूजाख्याना रिकेलजलेन च। २०। कार्त्तिके दीपपूजा च मार्गशीर्षादिपूजनं।
निमित्तपूजाकरणे जपपूजा च काम्यका। २१। पूजापीठविचारश्च श्रीचक्रस्य च निर्णयः। त
त्लेखनविधिस्तस्य चरादिस्थानतो विधिः। २२। अष्टबंधनयोगश्च पुष्पपात्राणि निर्णयः।
तृप्तितृतीयस्कंधस्य वृत्तांतः सम्यगीरितः। २३। लक्षणं गुरुशिष्याणां दीक्षाकालस्य नि
र्णयः। दीक्षाभेदाः पूर्णदीक्षा वेदिका विधिरेव च। २४। सर्वतोभद्ररचनानवयोनिविधिस्त
था। सामग्री दीक्षाणोरंभाः संकल्पो गणपार्चनं। २५। पुण्याहवाचनं नांदी आचार्यादिह

तिस्तथा। द्वारपूजादिविधियो होमपूजाविधिस्तथा।२६। दीक्षाभेदास्तत्समाप्तिमंत्रदीक्षा
विधिस्तथा। मंत्रग्रहणरीतिश्च मंत्रग्रहणनिर्णयः।२७। दीक्षाभेदस्वरूपं च विघ्नोपशान्तितु
निर्णयः। प्रायश्चित्तं स्त्रीनृपश्च दीक्षानिर्णय एव च।२८। गुरुभक्तिस्तथाचारो मंडलाचार
एव च। प्रोक्तश्चतुर्थस्कंधस्य वृत्तांतस्त्विति सर्वतः।२९। पुरश्चर्याकालविधिः देशश्चांग
स्य निर्णयः। जपसंख्याभूग्रहणं गायत्रीजप एव च।३०। कालसंस्थापनं कूर्मचक्रं तदपवा
दकं। स्थानमैत्र्यादिकं चाधिवासो नियमधारणं।३१। जपश्चासनभेदश्च जपमालाचतत्
द्विधिः। संकल्पस्तद्दिनविधिर्मंत्राचारविधिस्तथा।३२। जपोपघातस्तद्भागहोमस्तन्निर्ण
योपि च। अंगपत्तिनिधिश्चैव तर्पणं मार्जनं तथा।३३। ब्राह्मणानां भोजनं च भोज्यवस्तू
नि निर्णयः। रात्रिकर्तव्यलाचैव शुभस्वप्नं तथेतरः।३४। नद्दिद्दिशांतिचपि च सिद्धिवि

॥सौ॰ क॰॥
॥ ५४२ ॥

न्हानिवेचाहि। मंत्रशोधनचक्राणिसिद्धारीराशिचक्रके। ३५। मूलचक्रंभचक्रंचधननंच
स्यकंतथा। मंत्राणांसंस्काररविअनुकअपुरस्कृतैः। ३६। इत्येवंपंचकस्कंधवृत्तांतस्व
त्रनिर्णयः। अजपापारायणानित्वाघमंगाख्यकंततः। ३७। नाथपारायणंपश्चाद्दुरिका
ख्यंततःपरं। तत्त्वपारायणंनित्यानामपारायणंततः। ३८। अष्टांगनिर्णयोमंत्रश्रीचक्रा
ख्यंततःपरं। कालचक्राह्वयंपश्चात्तद्विधविस्तरस्तथा। ३९। षष्ठस्कंधस्यवृत्तांतस्त्ववरी
यानिरूपतः। अथाभ्यासस्तुपंचांबासंशोधनचनाथकः। ४०। मूलविद्याषोडशकषडाधा
रःषडध्वकः। षट्दर्शनोयोगिनीनांन्यासश्मरणसंज्ञकः। ४१। शांभवाख्यःकामकलास
शश्चैवकलाह्वयः। पूर्णमंडलसंज्ञश्चलघुषाढाह्वयस्तथा। ४२। महाषोढाह्वयंपश्चाच्छ्री
चक्रंन्यासएवच। तत्रैविध्यंमहाशक्तिन्यासःसौभाग्यवर्द्धनः। ४३। संमोहनाख्योन्यास

॥श्री॥
॥ ५४२ ॥

श्वमूलविद्याद्भवाविमौ। सप्तमस्कंधवृत्तानां लक्षचर्यानिरूपनः।५४। प्रायश्चित्तानां सांतपनं
चांद्रायणसमाह्वयं। कृच्छ्रारण्यं तद्वदस्थाच महायागविधिस्तथा।५५। कौलश्राद्धं तथां
सदिविधिमुद्रानिरूपणं। क्रमाद्प्रोक्तमंत्राणां उद्धारस्कंधभेदतः।५६। अनुक्रमणिका
चैवक्रमेणप्रतिपादितां। अष्टमस्कंधवृत्तानां लक्षवंशाकोपशेषतः।५७। इत्यनुक्रमणि
काचैवनिरूपणमिति शिवं। कुलज्ञानार्णवोद्भूतः परमानंदमूलकः।५८। सौभाग्यरत्ना
नुजातो दक्षिणामूर्तिसेवकः। गुरूक्तः कांडसौभाग्यप्रपंचोद्योतपल्लवः।५९। रामपक्षां
कजलधिमितालीलाब्दकेकलौ। माधवेसितपंचम्यां श्रीकाशीनगरेशुभे।५०। श्रीयाद
वानंदनाथकृते सौभाग्यपूर्वके। कल्पद्रुमे स्वभूस्कंधे परिशेषं निरूपणं।५१। श्रीयादवा
नंदनाथपदपद्मानुजीविना। माधवानंदनाथेन राराश्वरनिवासिना।५२। उद्भावितोयंसौ

॥सौ॰ क॰॥
॥५८२॥

भाग्यकल्पद्रुमइहेष्टदः। ललितायाःप्रीतयस्यस्कंधाष्टमविराजनः॥५३॥ अयुक्तंवाप्ययुक्तंवा
दिहममभवेदहमाधारल्पबुद्धेरल्पदृश्वापि द्विरुक्तंनरस्वित्तमपिनिर्दोषभावंप्रयाति॥ श्रीविद्या
पादपंकेरुहमधुरससंस्वादनोत्सुकानांवीक्षामात्रेणपंकाजलमिवमलिनंजाह्नवीसंगतेन
॥१॥ श्रीगुरुवचनसुधाब्धिसेवामंथानमथनयोगेनकल्पद्रुमोऽमन्यायंप्राप्तःश्रीसेवकानांविश्रां
त्यै॥२॥ सरन्यांजलिबंधंयुष्मान्संप्रार्थयामिसद्बुधाः। अहंयतःक्षंतुमिदंसाहसमीदृग्विधं
मयाचरितं। क्वाहंमंदमनीषःक्वश्रीदेव्याःसभाजनादिनविधिः। हंतसंतामनुकंपामूकेप्यति
वास्मिन्नांसमादिशति॥ इतिश्रीसौभाग्यकल्पद्रुमेपरिशिष्टविधिनिरूपणंनामाष्टमस्कंधः॥
श्रीश्रीमहाकालीश्रीश्रीमहालक्ष्मीश्रीश्रीमहासरस्वतीश्रीरघुनाथरूपिश्रीमहात्रिपुरसुंद
रीर्पणमस्तु॥ संवत् १९४२ शाके १८०६ फाल्गुनेकृष्णतिथौ १२ भृगौपुस्तकंसमाप्तंश्रीरस्तु॥

॥श्री॥
॥५८२॥